गङ्गानाथझा-ग्रन्थमालायाः

तृतीयं पुष्पम्

डॉ० कान्तिचन्द्रपाण्डेयविरचितः

शैवदर्शनबिन्दुः

वाराणसेय-संस्कृत-विश्वविद्यालयः

GAṄGĀNĀTHAJHĀ-PRAVACANAMĀLĀYĀḤ

TṚTĪYAṂ PUṢPAM

General Editor
Baladeva Upādhyāya
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya
Varanasi.

SHAIVA DARSHANA BINDUḤ

[Revised Edition]

by

Dr. Kantichandra Pandeya

VARANASI
1968

Published by:
Director, Research Institute,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

Printed by:
Shri Ghanshyam Upadhyaya
University Press,
Varanaseya Sanskrit Vishvavidyalaya,
Varanasi.

l by:
yaya
Press,
laya,

गङ्गानाथझा-प्रवचनमालायाः
तृतीयं पुष्पम्

शैवदर्शनाबिन्दुः

[परिवर्द्धितं संस्करणम्]

लेखकः
डॉ० कान्तिचन्द्रपाण्डेयः

वाराणसेय-संस्कृत-विश्वविद्यालय
पुस्तक-विक्रय-विभाग

वाराणस्याम्
१८९० तमे शकाब्दे

प्राप्तिस्थानम्—
प्रकाशनविभागः
वाराणसेयसंस्कृतविश्वविद्यालयः
वाराणसी–२।

मूल्यम् ९) नवरूप्यकाणि ।

प्रास्ताविकम्

अद्य तावत् 'शैवदर्शनबिन्दु'नामानं तान्त्रिकप्रमेयबहुलं प्रामाणिकं ग्रन्थं प्राकट्यं प्रापयन् भृशमानन्दमनुभवामि । शैवदर्शनस्य याः प्रकाशिता बभूवुः प्राचीने काले विचार-धोरण्यः, तासु मुख्यतमानां विवेचनपरो नानाविषयविमर्शपरायणोऽयं ग्रन्थो विद्वज्जनानाम्, विशेषतस्तान्त्रिकदृष्टिमण्डितानां विदुषाम्, शैवतन्त्ररहस्यजिज्ञासूनां च महानुभावानां स्वविवेचन-रीत्या मूलग्रन्थानुशीलनपद्धत्या च नूनं प्रमोदमतुलमाधास्यतीति ध्रुवमाकलये । अस्य लेखकाः डा० कान्तिचन्द्रपाण्डेयमहोदयास्तन्त्रानुशीलनचणा नानादार्शनिकगवेषणाधुरीणा महनी-यस्यैतस्य ग्रन्थरत्नस्य निर्माणेन विपश्चितां प्रभूतामुपकारसन्ततिमाकलयन्तीति तेऽपि नूनमस्माभिः सभाजनीयाः ।

शैवधर्मविमर्शः

साम्प्रतं वर्ण्यविषयमनुरुध्य स्वकीयं विचारमाविष्कुर्मः । शैवधर्मो निखिलेऽस्मिन् भारतमण्डले नूनमतीव प्राचीनोऽयं धार्मिकः सम्प्रदायः । ऋग्वेदे रुद्ररूपेण शिवस्य स्वरूपप्रति-पादकाः सन्ति बहवो मन्त्रा इति नापरोक्षं प्रेक्षावताम् । अस्य धर्मस्य समुदयः कदा कुत्र च भारतवर्षस्य बृहन्मण्डले संजात इति विचारणावसरे परस्परं विवदन्ते ऐतिह्यरसिकाः । केषाञ्चिद् द्रविडाम्नायपारदृश्वनां विपश्चितां मतमिदमुदीर्यते यत् प्राचीनतमे काले मूलतो द्रविडदेशे एव शिवस्याविर्भावः संजातः । द्रविडदेश एव शिवस्य शिवपूजायाश्च जन्मभूमि-र्विराजतेतराम् । तत एवोत्तरभारतस्थैरार्यैः स्वीये वेदे तत्पश्चात् पुराणादिषु च तन्मतमेवाश्रित्य बहुशो विवेचितं शिवपूजायाश्च विपुलो विस्तारो व्यधायि । परन्तु मतमिदं नो समीचीन-मित्यत्र द्वापरत्वं नास्ति, द्रविडशैवाम्नायानां वेदतः कथमपि प्राचीनत्वाभावात्, तेषु शिवाभि-धानपरकशब्दस्य मूलतो द्रविडत्वाभावाच्च । द्रविडभाषायाः प्राचीनतमेषु ग्रन्थेषु शिवस्य यन्नामोररीकृतं विलोक्यते, तत्तु संस्कृतमूलकम्, न तु द्राविडीमूलकमिति विदांकुर्वन्तु भाषा-तारतम्यपरीक्षणपराः पण्डिताः । 'पुळनाणूरू' नाम्नि प्राचीने सङ्गमयुगीये ग्रन्थे शिवस्य नाम निर्दिष्टं वर्तते 'कळ्मिट-ळण्णल्' इति । तस्य नाम्नोऽर्थस्तु 'नीलकण्ठ' इति । स तु शब्दद्वया-त्मकः समस्त एव शब्दः । अन्यग्रन्थेषु 'चिवन्' 'चेम्पु' इति नामद्वयं समुपलभ्यते । तत्र 'चिवन्' इति द्रविडशब्दः संस्कृतमयस्य 'शिव' शब्दस्य प्रतिरूपकम् । 'चेम्पु' इति शिवस्याभि-

धानं लोहितवर्णमप्यभिव्यनक्ति। गौरवर्णत्वात् शिवस्य सुवर्णवज्ज्योतिर्मयस्य समुचितमेवेदं नाम प्रतीयते। वेदमन्त्रेष्वनेकत्र शिवः 'कृष्णपिङ्गल' इति शब्देन व्यवह्रियते। तत्र विषधारकत्वात् कण्ठस्य कृष्णवर्णता, गौरविग्रहत्वाद् देहस्य च पिङ्गलरूपतेति तन्नामकरणरहस्यं परिस्फुरति। पुराणादिषु कृष्णपिङ्गलस्य स्थाने 'नीललोहित' इति नाम्नोऽभिप्रायः स एव। इत्थंभूते व्यतिकरे शिवस्य समुदयो रुद्रनाम्ना तस्य बहुशो व्यपदेशश्च वैदिकग्रन्थेषु प्रचुरं समुपलम्भाद्धेतोरार्यदेवोऽयं शिवः, न तु द्रविडदेशे उत्पत्तिं भजमानः कोऽप्यनार्यदेव इत्येवं निश्चेतुं युज्यते।

अग्निसमुपासकानां वैदिकानां धर्मे लिङ्गात्मकरूपेणोपास्यस्य शिवस्याविर्भावः कथं समजनीति विषये स्वीयान् विचारान् विपश्चितां मनस्तोषाय स्तोकमुदीरयामः। वैदिकसंहितासु शिव एव रुद्रनाम्ना बहुशो व्यपदिश्यते। अथर्ववेदे (११।२।९) शिव एव भव-शर्व-पशुपति-भूतपत्यादिभिर्नामभिः समुदीर्यते स्तुतिप्रसङ्गे। तत्र पशुपतिनाम्नि 'पशु' शब्दोऽयं न केवलं गवादीन् चतुष्पादजन्तूनेव व्याचष्टे, यावद् द्विपादधारिणः पुरुषानपि द्योतयते। तत्र अथर्ववेदे—

तवेमे पञ्च पशवो विभक्ता
गावो अश्वा पुरुषा अजावयः। इति।

इत्थं पशुपत्ययं शब्दः शैवतन्त्रे प्रयुज्यमानस्यैतस्य शब्दस्य तात्पर्यं सम्यग् बोधयति। आगमानां निगममूलकत्वमेतेनान्यादृशैश्च हेतुभिर्निपुणं साध्यते। ऋग्वेदेऽग्निरेव रुद्रनाम्नाऽभिधीयते। अत एव द्वयोरैक्यापत्तिर्नूनं साक्षात् क्रियते तज्ज्ञैः। अस्य सिद्धान्तस्य पोषकाः केचन मन्त्रा ब्राह्मणवाक्यानि च कानिचिदत्र समुपन्यस्यन्ते—

(क) त्वमग्ने रुद्रो असुरो महोदिवः।

(ऋग्वेद २।१।६)

(ख) यो अग्नौ रुद्रो य अप्स्वन्त-
र्य ओषधीर्वीरुध आविवेश।
य इमा विश्वा भुवनानि चाक्लृपे
तस्मै रुद्राय नमो अस्त्वग्नये॥

(अथर्व० ७।८७।१)

(ग) अग्निर्वै स देवः। तस्यैतानि नामानि। शर्व इति प्राच्या आचक्षते। भव इति यथा वाहीकाः। पशूनां पती रुद्रोऽग्निरिति तान्यस्याशान्तान्येवेतराणि नामानि। अग्निरित्येव शान्ततमम्—(शत० ब्रा० १।७।३।८)।

एतेषां समुद्धरणानामनुशीलनं नूनं द्योतयति यद् रुद्र एवाग्निरूपः। अग्निरुद्रयोर्वर्तते समधिकमैक्यम्। शतपथवाक्यात्त्विदमपि प्रतीयते यत् प्राच्या रुद्रं शर्वेति नाम्ना व्यवहरन्ति स्म, वाहीका अर्थात् प्रतीच्यास्तु भवेति नाम्ना। शर्वभवयोः स्वरूपैक्येऽपि तत्तद्देशप्रसिद्धिजोऽयं नामभेदः।

साम्प्रतिकी शिवोपासनापद्धतिरपि सिद्धान्तमिमं सुतरां द्रढयति। जलधारीति नाम्ना ख्यातस्य स्थलस्य मध्ये विराजते ऊर्ध्वमूलं शिवलिङ्गम्। 'अभिषेकप्रियः शम्भुः' इति वचनाद् जलस्याभिषेकेणैव शम्भुः परमां प्रीतिमावहति। भस्मनो धारणं शैवानां मुख्यं कर्तव्यम्। इत्ययं सार्वकालिकः सार्वभौमश्चोपासनापन्थाः शिवस्याग्निपूजया नितान्तं साम्यं भजतेतराम्। जलधारीति ख्यातं स्थलं तु वह्नेर्वेदिरूपायते। तन्मध्यस्थमूर्ध्वमूलं शिवलिङ्गं तु वेदिमध्ये प्रोदीप्तवह्नेः स्तूपायते। अस्मिन् विषये शिवलिङ्गस्य कृते 'ज्योतिर्लिङ्ग' शब्दस्य व्यवहारोऽपि प्रमाणायते। अग्नेर्जायमानं यज्ञीयं भस्म पावनत्वधिया ध्रुवं धारयन्ति याज्ञिकधौरेयाः। रुद्र एवान्तरिक्षस्थितवह्निरूपाया विद्युतोऽध्यक्षरूपेण वेदेषु मुहुर्मुहुश्चिन्त्यते। अत एवाथर्ववेदे कश्चिदृषिरात्मानो विद्युत्पाताद् रक्षां कामयमानो रुद्रमित्थं संस्तौति—

मा नो रुद्र तक्मना मा विषेण
मा नः सं स्रा दिव्येनाग्निना।
अन्यत्रास्मद् विद्युतं पातयैताम्॥

(अथर्व० ११।२।२६)

अग्ने रूपद्वयं नित्यं साक्षात् क्रियतेऽस्माभिः। तच्च यथा—एकं वर्तते घोरातनुः, अन्यच्च अघोरातनुः। एकं वर्तते भयावहं भीषणं जन्तूनां नित्यं सन्तापकारि, द्वितीयं च विद्यते सुखसौख्यसंवर्धकं प्राणिनां सर्वदा कल्याणकरम्। संहारकोऽपि रुद्रो जगतः सृष्टि-कर्मण्येव प्रवर्तते। अत एव महाकविः कालिदासोऽग्नेः संहारकारिण्या शक्तेरुपादेयतां दृष्टान्त-मुखेनेत्थमभिव्यनक्ति—

कृष्यां दहन्नपि खलु क्षितिमिन्धनेद्धो ।
बीज-प्ररोह-जननीं ज्वलनः करोति ।।

(रघुवंश ९।८०)

यथा सृष्टौ प्रलयस्य बीजं वर्तते तथैव प्रलयेऽपि सृष्टेर्बीजं विलसति, सृष्टिप्रलयोः परस्परं सापेक्षत्वात् । अत एव य एव रुद्रः, स एव शिवः । अग्नेर्घोरतन्वाः प्रतीकं रुद्रः, अघोरतन्वाश्च प्रतिनिधिः शिवः । रुद्रशिवयोरित्थमभेदरूपता विलसति ।

अमुमेव विकासपद्धतिमवलम्ब्य अग्निसमुपासकानां यज्ञपरायणानां वैदिकार्याणां धर्मे शिवरूपस्य शिवपूजायाश्च साम्प्रतमनुभूयमानो विकाशः समजायत । इत्थं शिवस्यानार्यदेवता-रूपस्वीकरणात् पराङ्मुखा एव सन्ति धर्मविकाशपरिशीलनपरायणा विपश्चित इति ध्रुवं समुद्घोषयितुं क्षमाः समालोचका इति दिक् ।

प्रस्तुतो ग्रन्थः

आचारमूलिका विचारसरणिर्जरीजृम्भत इति जानन्त्येव विद्वांसः । शैवधर्ममिमनुरुध्यैव शैवतत्त्वविदो निजां दार्शनिकीं तत्त्वधोरणीं विचिन्वते । शैवतन्त्रस्य वैदिकत्वं तदुद्गमपरम्परां च स्वीये प्रास्ताविके वक्तव्ये निपुणं विविनक्ति लेखकः । बहूनि कालमुखकापालिकादीनि शैवमतानि साम्प्रतं नाममात्राण्येवावशिष्टानि सन्तीति हेतोरत्र प्रमाणपुरस्सरोपनिबद्धे महति निबन्धे दश शैवदर्शनानि व्याख्यायन्ते । तत्र शिवद्वैतप्रतिपादकं दर्शनद्वयं पाशुपतशैवनाम-कम् । शिवाद्वैतद्वैतप्रतिपादकं दर्शनमेकं लकुलीशपाशुपतम्, श्रीकण्ठप्रतिपादितं विशिष्टाद्वैतम् । वसवोत्थापितं वीरशैवमतम् । शोधितपारदोपयोगेनाजरामरविग्रहोपलब्धिफलकमिहैव जन्मनि साधकं रसेश्वरदर्शनम् । चत्वारि च शिवाद्वैतप्रतिपदकानि दर्शनानि । तत्रैकं नन्दिकेश्वरप्रतिपादितम्, काश्मीरकैः प्रतिपादितानि प्रत्यभिज्ञाक्रम-कुलेति संज्ञाभिः प्रसिद्धानि त्रीणि दर्शनानीति कृत्वा दश शैवदर्शनान्यत्र समुपबृंहणमुखेन विवृतानि व्याख्यातानि च ।

अस्य ग्रन्थरत्नस्य प्रणेतारः सन्ति डाक्टरश्रीकान्तिचन्द्रपाण्डेयमहानुभावाः, यैर्मननतरि-तीर्णतन्त्रार्णवैर्बहूनि वर्षाणि यावत् शैवतन्त्रविषयं सम्यग् परिशील्य ग्रन्थरत्नमेतत् समुद्भासितम् । अत्रैतिहासिकदृष्टिमपि स्वीकृत्य कृतं विशदं तर्कप्रचुरं विवेचनं पौरस्त्यानां प्रतीच्यानां च विपश्चितां ज्ञानवर्धनाय भविष्यतीति ध्रुवं विश्वसिमि । बहूनि प्राचीनानि तथ्यानि नवसंशो-धनपाण्डित्येन विविच्य प्रकटितानि कामपि कान्तिं भजन्ते । बादरायणसूत्रेषु निर्दिष्टं द्वैतप्रति-

पादकं पाशुपतदर्शनं लकुलीशपाशुपतदर्शनान्नितान्तं भिद्यत इति यदत्र प्रतिपादितम्, तत्तु नूतनतामावहति। कौण्डिन्यकृतां व्याख्यामनुरुध्य लकुलीशपाशुपतस्य द्वैताद्वैतपरत्वं तयोर्मोक्ष-स्वरूपे भेदं च प्रतिपाद्य तथ्यपुष्टिरपि प्रामाणिकतां नितरां धत्ते। नन्दिकेश्वरकारिकासु सूक्ष्मरूपेण संकेतितमद्वैतमतं विशदतरैः शब्दैः प्रतिपाद्य पाण्डेयमहोदयस्तत् स्पष्टं विवृणुते। पृष्ठे ६७ तमे नन्दिकेश्वरः पाणिनेर्गुरुरासीदिति कथनं दृढतरं प्रमाणमपेक्षते। सूक्ष्मतया विवेचितं मतं वैशद्येन प्रमाणैरुपोद्बलितं भविष्यतीति कामये।

अस्य ग्रन्थस्य प्राथमिकोंऽशः प्रवचनत्रयात्मकः पूर्वं प्रकाशितोऽभवत्। शैवद्वैतदर्शनम्, शैवद्वैताद्वैतदर्शनं शैवाद्वैतदर्शनञ्च (आरम्भात् १०० पृष्ठाणि यावत्) १९६३ ईसवीयवर्षस्य मार्चमासस्य २३, २४ तथा २५ दिनाङ्केषु वाराणसेयसंस्कृतविश्वविद्यालयस्य सप्तमे स्थापनो-त्सवावसरे विदुषा लेखकेन प्रवचनरूपेण दत्तानि। अवशिष्टश्च भागः कालेन पूरितो ग्रन्थस्योत्तर-भागं भजते। इत्थमपूर्वोऽयं शैवदर्शनतत्त्वविमर्शनपरो ग्रन्थो भूयसीं विपश्चितां हार्दीं जनयेदिति भवानीजानिं भूतभावनं विश्वनाथं भूयो भूयः समभ्यर्थ्य प्ररोचनाधिया विलिखितं वक्तव्यमिदं संक्षिप्तं समाप्तिं नयामि।

एकस्य यस्य सकलः करणानपेक्ष–
ज्ञानक्रियस्य पुरतः स्फुरति प्रपञ्चः।
पश्यन् जगत् करतलामलकीफलाभं
लाभं स पुष्यतु परं परमेश्वरो नः॥

(स्तुतिकुसुमाञ्जलौ ३।५।)

तथास्तु।
वाराणसेयसंस्कृतविश्वविद्यालयः,
वाराणसी
निर्जला एकादशी
सं० २०२५
दि० ७–६–६८

बलदेव उपाध्यायः
अनुसन्धानसञ्चालकः

—:०:—

संक्षिप्तचिह्नज्ञेयानि नामानि

अ० भा०	अभिनवभारती	गायकवाद सिरीज़ बरोदा	(१९२६)
अ० सि०	अपोहसिद्धिः		
आ०	आह्निकम्		
इन्० फिल्०	इण्डियन् फिलासफीः डा० एस्० राधाकृष्णन्		
ई० प्र० वि०	ईश्वरप्रत्यभिज्ञाविमर्शिनी	कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९१८)
ई० प्र० वि० वि०	ईश्वरप्रत्यभिज्ञाविवृति विमर्शिनी	कश्मीर संस्कृतसिरीज़ श्रीनगर	(१९३८)
ऋ० वे०	ऋग्वेदः		
कु० अ०	कुलार्णवतन्त्रम्	जीवानन्द विद्यासागर कलकत्ता	(१९३७)
ग० का०	गणकारिका	गायकवाद ओरियन्टल सिरीज़ बरौदा	(१९२०)
टी०	टीका		
त० त्र० नि०	तत्त्वत्रयनिर्णयः	वाणीविलास मुद्रणालय श्रीरंगम्	(१९२३)
त० प्र०	तत्त्वप्रकाशिका	वाणीविलास मुद्रणालय श्रीरंगम्	(१९२३)
तै०	तैत्तिरीयोपनिषत्	निर्णय सागर बम्बई	(१८८९)
तै० आ०	तैत्तिरीयारण्यकम्	आनन्दाश्रम ग्रन्थावलि पूना	(१९२६)
तं० आ०	तन्त्रालोकः	कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९१८)
तं० रा०	तन्त्रराजतन्त्रम्	श्रीमाधवप्रेस कलकत्ता	(१९४०)
द० मू० स्तो०	दक्षिणामूर्तिस्तोत्रम्	ज्येष्ठाराम मुकुन्द जी बम्बई	(१९०२)
ध्व०	ध्वन्यालोकः	चौखम्बा संस्कृत सिरीज़ बनारस	(१९४०)
ध्व० लो०	ध्वन्यालोकलोचनम् (बालप्रियासहितम्)	चौखम्बा संस्कृत सिरीज बनारस	(१९४०)
नि० उ०	नित्योत्सवः	गायकवाद ओरियन्टल सिरीज़ बरोदा	(१९४८)
नि० षो० अ०	नित्याषोडषिकार्णवः	आनन्दाश्रम ग्रन्थावलि पूना	(१९०८)
ने० तं०	नेत्रतन्त्रम्	कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९३९)
नं० का०	नन्दिकेश्वरकाशिका (कारिका)	काशीनाथ ग्रन्थमाला मैसूर	(१९३६)
न्या० द०	न्यायदर्शनम्	जीवानन्द विद्यासागर कलकत्ता	(१९११)
न्या० वा० ता० टी०	न्यायवार्तिक तात्पर्य टीका	लाजरस कम्पनी बनारस	(१८९८)

प०	पटलः	
प० त्रिं०	परात्रिंशिका कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९१८)
प० ल० मं०	परमलघुमञ्जूषा नेपाली सौभाग्य पुस्तकालय बनारस	(१९४०)
पा०	पाणिनिः	
पा० सू०	पाशुपतसूत्रम् त्रिवेन्द्रम् संस्कृत सिरीज़ त्रिवेन्द्रम्	(१९४०)
प्र० सा०	प्रपञ्चसारः (आर्थर एवलान संस्कृतम्) संस्कृत प्रेस डिपासिटरी कलकत्ता	(१९३५)
प्र० हृ०	प्रत्यभिज्ञाहृदयम् आड्यार लायब्रेरी मद्रास	(१९३८)
ब्र० सू०	ब्रह्मसूत्रम् (भामत्यादिसहितम्) निर्णय सागर बम्बई	(१९०४)
भा०	भागः	
भा०	भास्करी सरस्वती भवन संस्कृत सिरीज़ बनारस	(१९३८)
भा० प्र०	भावप्रकाशः (आयुर्वेदग्रन्थः) मोतीलाल बनारसीदास लाहौर	(१९४१)
भा० भा०	भाष्करभाष्यम् (ब्रह्मसूत्रटीका) चौखम्बा संस्कृत सिरीज बनारस	(१९०३)
म० पा०	मतङ्गपारमेश्वरतन्त्रम् शैवागमपरिपालन संघ देवकोटै	(१९२६)
म० भा०	महाभाष्यम् निर्णयसागर बम्बई	(१९१७)
म० भा० प्र०	महाभाष्यप्रदीपम् निर्णय सागर बम्बई	(१९१७)
म० मं०	महार्थमञ्जरी अनन्तशयन ग्रन्थावलि, अनन्तशयन	(१९१९)
मा० वि०	मालिनीविजयतन्त्रम् कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९२२)
मा० वि० वा०	मालिनीविजयवार्तिकम् कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९२१)
मु०	मुक्तावली दिनकर्यादिसहिता चौखम्बा संस्कृत सिरीज़ वाराणसी	
मू०	मूलम्	
मृ०	मृगेन्द्रतन्त्रम् शैवागम परिपालनसंघ देव कोट्टै	(१९२८)
मो० का०	मोक्षकारिका वाणीविलास मुद्रणालय श्रीरंगम्	(१९२८)
य० प्र०	यमप्रकरणम् गायकवाद ओरियन्टल सिरीज़ बरौदा	(१९२०)
र० त्र०	रत्नत्रयम् शैवागम परिपालनसंघ देव कोट्टै	(१९२३)
रा० त०	राजतरङ्गिणी (स्टेन संस्कृतम्) वेस्टमिनिस्टर लण्डन	(१९००)
रु० या०	रुद्रयामल तन्त्रम् जीवानन्द विद्यासागर कलकत्ता	(१९३७)
ल० ना० स०	ललितानामसहस्रम् निर्णयसागर बंबई	(१९३५)

ल० मं०	लघुमञ्जूषा (रत्नभाटीकासहिता) आदर्श संस्कृत ग्रन्थमाला गाजीपुर	(१९२९)
ल० मं० कु० क०	लघुमञ्जूषा (कुञ्जिकाकलाख्यटीकाद्वयसहिता) चौखम्बा संस्कृत सिरीज़ बनारस	
वा० तं०	वामकेश्वरीतन्त्रम् कश्मीर संस्कृत सिरीज़ श्रीनगर	
वा० प०	वाक्यपदीयम् बनारस संस्कृत सिरीज़ बनारस	(१९२८)
वा० प० ब्र०	वाक्यपदीयम् (ब्रह्मकाण्डम्) बनारस संस्कृत सिरीज़ बनारस	(१९३७)
वा० प० चा० सं०	वाक्यपदीयम् चारुदेवशास्त्रिसंस्कृतम् रामलाल कपूर न्याससमिति लाहौर	(१९३४)
वा० म०	वामकेश्वरमतम् कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९४५)
वृ०	वृत्तिः	
वृ० उ०	वृहदारण्यकोपनिषद्	
वे० प०	वेदान्तपरिभाषा चौखम्बा संस्कृत सिरीज़ वाराणसी	
वे० सा०	वेदान्तसारः निर्णयसागर बम्बई	
शि० दृ०	शिवदृष्टिः कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९३४)
शि० सू० वा०	शिवसूत्रवार्तिकम् कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९२५)
शि० सू० वि०	शिवसूत्रविमर्शिनी कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९११)
श्रीकण्ठ०	श्रीकण्ठभाष्यम् (ब्रह्मसूत्रटीका) निर्णयसागर प्रेस बम्बई	(१९१८)
स० द० सं०	सर्वदर्शनसंग्रहः (अभ्यङ्करकृतटीकासहितः) (द्वितीयावृत्तिः) भाण्डारकर ओरियन्टल रिसर्च इन्स्टिच्यूट् पूना	(१९५१)
सां० सू०	सांख्यसूत्रम् वपृटिष्ट मिशन प्रेस कलकत्ता	(१८८८)
सि० कौ०	सिद्धान्तकौमुदी निर्णयसागर प्रेस बम्बई	(१९०८)
सि० विं०	सिद्धान्तविन्दुः	
सौ० भा०	सौभाग्यभास्करः (ललिता सहस्रनाम टीका) निर्णयसागर बम्बई	(१९३५)
स्फो० वा०	स्फोटवादः अड्यार लाइब्रेरी मद्रास	(१९४६)
स्व० तं०	स्वच्छन्दतन्त्रम् कश्मीर संस्कृत सिरीज़ श्रीनगर	(१९२६)
ह० यो० प्र०	हठयोगदीपिका थियोसोफिकल पब्लिशिंग हाउस मद्रास	(१९४९)
ज्ञा० अ०	ज्ञानार्णवतन्त्रम् आनन्दाश्रम ग्रन्थावलि पूना	(१९१२)

विषयानुक्रमणिका

विषयः	पृष्ठम्
INTRODUCTION	
Historical and philosophical importance of Śaivaism.	२
Ten systems of the Śaiva philosophy presented.	३
Kashmir, the land of Indian philosophers.	४
Common technical expressions in Śaivaism and Vedānta.	५
Śaiva's criticism of the Vedānta.	६
प्रास्ताविकम्	
शैवमतं नावैदिकम्	क
इह व्याख्यातानि दश शैवदर्शनानि	ख
शैवदर्शनानां वैदिकदर्शनेषु प्रभावः	ग
शैववेदान्तदर्शनयोर्मौलिका भेदाः	ग
शैवानामभ्युपगमाः	घ
प्रत्यक्षविषये मतत्रयम्	ङ–च
प्रत्यक्षविषयकमतत्रयसमालोचनम्	छ–ञ
शैवकृता वेदान्तिसम्मतप्रत्यक्षप्रक्रियायाः समालोचना	ञ–ठ
अपरे शैववेदान्तिनोर्मौलिका मतभेदाः	ठ–ड
शैवदर्शनबिन्दुविषयानुक्रमणिका	ढ–प
संक्षिप्तचिह्नज्ञेयानि नामानि	फ–भ

INTRODUCTION

HISTORICAL AND PHILOSOPHICAL IMPORTANCE OF ŚAIVAISM

Śaivaism is very important from the point of view of both history and philosophy. It is one of the oldest systems of thought in the world. It is older than even Zorostrianism which, according to some scholars, arose about eight thousand years ago. Of course, there is no such historical evidence available on such hoary antiquity of Zorostrianism as we have got on that of Śaivaism. For, historians, both Indian and Western, are unanimous on this that the archaeological finds, relating to Śaivaism, such as phallic emblem of Śiva and remnants of a Śaiva temple, discovered at Harappa and Mohenjodaro, belong to the 3rd Millennium B. C.; that the Indian culture, of which Śaivaism was an essential aspect, was at a very advanced stage at that time; that Indians at that time knew the architectural art and had built big forts; that they were well up in the art of war and well fought the nomadic Aryan tribes, which attempted to intrude on their territory; that they knew the art of writing, which was pictographic, as found on some of the vessels, discovered there. All this presupposes a long history of development of the Indus Valley Culture and, therefore, of Śaivaism.

The Śaiva tradition has persisted through the Vedas, Śaivāgamas, Upaniṣads and Purāṇas down to the present day. It spread over not only the whole of India as is evident from the existence of the Śaiva temples in every region, but also outside India, over China and Combodia for instance, as we know from the available literary and archaeological evidences.

TEN SYSTEMS OF THE ŚAIVA PHILOSOPHY PRESENTED

Philosophy is admitted to be an outgrowth of religion. It is rationalisation of religious belief in the Supreme Power. Naturally, therefore, from Śaivaism as a religion, grew up various philosophic systems of the Śaivaism, dualistic, dualistic-cum-monistic and monistic. In the present work ten systems of the Śaiva Philosophy are dealt with. Of course, there are many more. Of these two are dualistic. One is known as Pāśupata and the other as Śaiva or Siddhānta Śaiva as it is popularly called in South India. Lakulīśapāśupata, founded by Lakulīśa in the 2nd century A. D. is a dualistic-cum-monistic system. This gave rise to (i) the qualified monism or Śaiva Viśiṣṭādvaita, as presented by Śrīkaṇṭha in Śrīkaṇṭha Bhāṣya on the Vedānta Sūtra of Bādarāyaṇa, which considerably influenced Rāmānuja in his presentation of the Vaiṣṇava Viśiṣṭādvaita. (ii) Viśeṣādvaita or Vīraśaivaism, as presented by Śr pati Paṇḍita in his Śrīkara-Bhāṣya.

But science does not admit what is spiritual and, therefore, cannot accept anything to be true that cannot be experimentally demonstrated. A section of the Śaivas, who were concerned with effecting improvements on the then existing medical science, disbelieved the 'liberation' (Mukti) that was said to be attainable after death, concentrated on experimenting on mercury, processed and purified it in such a way that the prescribed regular use of it for a certain fixed duration could make the human organism free from decay and death; and propounded the view that "Liberation" is nothing but the attainment of an immortal and non-decaying body through the use of purified mercury. This gave rise to what is known as Raseśvara Darśana.

And there are four monistic Systems of the Śaivaism. One was founded by Nandikeśvara, the teacher of great gra-

mmarian Pāṇini (4th Century B. C.) and is known as Nandikeśvara Śaivaism. It is a Voluntaristic system and compares well with the German Voluntarism propounded by Schopenhauer.

KASHMIR, THE LAND OF INDIAN PHILOSOPHERS

The other three systems developed in Kashmir, which is now being claimed by the Pakistani military junta to be its own, because the majority of the population there is Muslim, conveniently ignoring the historical fact that this majority is due to nothing but the forceful conversion of the Hindus. That Kashmir was the land of the Indian Philosophers is an historical fact which is admitted by impartial Western thinkers also. For instance, Professor Staal in the course of his review of the Second Edition of my 'Abhinavagupta', published in the Netherlands journal of Philosophy and Psychology (March 1964) said :—"Abhinavagupta was not an isolated figure : he constituted a centre of traditions in the series of thinkers, scholars, poets and artists, who are typical for the glorious past of Kashmir—a nation which to the average Western reader is mainly known as an apple of discord between Pākistān and India." These three Kashmirian systems are known as the Krama, the Kula and the Pratyabhijñā.

Śaivaism influenced all the systems which arose on Indian soil. Buddha before founding his own system must have followed some. Though there is no evidence to show that the system that he followed was Śaivaism, yet he knew it. For, in one of his sermons he refers to it as "Śiva Vijjā" which has been interpreted by his commentator, Buddhaghoṣa (5th century A. D.) as Bhūtevidyā. In any case, the Tantric aspect of Buddhism is admitted to be due to the influanca of the Śaivāgamas. Gautama and Kaṇāda, the founders of the Nyāya and the Vaiśeṣika systems respectively, were Śaivas,

as is clear from references to them in the two Ṣaḍdarśana Samuccayas, one by Haribhadra Sūri and the other by Rāja-śekhara.

Bâdarâyaṇa (4th Century B. C.) in his Vedānta Sūtra has criticised the Pāśupata system and there is implied reference to the twenty-three dependent categories from Mahān to earth, subsumed under the primary category "effect" (Kārya). The Sāṅkhya Darśana may, therefore, be said to have borrowed them from the Pāśupata Darśana. The Yoga system, founded by Patañjali, is simply an improvement on the six aspects of Yoga, admitted by the Śaiva, insofar as it adds two more to them. And following the Śaivas it admits the ultimate Reality to be self-conscious and thus differs from the monistic Vedānta, which holds the Ultimate Principle to be devoid of self-consciousness and, therefore, to be insentient. The monism of Śaṅkara, in its essentials is in harmony with that of the Śaiva. For, not only does he admit the authority of the sixty-four monistic Śaivāgamas in his Dakṣiṇāmūrti Stotra but also declares Māyā to be the power of the Brahman in statements like "Sarvajñasyeśvarasya Māyā Śaktiḥ" (S. Bh. 382)

COMMON TECHNICAL EXPRESSIONS IN ŚAIVAISM AND VEDĀNTA

But the exponents of the monistic Śaivaism very frequently use the same technical expressions as those used by the monistic Vedāntin, such as Avidyā. Ajñāna, Māyā, Sat, Cit, Ānanda. Therefore, an ordinary reader of the texts on Śaivaism falls into the error of thinking that Kashmir Śaivaism is only the Vedānta in disguise. Therefore, in order to remove this misapprehension it is necessary to clarify the meanings of these expressions in the context of the Kashmir Śaiva philosophical literature.

For the present I shall take up only two expressions Jñāna and Ajñāna or knowledge and ignorance. They are mutually contradictory terms. The one is the negation of the other. They are opposed to each other like light and darkness. The one is the essential nature of the Self but the other is that of the not-self. The one is the consciousness (cit) ; the other is the unconsciousness (Acit). The one is of the nature of light and, therefore, self-luminous; the other is of that of darkness. The one is the Brahman; the other is the Māyā. The one is true; the other is false. In fact the Vedāntins use the words Māyā, Avidyā and Ajñāna as synonymous.

ŚAIVA'S CRITICISM OF THE VEDĀNTA

To admit the essential difference between the sentient and the insentient, between sentiency and insentiency and, therefore, between the Brahman and the Māyā is to fall into the position of the dualist, a position that makes it difficult to explain even the phenomenon of knowledge and, therefore, the practical life of humanity that entirely depends on it. That is as follows:—

In imagination and remembrance the objects that shine in them have no being external to or outside the remembering or imagining subject and are essentially of the nature of thought or consciousness. This is an incontrovertible point. But in regard to the objects of perception the realists and idealists differ. While the former hold them to be essentially different from the cognising conscious principle, the latter admit them also to be essentially of the nature of consciousness, thought or mind. For, if the self and the not-self are sharply separated from one another; if consciousness or knowledge is but the result of the causal action of the not-self on the self, as the dualistic systems like the Nyāya and the Vaiśeṣika in India and systems of Locke, Descartes, Hume and Kant in the West hold, then all the contents of consciousness or knowledge are

purely subjective states of the knowing individual. On such a hypothesis the events of the world of not-self cannot form a part of the knowledge that belongs to the self. And if knowledge reproduces reality, it can contain only the effects of the causal action of the real objects; can contain only copies of the external things and not the things themselves.

When we divide the subject from the object, the question of bridging the gulf, that divides the subject from the object, becomes difficult. It was because of this that the subjectivist Bauddhas were compelled to hold that there is no external object and that object is the creation of the subject itself.

But such a position will mean that every individual lives exclusively in a world of his own creation, that there is no world of common experience, that the wakeful life is in no way different from that of dream; and therefore, would make the co-operation among different individuals in a work like lifting a heavy piece of log impossible.

And if we accept the view of the realists and hold that the object is reflected in the consciousness or is represented by a sketch or an outline, or produces sensations, as the sensationalist psychology says, it becomes impossible for us to be certain that the object of experience is as we perceive it. For, so long as we admit that the mind and the matter are external to each other, that the mind can know only that which is in it and is self-confined; we can never be sure that the reflection of the external object or the sensations caused by it, correctly represent it. We cannot compare the thought with the thing, since the latter is external to thought. For comparison both the terms should be given. But, according to the realists, only one of the terms can be given.

Such a difficulty arises in the case of the Vedantin's assumption of the Māyā which is insentient (jaḍa), not-self, and is the material cause of the objective world. For, such an

admission means that the objects of experience are essentially of the nature of not-consciousness. How can not-consciousness change into consciousness? For, the essential nature of a thing does not change. But if it changes, it is not the essential.

Therefore, in contrast to the Ultimate principle that is not self-conscious, (jaḍabrahmavāda) as maintained by the Vedāntin, the Kashmir-Śaivaism holds the Ultimate Reality to be free (Svatantra). It manifests all from itself, in itself and by itself. All that constitutes the world of experience, whether unity or diversity or unity in diversity; whether subjective or objective or relation between them; is the manifestation of the Universal Mind. exactly as all that figures in dream is that of the individual and, therefore, is essentially of the nature of idea.

Further, the objects of the world, though essentially nothing more than the ideas of the Universal Mind, are not mere illusions as according to the Vedānta: on the contrary, they are real and have objective validity, separate existence from and practical utility to the ordinary limited individual subjects much as do the creations of a man who on account of the continuous Yogic practice has acquired the power of creating all kinds of things at will independently of any material cause.

It asserts that the things, which are nothing more than the ideas of the Universal Mind, have their being as separate from the individual mind and that both the subject and the object of knowledge have their being on the common basis of the Universal Mind. Thus, it reconciles the opposition between realism and idealism and, therefore is called Realistic Idealism.

These points need elaboration. But the space does not permit me to do it here. The reader interested in the subject can find further information on them in English in the

Second Edition of Abhinavagupta: An Historical and Philosophical Study and the Third Volume of the Bhāskarī, which contains an English translation of the Īśvara Pratyabhijñā Vimarśinī, the most authoritative work on Kashmir Śaivaism.

Here I feel in duty bound to acknowledge my deep endebtedness to the University Grants Commission for extending the helping hand to me to enable me to continue my research and to publish my works, such as the present, according to the plan; to Sri Kuver Nath Shukla, who as a Vice-Chancellor of the Sanskrit University, Varanasi, invited me to deliver three lectures on the Śaiva Philosophy in Dr. Ganganath Jha lecture series, included here; to Sri S.N.M. Tripathi, the present Vice-Chancellor of the same University, for inviting me to preside over the Tantra Darśana Sammelana and thus giving me an opportunity to deal with the Krama system of Śaivaism in my presidential address; and to the courteous officers working under him for their full co-operation in seeing this work through the press.

Kanti Chandra Pandey

Fyzabad Road
Babuganj Crossing
Lucknow
11-11-1965

प्रास्ताविकम्

शैवमतमैतिहासिकदृष्ट्या दार्शनिकदृष्ट्या चातीव महत्त्वपूर्णम्। इदं प्राचीनतमम्, अष्टसहस्रवर्षपूर्वं प्रचालिताद् ज़रोष्टरमतादपीदं प्राचीनतरम्। ज़रोष्टरकालविषये न तथाविधमैतिहासिकं प्रमाणमुपलभ्यते यथा शैवमतसत्ताविषये हरप्पा-मोहेजोदारो-स्थानयोरुपलब्धेषु प्रागैतिहासिकवस्तुषु शिवलिङ्गादिकम्। वेदवर्णितयुद्धप्रामाण्यमाश्रित्य स्वीक्रियते चैतिहासिकैरिदं यद् यायावराणामार्याणां भारतागमनसमये शैवमताश्रिता भारतीया संस्कृतिरिह सुप्रतिष्ठिताऽऽसीत्, तदानीन्तनानां भारतवासिनां चार्यैः सह युद्धान्यप्यभूवन्निति।

अस्यां संस्कृतौ वास्तुकला, मूर्तिकला, भाण्डकला, लेखनकला, चित्रकला, युद्धकला तथा अन्या बहुविधाः कलाः सुविकसिता आसन्। यथा स्पष्टीभवति दुर्गाणां शिवमन्दिरस्य विभिन्नप्रकाराणां मूर्तीनां लिखितचित्रलिपीनां भाण्डानामुपलब्धैर्भग्नावशेषैः। एवंविधा संस्कृतिः स्वविकासार्थं महान्तं कालमपेक्षते। अतः पाश्चात्त्यैर्भारतीयैश्चैकमत्येन निर्धारितात् समयाद् बहुकालपूर्वमस्याः सत्ताऽऽसीदिति मन्तव्यमेव। एवञ्च नात्र काचन सन्देहकणिकापि यदियं संस्कृतिः प्राचीनतमा तथैव च तदङ्गभूतं शैवमतम्।

शैवमतं नावैदिकम्

इदञ्च मतं नावैदिकम्; वेदेष्वपि तत्र तत्र 'त्र्यम्बक'-'शिव'-आदिनाम्नां तद्विषयिकाणामृचां चोपलम्भात्, वैदिकमतप्रतिष्ठापकमूर्धन्यानामद्वैतवेदान्तव्याख्यातृप्रधानानां श्रीमतां शङ्कराचार्याणां शैवमतावलम्बित्वस्वीकारात्, तैः स्वयमेव स्वीयदशश्लोक्यां 'शिवः केवलोऽहम्" इति नववारं कथनाच्च। ईशषोडश-शतकभव-मधुसूदनसरस्वतीकृतायाः सिद्धान्तबिन्दुनाम्न्याष्टीकायाः समुपलम्भान्नात्र सन्देहकणिकाऽपि यद्दशश्लोकी शङ्कराचार्यकृतिः।

यद्यपि शैवाः शैवागमानां प्रामाण्यं तेषां चानादित्वं तथैव स्वीकुर्वन्ति यथा वेदानुयायिनो वेदानाम्, तथापि यत्र तत्र वेदवाक्यान्यपि प्रमाणत्वेनोद्धरन्ति व्याचक्षते च तानि स्वदर्शनदिशा। यथा—"विज्ञातारमरे केन विजानीयात्" बृ० २।५।१६, भा० भा० १-७२। एवञ्च "तमेव भान्तमनुभाति सर्वम्" (भा० भा० १-३४८) इत्यादि। व्याख्याविषये तु पारस्परिको मतभेदः सुप्रथितानां वैदिकदार्शनिकानामपि। एवं वेदोपनिषत्पुराणादिद्वारा शैवमतं प्रससार।

श्रीमद्भिर्भगवच्छङ्करपादैः स्वाद्वैतवेदान्तप्रचारार्थं महान्तो यत्नाः कृताः। दिग्विजये प्रतिष्ठिता दार्शनिकप्रतिपक्षिणः पराजिताः। तेषु तेषु विशिष्टस्थानेषु शाङ्करमठाः स्थापिताः। तेषु च धुरन्धराः समधीतनिखिलशास्त्राः प्रतिभावन्तः शिष्याः स्वीयाद्वैतवेदान्तं व्याख्यातुं तत्परम्परां परिरक्षितुं च मठाधीशपदे नियुक्ताः। मठाधीशैश्च तन्मतप्रचारणपरैर्न केवलं समुपस्थितेभ्यः शुश्रूषुभ्यः व्याख्यानानि दत्वा यावद्विशिष्टान् निबन्धान् विरच्याद्वैतवेदान्तस्य सर्वदर्शनमूर्धन्यत्वं स्थापितम्। यथा माधवाचार्यैरीश-त्रयोदशशततमे श्रृङ्गेरीमठमलङ्कुर्वद्भिः सर्वदर्शनसंग्रहे। अतोऽद्वैतवेदान्तस्य तत्कालात्प्रभृति अद्यापि महती प्रतिष्ठा समीचीनश्च प्रचारो वर्तते।

अद्वैतशैवदर्शनप्रतिपादयितारः सोमानन्दोत्पलाचार्याऽभिनवगुप्ताद्यास्तु नैवंविधं कमपि पयत्नं चक्रुः। ते स्वमतं रहस्यं परिरक्षुः। विशिष्टेभ्य एव पात्रेभ्यः स्वसंप्रदायशिक्षां दद्युः। अतोऽद्वैतशैवदर्शनस्य न तावान् सार्वजनिकः प्रचारो यावानद्वैतवेदान्तस्य। तथाऽपि रहस्यरूपेणास्य प्रचारो न केवलं विभिन्नभारतीयप्रदेशेषु, कामरूप-कान्यकुब्ज-कश्मीर-दक्षिणप्रदेश-मध्यभारत-गुर्जरप्रदेश-काश्यादिषु, यावद् भारताद्बहिश्चीन-कम्बोजादिदेशेष्वप्यासीत्।

द्वैताश्रितधर्मरूपेण तु शैवमतस्य यावान् प्रचारस्तावान् नान्यस्य कस्यापि, यथा प्रत्यक्षं न केवलं सोमनाथ-महाकाल-विश्वेश्वर-मल्लिकार्जुन-ओंकार-केदार-भीमशङ्कर-त्र्यम्बक-वैद्यनाथ-नागेश्वर-रामेश्वर-घृणेश्वरनामभिस्तत्रतत्र सुप्रतिष्ठितैर्ज्योतिर्लिङ्गैर्यावत् प्रतिनगरं प्रतिग्राममुपलब्धैरसंख्यैः शिवमन्दिरैः।

इह व्याख्यातानि दश शैवदर्शनानि

यद्यपि बहूनि शैवमतानि कालमुख-कापालिक-कारुणिकादीनि तद्विषयकविपुलसाहित्यस्य लुप्तत्वाद् नाममात्रज्ञातानि सन्ति, तथापीह स्वपरिशीलितानि दश शैवदर्शनानि व्याख्यायन्ते। एषु द्वैतप्रतिपादनपरं पाशुपत-शैवनामकं दर्शनद्वयम्। अनयोर्द्वितीयं सिद्धान्तशैवनाम्ना दक्षिणभारते प्रसिद्धम्। द्वैताद्वैतसमर्थकं लकुलीशपाशुपतम्, श्रीकण्ठप्रतिपादितं विशिष्टाद्वैतम्, वसवेन स्थापितं पुनरुत्थापितं वा श्रीपतिपण्डितेन श्रीकरभाष्ये व्याख्यातं शुद्धद्वैताद्वैत-सेश्वराद्वैत-शिवाद्वैत-विशेषाद्वैतापराभिधं वीरशैवमतम्, शोधितपारदोपयोगेनाजरामरदेहप्राप्तिरूपापरोक्ष-मोक्षसमर्थकं रसेश्वरदर्शनम्, चत्वारि चाद्वैतशैवदर्शनानि, तेषु पाणिनिगुरु-नन्दिकेश्वरप्रतिपादित-मेकम्, काश्मीरिकैः प्रतिपादितानि प्रत्यभिज्ञा-क्रम-कुलेति नामभिः प्रसिद्धानि च त्रीणि।

शैवदर्शनानां वैदिकदर्शनेषु प्रभावः

षड्वैदिकदर्शनेषु न्यायवैशेषिकदर्शनयोः संस्थापकौ गौतमकणादौ शैवावास्तामिति हरिभद्रसूरिराजशेखर-कृत्योः षड्दर्शनसमुच्चययोः स्पष्टम्। ईशापूर्वचतुर्थशतकभवेन वादरायणेन पाशुपतदर्शनं समालोचितम्। तत्र प्रधानमुपादानकारणं महत आरभ्य पृथिव्यन्ताः त्रयोविंशति पदार्थाश्च कार्यान्तर्गताः स्वीकृताः। अतः सांख्यदर्शनस्वरूपदातृषु प्राभावान्तरेष्वभ्युपगम्यमानेष्वप्युपादानकारणरूपः मुख्यः प्रकृतिपदार्थः, तस्य च महदादीनि त्रयोविंशतिः कार्याणि इतीयं सांख्यीया विचारधारा पाशुपतदर्शनप्रभावकृता इति संभाव्यते। पातञ्जलं योगदर्शनं तु शैवप्रतिपादितस्य षडङ्गयोगस्याङ्गद्वयमन्यत् संयोज्य परिवर्धनमात्रम्, परतत्त्वं च सविमर्शम्, स्वबोधमात्रमित्यभ्युपगत्या शैवमतं स्वीकुर्वत् स्वपरामर्शरहितं बोधमात्रं परं तत्त्वमिति वेदान्तिमतात् स्वभेदं समुद्घोषयति। शाङ्करमद्वैतवेदान्तदर्शनं नाद्वैतशैवविरोधि। शङ्करो हि स्वयमद्वैतप्रतिपादनपरांश्चतुःषष्टितन्त्रान् प्रामाणिकान् मन्वानः "सर्वज्ञस्येश्वरस्य माया शक्तिः" (शां० भा० ३८२) इति च वदन् मौलिकं 'माया ईश्वरशक्तिः' इति शैवसिद्धान्तं स्वीकरोति। एवं प्राख्यातवैदिकदर्शनेषु शैवदर्शनप्रभावः सुस्पष्टः।

शैववेदान्तदर्शनयोर्मौलिका भेदाः

अद्वैतशैवैः अविद्या-अज्ञान-माया-सत्-चित्-आनन्दादिशब्दाः अद्वैतवेदान्तसाधारणाः प्रयुज्यन्ते। अतः स्थूलदृष्ट्या त्वरया चाध्येतृणामयं भ्रमः संजायते यदद्वैतशैवदर्शनमद्वैतवेदान्तस्यैव रूपान्तरम्। अतोऽद्वैतशैवदर्शने पाठकानां प्रवेशं सुगमीकर्तुमेषां शब्दानां दर्शनद्वये सैद्धान्तिकोऽर्थभेदः स्पष्टीकार्यः। इह तु ज्ञानाज्ञानशब्दावेव तदर्थमुदीयेते।

ज्ञानाज्ञानयोस्तमःप्रकाशयोरिव पारस्परिको विरोधः। ज्ञानम्—आत्मरूपम्, अज्ञानं त्वनात्मरूपम्; ज्ञानं चिद्रूपम्, अज्ञानं त्वचिद्रूपम्; पूर्वं प्रकाशरूपम्; अपरं त्वप्रकाशरूपम्; पूर्वं चेतनम्, अपरं जडम्; मायाऽविद्या, अनिर्वाच्यमनृतं तत्त्वज्ञाननिवर्त्यं चाज्ञानम्। (सि० विं० १६७) । माया अविद्या अज्ञानमित्यनर्थान्तरम् (वे० सा० टी० १६२) । इत्थं वेदान्तिनये चित्त्वं प्रकाशत्वम्, अचित्त्वं चाप्रकाशत्वम्। एवं चाचिद्रूपोऽर्थोऽप्रकाशस्वरूपः, तस्याज्ञानस्वरूपमायाजन्यत्वात्। यथाहुः—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम्।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥ इति।

(वे० सा० १६४)

अत्र शैव एवं प्रत्यवतिष्ठते—

इदं नीलमितीहापि नामरूपे प्रथात्मके।
न हेये अनयोर्हेया त्वहंभावाऽप्रथैव सा॥ इति।

(ई० प्र० वि० वि०, भागः ३, १५५)

तथाहि-- यदि चिदचितौ परस्परतो भिन्नसत्ताकौ भिन्नौ पदार्थौ, यद्यर्थोऽप्रकाशरूपः, तर्हि सर्वव्यवहाराधारभूतं प्रत्यक्षज्ञानमपि न संभवति; तथा च सर्वव्यवहारलोपाद् जनस्थितिनाश-प्रसङ्गः। स चेत्थम्—स्मरणविकल्पयोस्तावद् नार्थः सर्वप्रमातृसाधारणः स्मर्तुर्विकल्पयितुर्वा भेदेन बाह्यतया भाति। यत्रापि तथा भाति, यथा प्रत्यक्षरूपेऽनुभवे, तत्राप्यनुभवादव्यतिरेकी प्रकाशरूपानुभवस्वरूप एव, न तु ततो भिन्नोऽप्रकाशरूपः। प्रकाशरूपाणामपि भावानां यदिदं शून्य-धी-प्राण-बुद्धि-तादात्म्यापन्नत्वात् परिच्छिन्नेभ्यो मितप्रमातृभ्यो भेदेन इदन्तया भानम्, तदपि तेषां भावानां शुद्धचिदात्मकपरमार्थप्रमातृतत्त्वतादात्म्यमनुज्झतां शुद्धप्रमात्रन्तःस्थितवतामेव युज्यते, नान्यथा।

शैवानामभ्युपगमाः

(१) स्वतन्त्रे परप्रमातरि सृष्टिपूर्वभाविन्यां दशायां सर्वे भावाः शक्तिरूपतया तत्ता-दात्म्येन तथैव वर्तन्ते यथा ते पदार्था ये स्वप्ने भान्ति स्वप्नदर्शनात् प्राग् वासनारूपतया स्वप्नद्रष्टृतादात्म्येनावतिष्ठन्ते। सृष्टौ च ते तथैव परप्रमातुरन्तर्भान्ति यथा स्वप्नद्रष्टुरन्तः स्वाप्नाः पदार्थाः। तथा च यथा स्वाप्नानां पदार्थानां स्वप्नदर्शनात् प्राक्, एवं च स्वप्नदर्शनसमये परिमितप्रमातृप्रकाशरूपत्वं प्रकाशाभिन्नत्वम्, तथा सर्वेषां भावानां सृष्टेः प्राक् सृष्टौ च परप्रमातृ-प्रकाशरूपत्वम्। परप्रमातृपरिमितप्रमात्रोर्भेद इयानेव यदपरस्मिन् स्वाप्नाः पदार्थाः पूर्वानुभव-संस्काररूपेण तिष्ठन्ति, पूर्वस्मिंस्तु स्वातन्त्र्यशक्तिरूपेण।

परन्तु स्वाप्नाः पदार्थाः स्वप्नद्रष्टारं प्रत्येव भान्ति, सृष्टजगद्भवा भावास्तु विभिन्नप्रमातृ-साधारणतया। अतो भावानां सर्वसाधारणं प्रमेयत्वं समर्थयितुं स्वप्नदृष्टान्तं परित्यज्य उपादान-कारणनिरपेक्षयोगिसृष्टिदृष्टान्तमुपस्थापयत्युत्पलाचार्यः स्वीयायामीश्वरप्रत्यभिज्ञाकारिकायाम्। यथाह :—

चिदात्मैव हि देवोऽन्तःस्थितमिच्छावशाद्बहिः।
योगीव निरुपादानमर्थजातं प्रकाशयेत्॥ इति॥

(भा० भा० १, २२६)

(२) परप्रमातृपरिमितप्रमात्रोस्तात्त्विकमैक्यम् । परिमितप्रमातॄणां परप्रमातुरेकस्मादपरस्य परिमितप्रमातुर्भेदश्च आणव-कार्म-मायीयाभिधमलत्रयावृतत्वात् शून्य-धी-प्राण-बुद्धि-देहादिभिः स्वेषां पार्थक्येन तादात्म्यीकरणाच्च ।

(३) वर्तमानत्वेन इदमित्याकारेण स्फुटतया अवभासमानानां प्रत्यक्षतया परिदृश्यमानानां भावानां परिमितप्रमातुर्भिन्नतया पृथग्भावेन बाह्यत्वेन भासनं महाप्रकाशरूपस्वतन्त्रपरमार्थप्रमातर्यन्तःस्थितवतां तेन सह प्रकाशरूपतारूपमैक्यमनुज्झितवतामेव युक्तियुक्तम्, न विज्ञानरूपाणाम् अत एव प्रकाशरूपाणां स्वात्ममात्रनिष्ठानाम्, अत एव च सर्वसाधारणैकाधाररहितानाम्, यथा विज्ञानवादिनये, नाप्यप्रकाशरूपनामरूपात्मनाम्, यथाऽद्वैतवेदान्तिनये ।

प्रकाशाद् न भिन्नोऽर्थः प्रकाशमानो युक्तः, प्रकाशमानाच्च अर्थाद् न भिन्नः प्रकाशो युक्त इति उभयतो मुखोऽभेदो युक्तियुक्त इत्यद्वयवादिनां शैवानां सिद्धान्तः । तत्र चोपपत्तय इमाः—

प्रत्यक्षविषये मतत्रयम्

प्रत्यक्षीक्रियमाणार्थविषये प्रधानं मतत्रयम्—(१) अर्थो विज्ञानस्वरूपः प्रकाशस्वरूपः यथा विज्ञानवादिनये । (२) अर्थो जडःअप्रकाशस्वरूपः । आत्ममनःसंयुक्तेनेन्द्रियेणाप्रकाशरूपस्यार्थस्य सन्निकर्ष आत्मनि ज्ञानं जनयति । तच्चात्मनो गुणः । एवं च घटस्य सविकल्पप्रत्यक्षक्षणे घट इत्याकारकं घटत्वविशिष्टं गुणरूपं ज्ञानमात्मन्युत्पद्यत इति न्यायवैशेषिकविदः (मु० प्र० श्लो० ५८) । (३) वेदान्तिनये विषयचैतन्ययोरवच्छेद्यावच्छेदकसंबन्धं स्वीकृत्य घटाद्यवच्छिन्नं चैतन्यं विषयचैतन्यं घटादिः पदार्थः; अन्तःकरणावच्छिन्नं चैतन्यं प्रमाता; अन्तकरणवृत्त्यवच्छिन्नं प्रमाणम् (वे० प०, २२) । अन्तःकरणं च तैजसम्, ततश्च यथा तडागोदकं छिद्रान्निर्गत्य कुल्यात्मना केदारान् प्रविश्य तद्वदेव चतुष्कोणाद्याकारं भवति, तथा तैजसमन्तःकरणमपि चक्षुरादिद्वारा निर्गत्य घटादिविषयदेशं गत्वा घटादिविषयाकारेण परिणमते । स एव परिणामो वृत्तिरित्युच्यते । तथा च अयं घट इत्यादिप्रत्यक्षस्थले घटादेस्तदाकारवृत्तेश्च बहिरेकत्र देशे सहावस्थानाद् घटावच्छिन्नचैतन्यं वृत्त्यवच्छिन्नं चैतन्यं चैकमेव । अवच्छेदकयोः पारस्परिकभेदजनकयोरन्तःकरणवृत्तिघटादिविषययोरेकदेशस्थत्वेन भेदाजनकत्वात् । अनयोर्मठान्तर्वर्तिघटावच्छिन्नाकाशस्य मठावच्छिन्नाकाशादिव पारस्परिकभेदाभावात् । तथा च "अयं घटः" इति प्रत्यक्षस्थले घटाकारवृत्तेर्घटसंयोगितया घटावच्छिन्न-

चैतन्यस्य घटवृत्त्यवच्छिन्नचैतन्यस्य चाभिन्नतया घटज्ञानस्य घटांशे प्रत्यक्षत्वम्। इदं ज्ञानगत-प्रत्यक्षस्य स्वरूपम्।

विषयगतप्रत्यक्षत्वं तु घटादेर्विषयस्य प्रमात्रभिन्नत्वम्। प्रत्यक्षं हि द्विधा व्यपदिश्यते— 'अयं घटः' इति 'अहं घटं पश्यामि' इति च। पूर्वं ज्ञानगतप्रत्यक्षस्थले, अपरं विषयगत-प्रत्यक्षस्थले। ननु 'अहं घटं पश्यामि' इत्यत्र घटस्य अहमो भिन्नतया भानाद् विषयस्य प्रमात्र-भिन्नत्वकथनमनुभवविरुद्धमिति चेत्, उच्यते। प्रतिपक्षिणोऽयमाशयः—विषयस्य प्रमात्रभिन्नत्व-कथने किमभिप्रेतम्? विषयस्य जडस्य घटादेः प्रमात्रभिन्नत्वम् आहोस्विद्, घटावच्छिन्नचैतन्यस्य प्रमात्रभिन्नत्वम्? नाद्यः, जडस्य विषयस्य प्रमात्रभेदासंभवात्; नान्त्यः, घटावच्छिन्नचैतन्यस्या-न्तःकरणावच्छिन्नचैतन्येनाभेदे स्वीकृते 'अहं घटः' इति 'अहं मनुष्यः' इति वा प्रतीतिः स्यात्, न तु 'अहं घटं पश्यामि' इति, विषयप्रमात्रोर्भेदस्य विगलनात्। अस्मिन् पूर्वपक्षे स्थिते समाधातुरिदमुत्तरम्। विषयस्य प्रमात्रा अभेद इति कथने नायमभिप्रायो यद् विषय-प्रमात्रोर्भेदः सर्वथा विगलति, येन 'अहं घटः' इति "अहं मनुष्यः' इति वा प्रतीतिः स्यात्; अपि तु विषयस्य प्रमातृसत्तातिरिक्तसत्ताकत्वाभावः। इदमेवं विषदीकर्तुं शक्यते —

वेदान्तिनये विषयः स्वावच्छिन्नचैतन्ये अध्यस्तः, अतस्तस्य पुरोवर्तिन्यां शुक्तिकाया-मध्यस्तस्य रजतस्य शुक्तिभिन्नसत्ताया अभाववदध्यस्तस्य विषयस्य स्वाधिष्ठानभूतचैतन्याद् भिन्ना सत्ता नास्ति। प्रत्यक्षस्थले विषयं प्रति प्रसृतस्यान्तःकरणावच्छिन्नतचैन्यस्य तदेवाधिष्ठानं यद् विषयस्य। एवञ्चाधिष्ठानातिरिक्ताया आरोपितसत्ताया अस्वीकरणाद् यैव सत्ता प्रमातुः सैव सत्ता विषयस्यापि। तया च विषयस्य प्रमातृसत्ताभिन्नसत्ताकत्वाभावः।

एवं विषयस्य प्रमातृसत्ताभिन्नसत्ताकत्वाभावे विवृतेऽप्यसन्तुष्टः प्रतिपक्षी शङ्कते—

ननु जडाः सर्वे पदार्था अज्ञानावृता इति न प्रकाशन्ते; तद्गोचरवृत्त्या आवरणनाशे ते प्रकाशन्ते, परं वृत्तेरपि जडान्तःकरणरूपत्वात् तत्प्रकाशनार्थं वृत्त्यन्तरमपेक्षितम्। न च वृत्तेर्वृत्त्यन्तरगोचरत्वमभ्युपगम्यते, अनवस्थापातात्। तथा च प्रत्यक्षज्ञानार्थमपेक्षितं विषयस्य भानं नैव सिध्यति। इममाक्षेपं सिद्धान्ती एवं निरस्यति—यद्यपि ब्रह्मातिरिक्तं सर्वं जडम्, तथापि प्रत्यक्षतोऽनुभूयमानवैलक्षण्याश्रयणेन वृत्तेः स्वभावविशेषः स्वीकार्य एव। एवं च यथा प्रदीपं घटादिकं प्रकाशयत् प्रकाशान्तरनिरपेक्षं स्वात्मानमपि प्रकाशयति, तथैव वृत्तिरपि यदर्थं सा जाता तं प्रकाशयन्ती वृत्त्यन्तरं विनैव स्वात्मानमपि प्रकाशयति। एवं च प्रमातृसत्ताभिन्न-सत्ताऽभाववतो विषयस्य प्रमात्रुपाधितया भानं प्रत्यक्षत्वमिति निष्कर्षः।

प्रत्यक्षविषयकमतत्रयसमालोचनम्

(१) अर्थो विज्ञानरूपः प्रकाशरूप इति मतं न युक्तियुक्तम्। प्रकाशरूपमर्थं मन्वानमद्वैतशैवः पृच्छति—अर्थः प्रकाशरूप इत्यस्य कोऽर्थः ? किं घटादेरर्थस्य कम्बुग्रीवादि-रूपतैव प्रकाशरूपता ? सा च तथैव स्वप्रकाशा यथा आत्मा; ओमिति चेत्; प्रकाशरूपो घट आत्मवत् सर्वान् प्रति भायात्। एवमेव सर्वाण्यपराण्यपि वस्तूनि सर्वान् प्रति भायासुरिति सर्वः सर्वज्ञः स्यात्। अस्यामापत्तौ प्रदर्श्यमानायां यदि प्रतिपक्षी एवं ब्रूयात्—'स्वप्रकाशोऽप्यर्थः स्वस्मिन्नेव प्रकाशते, न परं प्रति' इति। एवं चेत्तर्हि स कमपि प्रति न भायादिति सर्वोऽपि जनोऽज्ञ एव स्यात्, तथा च जगत्यान्ध्यस्यैव साम्राज्यं स्यात्। अथ च पदार्थविषये केनापि 'इदं नीलम्' 'इदं पीतम्' इत्यादि किमपि वक्तुं नैव शक्येत, प्रमातृप्रकाशं विनैवं वक्तुमशक्यत्वात्, पदार्थस्य च स्वमात्रनिष्ठतया प्रमातृसंबन्धाभावेन 'नीलम्' 'पीतम्' इत्यादिव्यवस्थायाः करणस्यासंभवात्।

यदि क्षणिकवादी बौद्ध एवं कथयेद् यत् प्रत्यक्षक्षणात् पूर्वं पदार्थस्य न तादृग् वैशिष्ट्यं यादृक् प्रत्यक्षक्षणे, यतः प्रत्यक्षसमये तस्येन्द्रियालोकादिभिर्वैशिष्ट्यं जायते; तथा च तस्य ग्रहणयोग्यता भवति। एवमपि पूर्वोक्त एव दोषः सर्वान् प्रति भानरूपः समापतति, कञ्चन प्रति भाने कस्याऽपि नियामकस्याभावात्।

मीमांसकाभ्युपगतप्रकटतावादेऽप्ययमेव दोषः। द्वैतवादिनः कौमारिला ह्येवं प्राहुः—

"ज्ञानं नाम क्रिया, सा च फलानुमेया। फलं च प्रकटताख्यं विषयधर्मः, सैव च वेद्यता" इति। अत्रायमाक्षेपः—यदि प्रकटताख्यो धर्मो नीलादिधर्मवत् सर्वथा अर्थशरीरविश्रान्तस्तर्हि "मम इदं भाति" इति प्रमातृसम्बन्धस्तस्य नैवोपपद्यते, द्वैतनयेऽर्थस्य प्रमातुर्भिन्नत्वात् तयोरन्तराले विद्यमानस्य तयोर्विभाजकस्य समुद्रस्योपरि सेतुबन्धकरणस्याशक्यत्वात्। यथाहु-र्विद्वन्मूर्धन्या डाक्टर-सर्वपल्लीराधाकृष्णन्-महोदयाः स्वीय 'इण्डियन् फिलासफी'नाम्नि सुप्रसिद्धे ग्रन्थे—

"When we divide the subject from the object the question of building the bridge from the one to the other becomes difficult."

(इन्० फिल्० पृ० १३५)

यदि चेदर्थस्तस्मिन् प्रकटताख्यधर्मोत्पत्त्यनन्तरमात्मवत् स्वप्रकाशो जायत इत्यभ्युपगम्यते तर्हि तस्य सर्वान् प्रति प्रमाणव्यापारं विनैव भानप्रसङ्गः। प्रमातुरर्थगतप्रकटतां प्रति कारणत्वात् प्रमातुरर्थगतप्रकटतायाश्च कार्यकारणसम्बन्धादयं कार्यकारणसम्बन्ध एव कारणभूतं प्रमातारं प्रत्येवार्थस्य भाने नियामक इति चेन्न। कार्यकारणसम्बन्धस्यैवंविधभाने नियामकत्वस्यान्याय्यत्वात्। न हि कुम्भकृता जनितो घटस्तं प्रत्येव भाति।

(२) येऽपि द्वैतिनो न्यायवैशेषिकाद्यनुसारिणस्तेषामपि मते प्रत्यक्षं नोपपद्यते। अयं हि तेषामभ्युपगमः—मन-इन्द्रियद्वारा विषयेण संयुक्ते आत्मनि विविधैः सन्निकर्षैर्विभिन्ना ज्ञानशब्दवाच्या गुणा जन्यन्ते। ज्ञानविषययोस्तात्त्विको भेदः, न च तयोरेकः कश्चन आधारः, नाऽपि मीमांसकनये इव विषये प्रकटता जन्यते, वेदान्तिनय इव वा अन्तःकरणावच्छिन्ना चिद् विषयमिन्द्रियप्रणालिकया गच्छति। त इदं प्रष्टव्याः :—

यद्यर्थात्मानौ परस्परतोऽत्यर्थं भिन्नौ, यदि ज्ञानमिन्द्रियार्थसन्निकर्षद्वारा अर्थस्य कार्यम्, एवं च यदि ज्ञानमात्मनो गुणस्तर्हि अर्थकार्यरूपे आत्मनश्च गुणरूपे ज्ञाने न संभवत्यर्थस्य समावेशः। ततश्च यदीदमभ्युपगम्यते यदिन्द्रियार्थसन्निकर्षजन्यं ज्ञानमर्थाकारकमर्थप्रतिकृतिरूपम्, इयञ्च प्रतिकृतिरर्थजन्य आत्मनि संवेदनारूपः कश्चन अर्थजनितः प्रभावोऽर्थप्रतिबिम्बं वा। एवमप्यर्थस्य बहिष्ट्वाद् ज्ञानस्य चार्थप्रतिकृतिरूपत्वाद् बाह्यार्थयाथातथ्यज्ञानं कथं सम्भवतीति चिन्त्यम्। प्रतिकृतिर्मूलवस्तुस्वरूपं यथावत् प्रतिकरोतीति ज्ञातुं प्रतिकृतेर्मूलवस्तुना तोलनमावश्यकम्, तदर्थं च मूलवस्तुतत्प्रतिकृत्योः प्रमातृनिष्ठत्वं प्रमात्रन्तर्गतत्वं ज्ञानरूपत्वं चावश्यकम्। प्रतिकृतेरेव ज्ञानरूपत्वात् प्रमातृनिष्ठत्वाद् मूलवस्तुनश्च प्रमातुर्बहिष्ट्वाद् ज्ञप्तिरूपत्वाभावाच्च न सम्भवति तयोस्तोलनजन्यं प्रतिकृतेर्याथार्थ्यज्ञानम्।

(३) अत एव सूक्ष्मदर्शिनो वेदान्तिनः प्रत्यक्षेऽन्तःकरणावच्छिन्नचितो विषयावच्छिन्नचिता अभेद इति सिद्धान्तमुपस्थापयन्ति, यथा विवृतं प्राक्। परन्तु शैवदृश्ययमपि सिद्धान्तो न निर्दोषः। शैवः प्रत्यक्षेऽन्तकरणावच्छिन्नचितो विषयावच्छिन्नचिता अभेदं मन्वानं वेदान्तिनं पृच्छति—किं विषयः प्रकाशस्वभावोऽप्रकाशस्वभावो वा, ज्ञप्तिरूपोऽज्ञप्तिरूपो वा, अनुभवरूपोऽननुभवरूपो वा। विषयः प्रकाशरूप इति तु न शक्यते वेदान्तिना वक्तुम्; विषयस्य सर्वस्यापि जडरूपमायाकार्यत्वात्, अन्तःकरणस्य विषयभासकत्वायोगात् (वे० प० ४७)। तस्य विषयभासकत्वसिद्ध्यर्थं विषयभासकचैतन्यस्यान्तःकरणमुपाधिर्विशेषणं चेति स्वीकारात्, अन्तःकरणवृत्तेरपि जडान्तःकरणधर्मत्वेन जडत्वात् तस्याः प्रत्यक्षप्रमात्वानभ्युपगमात्, तस्याश्च

चैतन्यरूपज्ञानावच्छेदकत्वात् तदर्थं ज्ञानशब्दप्रयोग औपचारिक इति सिद्धान्तात् (वे० प० १६)। 'अहं सुखी' इत्यादिप्रतीतिषु सुखादीनामात्मधर्मत्वप्रतीत्या सुखादीनामन्तःकरणधर्मत्वे दोषे उद्भाविते अयःपिण्डस्य दग्धृत्वाभावेऽपि दग्धृत्वाश्रयवह्नितादात्म्याध्यासात् अयो दहतीति व्यवहारवत् सुखाद्याकारपरिणामिनोऽन्तःकरणस्य चैतन्येनैक्याध्यासाद् तथाविधप्रतीतिं व्याख्यायमानेन वेदान्तिना वस्तुतोऽन्तःकरणजडत्वस्य मन्यमानत्वात् ।

यथान्तःकरणस्य स्वतो जाड्यं तथैव विषयस्यापि । तथा हि—जगदुत्पत्तिसिद्धान्ते वेदान्तिनोऽज्ञानोपहितचैतन्यस्य स्वप्रधानतया जगतो निमित्तकारणत्वं स्वोपाधिप्रधानतया उपादानकारणत्वं कथयन्ति, मन्यन्ते च; यथा अयस्कान्तसन्निधाने जडं लोहं चेष्टते तथा चैतन्यसन्निधाने जडमज्ञानं जडा माया वा चेष्टते । एवं चाकाशादिरूपसकलप्रपञ्चरूपेण माया परिणमते विकरोति वा । अतः (वे० सा० १५) अज्ञानविकारं प्रति चैतन्यस्य निमित्तत्वम् । जडकार्यं प्रति मायायाः साक्षादुपादानत्वमिति कार्यस्योपादानसमधर्मकत्वनियमाद् जडमायोपादानकानां सर्वेषां कार्याणां जडत्वमेव, ईश्वरस्य तूपादानत्वं मायासम्बन्धादौपचारिकमेव । अतो वेदान्तिनये विषयस्य जाड्यम्, अप्रकाशरूपत्वम् अननुभवरूपत्वं चायाति ।

तथापि वेदान्तिनये विषयाणां ब्रह्मणो न पृथक् सत्ता, यथा सांख्यनये प्रकृतिविकाराणां पदार्थानां पुरुषात् पार्थक्येनावस्थानम् । माया न ब्रह्मणः पृथक्सत्ताका, यथा सांख्यानां प्रकृतिः पुरुषात्; माया हि ब्रह्मण उपाधिः । एवं च मायाविकाराणां पदार्थानां न ब्रह्मणः पृथक् स्थितिः, तेषामधिष्ठानं ब्रह्म एव । अधिष्ठिताः पदार्थाः अधिष्ठानभूतस्य ब्रह्मणः शुद्धचिद्रूपतां न भजन्ते, यथा रज्जावारोपितः सर्पो रज्जो रज्जुत्वम् । यथा रज्ज्ववच्छिन्नचैतन्यनिष्ठाज्ञानस्य रज्जुस्वरूपापरित्यागेन सर्पादिरूपान्तरप्रदर्शकत्वम्, तथा ईश्वरचैतन्यनिष्ठाज्ञानस्यापि स्वस्वरूपापरित्यागेन आकाशादिरूपान्तरप्रदर्शकत्वम् । अज्ञानं च मिथ्या, एवं च तज्जन्याकाशादिप्रपञ्चोऽपि । इत्थं च जगदधिष्ठानत्वेनापि ब्रह्मणो जगदुपादानत्वं मन्वते वेदान्तिनः (वे० प० १६२) । एतत्सिद्धान्तानुसारं सर्पस्य रज्जुविवर्तवद् जगद् ब्रह्मविवर्तः ।

विषयस्य मनोवैज्ञानिके विश्लेषणे क्रियमाणे विषयस्य पञ्चांशा वेदान्तिनये—सत्त्वम्, भासमानत्वम्, इष्टत्वम्, नाम, रूपं च । तत्र प्रथमं त्रयं ब्रह्मरूपं विषयस्य सच्चिदानन्दरूपब्रह्मैक्याध्यासात् । अन्त्यं नामरूपद्वयं तु ततोऽन्यथा अविद्यापरिणामात्मकत्वात् । अविद्यात्मकयोर्नामरूपयोरेवं चाप्रकाशरूपयोः प्रकाशः कथमिति प्रश्नस्योत्तरे वेदान्तिनामिदमुत्तरं तौ न

स्वतः प्रकाशेते, परमधिष्ठानभूतप्रकाशस्वरूपचिता भास्येते। यथा अप्रकाशरूपस्यायोगोलकस्य प्रकाशकत्वदग्धृत्वाश्रयवह्न्यनुप्रवेशात् तत्तादात्म्यात् (वे० प० १६) प्रकाशरूपत्वं दग्धृत्वं च तथा अप्रकाशरूपयोरपि स्वाधिष्ठानभूतप्रकाशस्वरूपचित्तादात्म्यात् प्रकाशः। परमिदं तादात्म्यं न तात्विकम्, अपित्वध्यस्तमेव। तथा चायोगोलकविषये प्रकाशते दहति इत्यादिशब्दप्रयोग औपचारिक एव (द० मू० स्तो० १३)। इदं च 'तमेव भान्तमनुभाति सर्वम्' इति श्रुति-प्रमाणकम्।

इत्थञ्चाधिष्ठानगतप्रकाशेन सर्वदा भासमानो विषयः कुतः सर्वदा सर्वस्य प्रत्यक्षं न भवतीतीमं प्रश्नं समाधातुं वेदान्तिनो विषयमज्ञानावृतं स्वीकुर्वन्ति, अज्ञानरूपावरणभङ्गार्थं चान्तःकरणवृत्तिमभ्युपगच्छन्ति।

शैवकृता वेदान्तिसम्मतप्रत्यक्षप्रक्रियायाः समालोचना

शैवा उपर्युक्तवेदान्तिमतं समालोचयन्ति "प्रागिवार्थोऽप्रकाशः स्यात् प्रकाशात्मतया विना" इति वदन्तः। तथा हि—यावन्तो दृष्टान्ता विवर्तस्य भासमानत्वप्रदर्शनार्थं प्रदत्तास्ते सर्वे मानसप्रभावरूपा एव। तत्र नास्ति शैवानां विमतिः, भ्रमे भासमानस्य रजतस्यापि भ्रमकाले भानस्वीकारात्। स्वप्ने यदुदकावगाहनादि तदपि मानसमेव। भाविकामपरप्रमातृसाधारणां त्वर्थक्रियां न करोत्येव। किं भ्रमदृष्टं रजतं शक्यते विक्रेतुमापणे? किं स्वाप्नं जलावगाहनं प्रक्षालयति भौतिकं मलम्? अत एव वेदान्तिनोऽपि प्राग्ब्रह्मज्ञानात् सर्वव्यवहाराणां सत्यत्वं स्वीकुर्वन्ति पारमार्थिकसत्तां च व्यावहारिकसत्तातो भिन्नां मन्वते।

परं व्यावहारिकप्रत्यक्षस्थले "घटादेर्विषयस्य प्रत्यक्षत्वं तु प्रमात्रभिन्नत्वम्" इति मते "अहं घटमिमं पश्यामि" इत्यनुभवे घटस्य मत्तः स्पष्टं भेदस्यानुभूयमानत्वाद् विषयस्य प्रमात्रभिन्नत्व-प्रतिपादनमनुभवविरुद्धमिति दोषे समुद्भाविते यदा वेदान्तिनो जडस्य विषयस्य घटादेः स्वाभ्युपगतां व्यावहारिकसत्तां विस्मृत्य उत्तरयन्ति यत् प्रत्यक्षे विषयप्रमात्रभेदो न तयोरैक्यम्, अपि तु विषयस्य प्रमातृसत्तातिरिक्तसत्ताभावः, अधिष्ठानसत्तातिरिक्ताया आरोपितसत्ताया अनङ्गीकारात्, तदा ते व्यावहारिकसत्तां पारमार्थिकसत्तया संकुलयन्ति। अधिष्ठानसत्ता-तिरिक्तसत्ताभावो हि मुक्तदृष्ट्या, न तु व्यावहारिकसाधारणजनदृष्ट्या। व्यावहारिके हि प्रत्यक्षे घटादेरधिष्ठानसत्तातिरिक्तसत्ताभावे तं प्रत्यन्तःकरणावच्छिन्नचैतन्यस्य गमनमेव कथं सम्भवेत्।

तथ्यं त्विदं यद् वेदान्तिनो जडमायोपादानकं सर्वं जगत् तथा च जडमिति मतं प्रतिपाद्य तदनुसारं प्रत्यक्षज्ञानार्थमावश्यकं चेतनस्य प्रामातुर्जडेन विषयेणैक्यं न संभवतीत्यस्यामापत्तौ कथमपि जडस्यापि चिद्रूपत्वं सिसाधयिषन्ति, तदर्थं च व्यावहारिकपरमार्थदृष्ट्योः सांकर्यं कुर्वन्ति। यावद्व्यवहारं सत्यात्मैकत्वप्रतिपत्तेः पूर्वं व्यावहारिकं सत्त्वं सत्त्वमेव सत्यमेव, प्रामातृप्रमेयौ भिन्नावेव पृथक्सताकावेवेति तु स्पष्टमुक्तं तत्र भवता शङ्कराचार्येण। यथाह—

सर्वव्यवहाराणामेव प्राग्ब्रह्मता विज्ञानात् सत्यत्वोपपत्तेः। स्वप्नव्यवहारस्येव प्राग्बोधात्। यावद्धि न सत्यात्मैकत्वप्रतिपत्तिस्तावत्प्रमाणप्रमेयफललक्षणेषु विकारेष्वनृतबुद्धिर्न कस्यचिदुत्पद्यते। विकारानेव त्वहं ममेत्यविद्ययात्मात्मीयत्वेन भावेन सर्वो जन्तुः प्रतिपद्यते स्वाभाविकीं ब्रह्मात्मतां हित्वा। तस्मात् प्राग्ब्रह्मात्मताप्रतिबोधादुपपन्नः सर्वो लौकिको वैदिकश्च व्यवहारः। इति। एवमेव बहुभिरन्यैःप्रकारैर्जडं चिद्रूपीकर्तुं प्रयतन्ते वेदान्तिनः। तेषामेकोऽपि न युक्तिसंगतः। तथाहि।

(१) 'अन्तःकरणवृत्तिरावरणाभिभवार्था' इति बहुभिर्वेदान्तिभिः स्वीक्रियते। परमावारणं कस्येति विषये मतभेदः। केचन चित आवरणम्, अपरे विषयस्यावरणमिति मन्वते। अपरो मतभेदो वेदान्तिषु जीवविषये। केचन अविद्योपहितं चैतन्यं जीवः, अपरे त्वन्तःकरणावच्छिन्नं चैतन्यं जीव इति स्वीकुर्वन्ति। अविद्योपहितं चैतन्यं जीव इति पक्षाश्रयिणः प्रत्यक्षप्रक्रियामेवं विवृण्वन्ति (वे० प० १८४)।

अविद्योपहितजीवस्य सर्वव्यापकत्वात् सर्वदा सर्वपदार्थभानप्रसक्तिदूषणमपाकर्तुं तेऽभ्युपगच्छन्ति यद् घटाद्यवच्छिन्ना चित् सर्वदा आवृता तिष्ठति, यावच्चावरणभङ्गो न जायते, तावद्विषयस्य भानं न भवति। अस्य चावरणस्य भञ्जिका अन्तःकरणवृत्तिः, यामिन्द्रियद्वारा बाह्यो विषयो जनयति। एवं च प्रमातृचैतन्येनानावृतविषयचैतन्यस्य संबन्धे सञ्जाते विषयो भासते। इदं च भासनं दीपकेन घटादिविषयभासनाद्विलक्षणम्, अस्य सत्तास्फूर्तिप्रदत्वात्, न तु दीपस्य सत्तास्फूर्तिप्रदत्वम्।

अस्मिन् पक्षे चैतन्यावच्छेदको विषयः प्रकाशरूपश्चिद्रूपो न वेति चिन्त्यम्। प्रकाशरूप इत्यभ्युपगमश्चेत्, उच्यतां किमाकाशमवच्छिन्दन् घट आकाशरूपो भवति? नो चेत् कथं चिदवच्छेदकस्य चिद्रूपता? स्वीकृत्याऽपि प्रकाशरूपतां प्रमातृचिता भासनं किमर्थमभ्युपगम्यते,

भारूपस्य भूयोभासनस्य वैयर्थ्यात्? नो चेत् प्रकाशरूपो विषयः, तस्याप्रकाशस्वभावत्वात् कथं तस्य प्रकाशीकरणं संभाव्यते, स्वभावस्याऽपरिवर्तनीयत्वात्।

(२) अतः सूक्ष्मतरबुद्धयः केचन "सम्बन्धार्था वृत्तिः" इति मतमुपस्थापयन्ति (वे० प० १८५)। इमेऽप्यविद्योपाधिकोऽपरिच्छिन्नो जीव इति मतमवलम्बन्ते। स च तस्य सर्वव्यापकतया सर्ववस्तुभिस्तस्य संबन्धसामान्यसत्त्वेऽपि घटाद्याकारवृत्तिराहित्यदशायां घटादि-भानप्रयोजकसंबन्धविशेषाभावात् घटादि न प्रकाशयति। अस्मिन् मते प्रमातृप्रमेययोः सम्बन्धो व्यङ्ग्यव्यञ्जकतालक्षणः। चैतन्यं व्यङ्ग्यम् तस्यैवावृतत्वस्वीकारात्, घटादिश्च व्यञ्जकः। ननु पार्थिवस्य घटादेर्व्यञ्जकत्वं न युक्तम्; अस्वच्छद्रव्यत्वादिति चेत् न, स्वच्छद्रव्यरूपतैजसान्तः-करणस्य घटाद्याकारवृत्तिसमये घटादीनां जाड्यस्य वृत्त्याभिभूतत्वेन वृत्त्या जडेऽपि घटादौ चैतन्याभिव्यञ्जनयोग्यताधानस्वीकारात्। न चेदमसमञ्जसम्, अस्वच्छद्रव्यस्यापि भित्त्यादेः स्वच्छजलादिसंबन्धदशायां प्रतिबिम्बग्राहित्वस्य दृष्टत्वात्। अस्मिन् मते च प्रमातृप्रमेययोः सम्बन्धो बिम्बप्रतिबिम्बरूपः। घटादेश्चैतन्याभिव्यञ्जकत्वं चैतन्यप्रतिबिम्बग्राहकत्वम्। प्रमातुश्च व्यङ्ग्यत्वं विषये प्रतिबिम्बितत्वम्। एवं चैतन्मतानुसारं घटाकारया अन्तःकरणवृत्त्या आहित-चैतन्यप्रतिबिम्बग्रहणशक्तिके घटे चैतन्यस्य प्रतिबिम्ब आपतिते घटज्ञानं भवति।

इत्थमिदं स्पष्टं यद्वेदान्तसिद्धान्ते ब्रह्मभिन्नाया जडाया मायाया अभ्युपगम एवैकं महत् कण्टकम्। यज्जनितोपद्रवदूरीकरणाय जडस्यापि प्रत्यक्षविषयस्य चेतनीकरणाय जाड्याभिभवो वा अन्यद्वा किञ्चित् स्वीक्रियते, यत्सर्वं स्वभावपरित्यागरूपत्वान्न युक्तियुक्तम्।

अतः काश्मीरशैवा मायां परतत्त्वशक्तिरूपां सांसारिकपदार्थांश्च चित्स्वरूपान् अभ्युपगच्छन्ति, प्रत्यक्षं च महाचित्समुद्रे तरङ्गरूपाणां प्रमातृप्रमेयाणां पारस्परिकोऽर्धनारी-नटेश्वरे शिवपार्वत्योरिव संपर्क एवेति मतं प्रतिष्ठापयन्ति।

अपरे शैववेदान्तिनोर्मौलिका मतभेदाः

वेदान्तिनये परं तत्त्वं कूटस्थनित्यम्, शैवनये तु तदाभासि नित्यम्, वेदान्तिनये आभासो मिथ्या, शैवनये तु सः परिच्छिन्नः प्रकाश एव। वेदान्तिनये जगत्सृष्टिप्रसङ्गे ब्रह्मणः कर्तृत्व-मारोपितम्, शैवनये तु गर्भीकृतानन्तशक्तेः स्वातन्त्र्यस्य स्फाररूपम्। पूर्वनये सदसद्भ्या-मनिर्वचनीया माया परब्रह्मण अवच्छेदिका, परस्मिंस्तु द्वैतप्रधानजगदाभासने सा स्वातन्त्र्यस्यैव रूपान्तरम्। पूर्वस्मिन् परं तत्त्वं निर्विमर्शं स्वात्मपरामर्शरहितं निरवच्छिन्नप्रकाशमात्ररूपम्,

परस्मिंस्तु तत् सविमर्शम्, स्वात्मपरामर्शि प्रकाशविमर्शरूपम्। अन्येऽपि बहवो मौलिकाः शैववेदान्तिनोर्मतभेदा अस्मिन् ग्रन्थे यथावसरं तत्र तत्र विवृताः।

अस्य शैवदर्शनविन्दोर्निबन्धनं कतिपयवर्षपूर्वं प्रारब्धं यदा श्रीविश्वनाथभक्तैर्वाराणसेयसंस्कृत-विश्वविद्यालयोपकुलपतिपदमलङ्कुर्वाणैः श्रीमद्भिः कुबेरनाथशुक्लमहाभागैरहं डाक्टर-गंगानाथझा-व्याख्यानमालायां द्वैत-द्वैताद्वैत-अद्वैत-शैवदर्शनान्यधिकृत्य व्याख्यानत्रयं दातुमामन्त्रितः। व्याख्यानत्रये स्वाधीतानां दशशैवदर्शनानां संक्षिप्तमपि व्याख्यानं दुःशकं पश्यता मया तदन्ते कालान्तरेऽवशिष्टयोः क्रमकुलदर्शनयोः प्रतिपादनं प्रतिज्ञातम्। काश्मीर-शैवस्वातन्त्र्यवादविचारधारां लिपिबद्धीकुर्वता तस्याश्च प्रभावं दर्शनान्तरप्रतिपादकानामुपरि गवेषयता मया वाराणसेय-संस्कृतविश्वविद्यालयायोजितव्याकरणपरिषदि "स्वातन्त्र्यवादी भर्तृहरिः" इति मतमुपस्थापितम्।

इदानीन्तनैरुपकुलपतिमहाभागैः श्रीसुरतिनारायणमणित्रिपाठिभिरवशिष्टशैवदर्शनद्वय-प्रतिपादनाय करावलम्बं ददद्भिस्तन्त्रपरिषदि तन्त्रदर्शनपरिषदध्यक्षासनं ग्रहीतुमहमामन्त्रितः। एष अवसरो मया क्रमदर्शनं व्याख्यातुमुपयुक्तः। इमं बिन्दुं स्वाधीतशैवदार्शनिकवाङ्मयानुसारं सम्पूर्णीकर्तुमन्ते कुलदर्शनविषयको निबन्धः संयोजितः।

इत्थं महता कालेनायं विन्दुः सम्पूर्णतां यातः। अस्मिन् कर्मण्यनेकेषां साहय्य-प्रदातॄणामहं कियानाभारीति तु स्वसंवेद्यमेव; तथापि विशिष्टसाहाय्यदातृषु मुख्यतया कीर्तनीया यू० जी० सी० मुख्याधिकारिणः, येषामविच्छिन्नेनार्थिकसाहाय्येनास्य ग्रन्थस्य, अन्येषां च प्रकाशनं संजातमपरेषां च यथाकालं सभाव्यते, क्रमागता वाराणसेय-संस्कृतविश्वविद्यालयस्योपकुलपतयस्तथान्येऽधिकारिणो यैरस्य ग्रन्थस्य तथा भागत्रयपूर्णाया भास्कर्याः प्रकाशने सम्यग् योगदानं यथानियमं कृतम्, एतेभ्यः सर्वेभ्यो महद्भ्यः सहस्रशो धन्यवादान् सप्रश्रयं समर्पयन् विरमे।

कान्तिचन्द्रपाण्डेयः

फैजाबादरोड

बाबूगंज क्रासिंग लखनऊ

दिनाङ्क ११-११-१९६५

शैवदर्शनबिन्दुविषयानुक्रमणिका

शैवद्वैतदर्शनम्

विषयः				पृष्ठम्
द्वैतशैवदर्शनेतिहासः	...	...	...	२
ईशवीयसंवत्सरारम्भात् पूर्वं शैवद्वैतप्रचारः		...	...	२
द्वैतशैवागमाः	...	...	...	३
द्वैतपाशुपतदर्शनविवरणस्य दुष्करत्वम्		...	...	५
पाशुपतमतखण्डनपरं ब्रह्मसूत्रपत्यधिकरणम्		...	...	५
द्वैतशैवसिद्धान्तदर्शनम्	...	...	...	७
शैवसिद्धान्तप्रतिपादकाष्टाविंशत्यागमटीकाकाराः सैद्धान्तिकनिबन्धलेखकाश्च			...	८
१ सद्योज्योतिः	...	...	...	८
२ बृहस्पतिः	...	...	...	९
३–४ शङ्करनन्दनदेवबलौ		...	...	९
काश्मीरे द्वैतशैवसिद्धान्तः	...	...	...	९
मध्यप्रदेशे गुर्जरप्रदेशे च शैवसिद्धान्तप्रचारः		...	...	११
द्वैतसिद्धान्तशैवदर्शनप्रचारो दक्षिणभारते		...	...	१२
कान्यकुब्जे द्वैतसिद्धान्तशैवदर्शनप्रचारः		...	...	१२
द्वैतशैवसिद्धान्तदर्शनस्य दार्शनिकविवरणम्		...	...	१३
द्वैतशैवसिद्धान्तवैशेषिकदर्शनयोः सैद्धन्तिका भेदाः		...	...	१३
सिद्धान्तशैवसांख्ययोर्भेदः	...	...	...	१४
सिद्धान्तशैवदर्शनस्याद्वैतवेदान्ताद् भेदः		...	...	१५
द्वैतपाशुपतात् सिद्धान्तद्वैतस्य भेदः		...	...	१५
सिद्धान्तशैवदर्शनस्य वैयाकरणदर्शनाद् भेदः		...	...	१६
सिद्धान्तशैवाभ्युपगतानि तत्त्वानि		...	...	१६
त्रीणि तत्त्वानि	...	...	...	१६

विषयः	पृष्ठम्
सिद्धान्तशैवद्वैते षट्त्रिंशत्तत्त्वस्वीकारः	१७
सिद्धान्तशैवाभ्युपगतमुख्यपदार्थत्रयस्वरूपम्	१७
१ पतिः—विश्वोत्तीर्णः शिवः	१७
द्विविधा सृष्टिः	१८
२ पाशः	१९
(अ) मलः—आणवमलः	१९
(आ) माया	२०
(इ) कर्म	२०
(ई) निरोधशक्तिः (तिरोभावः)	२०
(उ) बिन्दुः	२१
बिन्दुरवान्तरपदार्थेषु प्रथमः	२१
बिन्दुपरिणामो नादः	२१
वैयाकरणदर्शनाभ्युपगतस्फोटनिरसनपूर्वकं नादसमर्थनम् ...	२२
नादपदव्याख्यानम्	२३
सिद्धान्तशैवदृष्ट्याऽर्थग्रहणप्रकारः...	२४
(३) पशुस्तृतीयो मुख्यपदार्थः	२५
मोक्षः	२५
उपसंहारः	२६

शैवद्वैताद्वैतदर्शनम्

लकुलीशपाशुपतदर्शनोद्भवकालः	२७
लकुलीशपाशुपतदर्शनग्रन्थाः	२९
१ पाशुपतसूत्रं लकुलीशकृतम्	३०
२ पञ्चार्थभाष्यनाम्नी तट्टीका कौण्डिन्यविरचिता ...	३०
३–४ विशुद्धमुनिकृते यमप्रकरणात्मसमर्पणे	३१
५ हरदत्ताचार्यलिखिता गणकारिका	३१
६ तदुपरि भासर्वज्ञकृता टीका	३१

विषयः				पृष्ठम्
७ सत्कार्यविचारः	...	...	...	३१
८ टीकान्तरम्	...	...	...	३१
९ संस्कारकारिका	...	...	...	३२
१० टीकाकाराः	...	...	...	३२
भासर्वज्ञस्य समयः	...	...	...	३२
११ कारणपदार्थः	...	...	...	३३
१२ पञ्चार्थभाष्यदीपिका	...	...	...	३३
१३ आकरः	...	...	...	३३
१४ आदर्शः	...	...	...	३३
लकुलीशपाशुपतदर्शनस्य वेदसंबन्धित्वम्		...	...	३३
सायणीयतैत्तिरीयारण्यकटीकाप्रतिपादितस्य ब्रह्मणो लकुलीशपाशुपतदर्शनप्रथमतत्त्वेन पत्या सह साम्यम्	...	...	...	३४
लकुलीशपाशुपतदर्शनस्य दर्शनान्तरेभ्यो वैशिष्ट्यम्		...	...	३६
लकुलीशपाशुपतदर्शनस्य युक्तिवादसहकृतः स्वातन्त्र्यवादः			...	३७
लकुलीशपाशुपतदर्शनस्वीकृताः पञ्च पदार्थाः		...	...	३९
(१) पतिः कारणं वा	...	...	...	३९
(२) कार्यं पशुर्वा	...	...	...	४०
कारणकार्ययोः सम्बन्धः	...	...	...	४१
(क) विद्या	...	...	...	४१
त्रीणि प्रमाणानि		...	...	४३
(ख) कला	...	...	...	४३
(ग) पशुः	...	...	...	४४
पञ्च मलाः	...	...	...	४५
(१–२) असर्वज्ञत्वम् असर्वकर्तृत्व च		...	...	४५
पञ्च मलक्षपणोपाया लाभोपायाश्च		...	...	४६
१ वासः	...	...	...	४६

विषयः				पृष्ठम्
२ चर्या	...	...	...	४६
३ जपध्यानम्	...	...	...	४७
४ सदारुद्रस्मृतिः	...	...	...	४८
५ प्रसादः	...	...	...	४८
पञ्च देशाः	...	...	...	४८
पञ्चावस्थाः	...	...	...	४८
३ योगः—तृतीयं मुख्यं तत्त्वम्		...	...	४८
द्विविधो योगः	...	...	...	४६
क्रियोपरमलक्षणो योगः	...	...	...	५०
४ विधिः	...	...	...	५२
५ दुःखान्तः	...	...	...	५२
सिद्धः	...	...	...	५३
लकुलीशपाशुपतभेदाभेदवादस्यापरभेदाभेदवादेभ्यो वैलक्षण्यम्			...	५४
जीवन्ति भेदाभेदमतानि	...	...	...	५६
१ भेदाभेदवादिवीरशैवमतम्		...	...	५६
२ निम्बार्कमते भेदाभेदवादः		...	...	५६
३ चैतन्यमतेऽचिन्त्यभेदाभेदवादः		...	...	५७
लकुलीशापरभाविनां भेदाभेदवादानामुपरि लाकुलीशभेदाभेदप्रभावः			...	५७
शैवविशिष्टाद्वैतसाधकस्य श्रीकण्ठस्योपरि लाकुलीशभेदाभेदप्रभावः			...	५६
श्रीकण्ठस्य लकुलीशपाशुपतभेदाभेदसाधारणा अभ्युपगमाः			...	५६
द्वैतशैवसिद्धान्तप्रभावः	...	...	...	६०
रामानुजीयविशिष्टाद्वैतमुख्यांशाः	...	...	...	६०
(१) ईश्वरः	...	...	...	६१
(२) अपृथक्सिद्धिसम्बन्धः	...	...	...	६१
(३) विशेषणस्वरूपम्	...	...	...	६२
(४) अद्वैतम्	...	...	...	६२

विषयः				पृष्ठम्
(५) स्वगतभेदः	...	...	...	६२
स्वगतभेदस्वीकारस्य महत्त्वम्	...	...	...	६३
प्रमाणप्रमेये	...	...	...	६३
श्रीकण्ठरामानुजविशिष्टाद्वैतयोः साम्यम्		...	...	६३
उपसंहारः	...	...	...	६४

शैवाद्वैतदर्शनम्

चत्वारि शैवाद्वैतदर्शनानि	...	...	...	६५
नन्दिकेश्वरदर्शनम्	...	...	...	६६
नन्दिकेश्वरकारिकायाः प्रामाण्यं समयश्च		...	...	६६
नन्दिकेश्वरशैवाद्वैते मुख्या दार्शनिकविचारधाराः		...	...	६७
(क) स्वातन्त्र्यवादः	...	...	...	६७
काश्मीरिकाद्वैतशैवैर्नन्दिकेश्वरस्वातन्त्र्यवादानुसरणम्		...	...	६७
(ख) अद्वैतवादः	...	...	...	६८
(ग) प्रत्ययवादः	...	...	...	६९
(घ) निर्गुणसगुणयोर्ब्रह्मेश्वरयोरैक्यम्		...	...	६९
(ङ) षट्त्रिंशत्तत्त्वानि	...	...	...	७०
(च) तत्त्वोत्तीर्णः परः शिवः	...	...	...	७०
स्वातन्त्र्यवादी पाणिनिः	...	...	...	७०
कारकशब्दार्थः	...	...	...	७१
पतञ्जलिनये एकस्यैव कारकत्वमधिकरणत्वादि च		...	...	७२
स्वतन्त्रशब्दार्थः	...	...	...	७३
कर्तृकारकशब्दयोरर्थभेदः	...	...	...	७३
कर्तृप्राधान्यविवरणम्	...	...	...	७३
कैयटोपरि भर्तृहरिप्रभावः	...	...	...	७४
प्रत्यभिज्ञादर्शस्येतिहासः साहित्यं च		...	...	७६

विषयः				पृष्ठम्
प्रत्यभिज्ञादर्शनप्रास्ताविकम्	...	...	...	७६
प्रत्यभिज्ञादर्शनम्	...	...	...	८०
स्वातन्त्र्यवादः	...	...	...	८१
आभासवादः	...	...	...	८४
परशिव-परब्रह्मणोः पारस्परिको भेदः		...	...	८७
अहंपरामर्शद्वैविध्यम्	...	...	...	९२
भर्तृहरिनये परतत्त्वस्यान्तःकृतानन्तविश्वरूपता प्रकाशविमर्शमयता च			...	९३
वेदान्तिसंमतस्य भेदस्याविद्योपप्लवरूपतापर्यालोचनम् ...			...	९५
सत्त्वसमीक्षा	...	...	...	९६
भ्रान्तिविचारः	...	...	...	९७
अद्वैतशैववेदान्तमतयोर्मौलिको भेदः		...	...	९९
उपसंहारः	...	...	...	९९

स्वातन्त्र्यवादी भर्तृहरिः १०१

क्रमदर्शनम्

तन्त्रशब्दार्थः	...	...	...	१०५
अस्य दर्शनस्य नामानि	...	...	...	१०६
क्रमदर्शनेतिहासः साहित्यं च	...	...	...	११०
क्रमदर्शनं पञ्चकदर्शनम्	...	...	...	११२
विकल्पसंस्कार एव मोक्षोपायः ...		...	...	११३
अपोहनक्रमः	...	...	...	११५

कुलदर्शनम्

कुलशब्दार्थाः	...	...	...	१२०
कुलदर्शनस्य नामानि	...	...	...	१२२
कुलदर्शनेतिहासः	...	..	...	१२३
कुलदर्शनसाहित्यम्	...	.	...	१२६

विषयः	पृष्ठम
कुलागमानामैतिहासिकः क्रमः	१२७
अस्य समयः	१३५
कौलसिद्धान्तप्रतिपादयितारः काश्मीरिकाः लेखकाः	१३७
शम्भुनाथः अभिनवगुप्ताचार्यस्य कुलदर्शनगुरुः	१३८
अष्टादशशततमेईशवीये काश्यां कुलदर्शनपरम्परा	१३९
कुलाचारविषयकभ्रान्तिनिरसनम्	१४२
अधिकारिलक्षणानि	१४२
कुलाचारानुष्ठाने मकारत्रयोपयोगप्रयोजनानि	१४४
कौलिकवैदिकयोरविरोधः	१४५
दार्शनिकविवरणम्	१४७
कुलदर्शनस्य दर्शनान्तरेभ्यो वैलक्षण्यम्	१४८
प्रतिपाद्यविषयपरिच्छितिः	१४८
(१) अनुत्तरम्	१५०
अनुत्तरशब्दस्य भिन्ना अर्थाः	१५०
(२) अनुत्तरा	१५४
अनुत्तरा पराप्रतिभा परावाक् च	१५४
स्फारक्रमे अनुत्तरा विन्दुरूपिणी	१५६
अकारोऽनुत्तरम्	१५७
आकार आनन्दः	१५७
इच्छा इकारः	१५७
ईशनम् ईकारः	१५७
उन्मेषः उकारः	१५७
ऊनता ऊकारः	१५८
ऋ ॠ ऌ ॡ षण्डवर्णचतुष्टयम्	१५८
ए ऐ ओ औ शक्तिपञ्चकसंघट्टवाचकाः	१५८
विन्दुः शिवो बिन्दुरूपिणी अनुत्तरा च	१५९

विषयः				पृष्ठम्
वर्णमालाद्योतितानि पञ्चत्रिंशत् तत्त्वानि		...	...	१६१
कुल-प्रत्यभिज्ञादर्शनयोस्तत्त्वसंख्याविषये भेदः		...	...	१६१
कौलाद्वैतविवेचनम्	...	...	...	१६१
बिन्दोर्नादो जीवकला	...	...	...	१६२
षोडशकलः पुरुषः	...	...	...	१६४
चित्प्रतिबिम्बं जगत्	...	...	...	१६५
परावाग्विषयके संस्कृतसाहित्येतिहासे नागेशस्य स्थानम्			...	१६६
ईशवीयेनवमशततमे कश्मीरे प्रसिद्धस्य भर्तृहरिमतस्य स्वरूपम्, नागेशस्य च ततो भेदः				१६८
पश्यन्तीसमालोचना	...	...	...	१७०
नागेशस्योपरि शिवदृष्टिप्रभावः		...	...	१७१
कौलदर्शनस्य नागेशीयवैयाकरणदर्शनोपरि प्रभावः			...	१७१
क्वायं सृष्टिक्रमो नागेशेनोपलब्धः		...	...	१७२
बिन्दोस्तस्माद् भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्			...	१७३
नागेशनये परा बिन्दुरूपीणी बिन्दूद्भवा वा ?			...	१७८
नागेशो भगवति लीलां स्वीकरोति न वा ?		...	...	१७९
नागेशनये सत्ता महासत्ता च	...	...	...	१८०
नागेशमतस्य शङ्कराद्वैतवादाद् भेदः		...	...	१८२
कुल-वेदान्तदर्शनयोः साम्यवैषम्ये		...	...	१८३
नागेशप्रतिपादितवैयाकरणदर्शनस्य कुलदर्शनेन साम्यं तस्माद्वैषम्यं च			...	१८५
उपसंहारः	...	...	...	१८५

ब्र० व० द्वि०
२-४-५८

शैवद्वैतदर्शनम्

महनीया उपकुलपतिमहाभागा उपस्थिताश्च विद्वद्वरेण्याः !

महानयमनुग्रहस्तत्रभवतां वाराणसेयसंस्कृतविश्वविद्यालयाधिकारिणां विशेषतो विद्वन्मूर्धन्यानामुपकुलपतिमहोदयानां यदहमेतद्विश्वविद्यालयीयडा०गङ्गानाथझाव्याख्यानमालायां ग्रथ्यमानायामैषमस्त्ये ग्रथनकाले प्रसूनत्रयं ग्रथितुमादिष्टः। माननीयधुरन्धरविद्वद्भिः श्रीगिरिधरशर्मसातकडिमुखोपाध्यायप्रभृतिभिः सुगृहीतनामधेयैः प्रोम्भितसुन्दरपुष्पसदृशानि कथमपि मदीयकुसुमानि न शक्नुवन्ति भवितुमिति सम्यग् जानन्नपि "एकोऽपि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः" इति नीत्या न लक्षिष्यते दुर्दुरूटत्वं मद्व्याख्यानानाम्, यद्वा "प्रमदालोचनन्यस्तं मलीमसमिवाञ्जनम्" इति कथनानुसारं मलीमसत्वमेवैषां सुन्दरव्याख्यानमालासौन्दर्यमधिकयिष्यतीति मन्वानो भवदादेशानुसारं शैवागमाश्रितानि द्वैत-द्वैताद्वैत-अद्वैतदर्शनानि क्रमशो यथावसरं व्याख्यातुं बद्धपरिकरः शैवद्वैतं व्याख्यातुं समुपस्थितोऽस्म्यद्य भवतां पुरस्तात्।

एतद्व्याख्यानवक्तव्यं विचारयतो मम एतद्विश्वविद्यालयीयागमविभागाध्यक्षेण सह महता सौभाग्येन संपर्कः सञ्जातः। छात्रोपकारनिरतैस्तैरिमानि छात्रोपकारकाणि दार्शनिकतत्त्वप्रदर्शनप्रधानानि स्युरितीयमिच्छा प्रकटिता। अतस्तदनुसारं शैवदार्शनिकसाहित्यस्याधुनिकदृष्ट्यात्यावश्यकस्येतिहासांशस्य च सिंहावलोकनमात्रं विधाय दार्शनिकांशो यथासमयं यावच्छक्यं व्याकरिष्यते।

द्वैतशैवदर्शनेतिहासः

सर्वाण्यपि शैवदर्शनान्यागमप्रामाण्यं स्वीकुर्वन्ति, शैवागमपरम्परासत्ताकालविषये चैतद्विश्वविद्यालयीयागमदर्शनपरिषदध्यक्षीयभाषणं ददता मया निवेदितमेव—"आगमपरम्परासत्तासमयनिर्णये चिकीर्षिते भूखननोपलब्धस्य प्रागैतिहासिकसंस्कृतिसूचकस्य वस्तुजातस्योपरि दृष्टिप्रक्षेपे कृते एवं निश्चयो जायते यच्छैवागमपरम्परायाः सत्ता अस्मात् कालात् पञ्चसहस्रवर्षपूर्वं 'हरप्पा-मोहेञ्जोदारो'संस्कृतीनां समय आसीत्" इत्यादि ।

ईशवीयसंवत्सरारम्भात् पूर्वं शैवद्वैतप्रचारः

अतोऽधुनेदमेव वक्तव्यं यत् सोमानन्दाभिनवगुप्तादिकाश्मीरदार्शनिकानुसारं वेदवच्छैवागमा अप्यैश्वर्यो वाचः, एवं चानादयः । एषां सत्ता सत्य-त्रेता-द्वापराख्येषु पूर्वयुगेष्वप्यासीत् । स्वच्छन्द-लाकुल-बलि-राम-लक्ष्मण-रावणादिभिरन्यैर्ऋषिभिश्चेमे सम्यगधीताः । परं कालगत्यैषां ह्रासः सञ्जातः, कलिप्रारम्भे च ऋषिषु दुर्गमगोचर'कलापि'ग्रामप्रमुखं प्रयातेषु समुच्छिन्ना आगमपरम्परा ।

ततश्चैकदा भगवाञ्छिवः श्रीकण्ठरूपेण कैलाशाद्रौ भ्रमन् मर्त्यानुग्रहायोर्ध्वरेतसं मुनिं दुर्वाससं जगतीतले शैवागमं प्रकाशयितुमादिशत् । भगवदादेशानुसारं स त्र्यम्बकादित्यनामकमेकं मानसं पुत्रं ससर्ज, तस्मिंश्च शैवागमरहस्यानि संक्रमयामास । सोऽपि त्र्यम्बकाख्यं मानसं पुत्रं सृष्ट्वा शैवागमांश्चाध्याप्य सिद्धो भूत्वा खमुत्पपात । एवमेव परम्परया मनःसृष्टैश्चतुर्दशभिः पुत्रैः समनुष्ठितम् , यतस्ते सर्वेऽप्यन्तर्मुखाः समभूवन् । परं पञ्चदशः पुत्रः सङ्गमादित्यनामकः कथञ्चन बहिर्मुखः सञ्जातः । स एकां रूपयौवनसौभाग्यलक्षणयुक्तां ब्राह्मणीं ब्राह्मणेन विवाहेन परिणिनाय, भ्रमंश्च काश्मीरमागतः । तस्य सुतो वर्षादित्यनामकः, तस्य च अरुणादित्यः, तस्यापि च आनन्दः, यस्य पुत्रः सोमानन्दाख्यः शिवदृष्टिनामकप्रकरणकर्ता समभूत् ।

इदं सर्वं सोमानन्दपादैः शिवदृष्ट्यन्तभागे स्वयमेवोल्लिखितम् । अत इदं स्पष्टं यत्कलावद्वैतशैवागमगुरुपरम्परायां सोमानन्द एकोनविंश आसीत् । स चाभिनवगुप्तपादानां परमेष्ठिगुरुरासीत् । अभिनवगुप्तश्च ईशवीयदशमशतकोत्तरार्धे एकादशशतकपूर्वार्धे चाभूदित्यत्र न विवादावसरः । यतस्तेन ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी-भैरवस्तव-क्रमस्तोत्राणां प्रसिद्धानां स्वग्रन्थानां

समापनतिथयः स्वयमेव लिखिताः। अत इदं निश्चीयते यत् सोमानन्द ईशवीयनवमशतकमध्ये समभूत्।

यद्यप्याधुनिकैतिहासिकमतानुसारं प्रत्येकं परम्परागतस्य गुरोः पञ्चविंशतिवर्षपरिमिते समये स्वीकृते शैवागमप्रादुर्भाव ईशवीयचतुर्थशताब्द्यां जात इत्यायाति, तथापि शैवागमाश्रितद्वैताद्वैतलकुलीशपाशुपतदर्शनप्रवर्तको लकुलीश ईशवीयद्वितीयशतकप्रारम्भेऽभूदिति मथुरास्तम्भलेख-सोमनाथशिलालेखाभ्यां तैरेव निश्चितम्। अतो गुर्वादिपरम्परागणनायां प्रत्येकं पञ्चविंशतिवर्षपरिमितः कालो गणनीय इत्याधुनिकैतिहासिकमतं शैवगुरुपरम्परासमयनिर्धारणे चिकीर्षिते नाश्रयणीयमिति प्रतिभाति।

अपरं च बादरायणेन स्वीयवेदान्तसूत्रे पाशुपतदर्शनं निराकृतम्। बादरायणस्य च समय ईशापूर्वचतुर्थशतके पञ्चमशतके वा स्वीक्रियते। सत्यपि मतभेदे कश्चनापि बादरायणमीशवीयद्वितीयशतकादपरभाविनं न स्वीकरोति। अतः पाशुपताख्यद्वैतशैवदर्शनसत्ता ततः पूर्वं स्वीकर्तव्या।

अभिनवगुप्तश्च श्रीसिद्धातन्त्रमनुसरन् अद्वैत-द्वैत-द्वैताद्वैतदर्शनानि यथासंख्यं त्र्यम्बक-अमर्दक-श्रीनाथैः कलौ समकालमेव प्रकाशितानीति मतं तन्त्रालोकस्य षट्त्रिंशाह्निके एषु श्लोकेषु समुपन्यस्तवान्—

तेषां क्रमेण तन्मध्ये भ्रष्टं कालान्तराद्यदा।
तदा श्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन्॥ ११॥
त्र्यम्बकामर्दकाभिख्यश्रीनाथा अद्वये द्वये।
द्वयाद्वये च निपुणाः क्रमेण शिवशासने॥१२॥ इति।

अत इदं निश्चीयते यदुपलब्धद्वैतशैवदर्शनप्रचारो भूय ईशवीयशतकप्रारम्भात् पूर्वं सञ्जात इति।

द्वैतशैवागमाः

अद्यावधि शैवद्वैतप्रतिपादकं दर्शनद्वयमुपलब्धम्—पाशुपतदर्शनम्, सिद्धान्तशैवदर्शनञ्च। अनयोः पारस्परिको मुख्यो भेदोऽयमेव यत् प्रथमं दशागमाश्रितं द्वितीयञ्चाष्टाविंशत्यागमाश्रितम्। अष्टादशागमाः, सर्वसम्मतदशद्वैतागमभिन्ना ये सिद्धान्तशैवदार्शनिकैर्द्वैतं प्रतिपादयद्भिः प्रमाणत्वेन स्वीक्रियन्ते, तेऽभिनवगुप्तकृततन्त्रालोकानुसारं तद्व्याख्यातृजयरथानुसारञ्च न द्वैतप्रतिपादकाः, अपि तु द्वैताद्वैतप्रतिपादकाः। तन्मतञ्च श्रीश्रीकण्ठीमुपजीवति। दशद्वैततन्त्राणां नामानीत्थम्—

[1]कामज-[2]योगज-[3]चिन्त्य-[4]मौकुट-[5]अंशुमत्-[6]दीप्त-[7]कारण-[8]अजित [9]सूक्ष्म-[10]सहस्रा इति।

परन्तु मुद्रितमृगेन्द्रागमभूमिकायां द्वैतप्रतिपादकशैवागमानां शैवसंज्ञया व्यपदेशः, तन्नामानि चैवं परिगणितानि—

कामिकं योगजं वाथ तथा चिन्त्यश्च कारणम्।
अजितं दीप्तसूक्ष्मौ च सहस्रश्च तथांशुमान्॥
सुप्रभेदस्तथा ह्येते शैवाः सम्परिकीर्तिताः। इति।

इदं प्रमाणवाक्यं जयरथोल्लिखितप्रमाणवाक्याद्भिन्नमिव प्रतिभाति। इह श्रीश्रीकण्ठ्युल्लिखित'कामज'स्थाने 'कामिक' इत्युपलभ्यते। इदं तु कामजस्य नामान्तरमेव, परन्तु मौकुटस्थाने भिन्नस्यागमस्य सुप्रभेदाख्यस्य सन्निवेश उपलभ्यते। तांस्तानागमानधीयानेन मया नाद्यावधि मृगेन्द्रागमभूमिकोपन्यस्तभिन्नागमसन्निवेशकारणमुपलब्धम्। कामिकापरनामकस्य कामजस्य त्रय उपभेदाः—

नारसिंहं च वक्त्रारं भैरवोत्तरमेव च।
नारसिंहाख्यमेवैतन्मृगेन्द्रमिति कथ्यते॥ इति। (मृ० भू० २)

एवञ्च मृगेन्द्रतन्त्रं नारसिंहापरनामकं कामिकस्योपभेदरूपत्वाद् द्वैतप्रतिपादकमिति यद्यपि सुस्पष्टं भाति, तथापि श्रीश्रीकण्ठ्याम्, यामवलम्ब्य जयरथो द्वैताद्वैतशैवागमनामान्युल्लिखति स्म, नारसिंहागमस्याष्टादशद्वैताद्वैतागमेषु सन्निवेशः समुपलभ्यते। इदं द्वैतशैवसिद्धान्तदर्शनसाहित्यप्रदर्शनावसरे तन्नामनिर्देशे क्रियमाणे स्पष्टीभविष्यति।

एवमेव मुद्रितस्य मतङ्गपारमेश्वरागमस्य, यस्य श्रीकण्ठ्यां पारमेश्वर इति नाम्ना द्वैताद्वैतागमेषूपन्यासः, तस्योपरि काश्मीरिकरामकण्ठकृता द्वैतानुसारिणी व्याख्या दृष्टा श्रुता वा 'काश्मीर शैविज्म' इत्याख्यग्रन्थकर्तृभिः श्रीजगदीशचन्द्रचटर्जीमहोदयैरिति प्रतिभाति, मतङ्गटीकायाः सप्रश्नचिह्नं रामकण्ठकृतिषु तेन परिगणनात्। अत इदं प्रतिभाति यद् यथा वेदवाक्यान्युपनिषद्वाक्यानि च भिन्नैर्वैदिकदार्शनिकैर्द्वैत-द्वैताद्वैत-विशिष्टाद्वैत-अद्वैतमतानि प्रतिपादयद्भिः स्वस्वमतानुसारं व्याख्यातानि, तथा शैवागमा अपि तैस्तैः शैवदार्शनिकैः स्वस्वमतपरिपोषकतया व्याख्याताः। एतच्चाद्वैतदृष्ट्या स्वच्छन्दतन्त्रटीकाकृतः क्षेमराजस्य वाक्यात् सुस्पष्टम्। यतः स स्पष्टं कथयति यत् स्वच्छन्दतन्त्रस्य द्वैतदृष्ट्या व्याख्यानं यत्पूर्वैः कृतं तन्नामविरुद्धमित्यसङ्गतम्। यथाह—

नाम्नैव भेददृष्टिर्विधुता येनास्वतन्त्रता तत्त्वा ।
श्रीमत्स्वतन्त्रतन्त्रं भेदव्याख्यां न तत्सहते ॥ इति ।
(स्व० तं०, भा० ६, प०१२, पृ० १४६)

पूर्वोक्तविवेचनादिदं स्पष्टीभवति यद् यद्यपि अभिनवगुप्तपादैर्निर्दिष्टानां दशागमानां द्वैतप्रतिपादकत्वं प्रायः श्रीश्रीकण्ठ्यनुसारं स्वीकृतम्, तथाप्येतद्विषये मतभेदो वर्तते, द्वैताद्वैत-प्रतिपादकत्वेनाभिनवगुप्तस्वीकृतानामागमानां सिद्धान्तशैवैः द्वैतप्रतिपादकत्वेन स्वीकरणात्, नारसिंहापरनामकस्य मृगेन्द्रागमस्य च श्रीश्रीकण्ठ्यां द्वैताद्वैतप्रतिपादकाष्टादशागमेषूल्लिखितस्यापि काश्मीरिकनारायणकण्ठेन द्वैतपरतया व्याख्यानाच्च ।

द्वैतपाशुपतदर्शनविवरणस्य दुष्करत्वम्

पाशुपताख्यद्वैतशैवदर्शनप्रतिपादक आगमाश्रितः कोऽपि ग्रन्थो नाद्यावध्युपलब्धः । आगमा अपि सम्पूर्णा मुद्रिता हस्तलिखिता वा नोपलभ्यन्ते, विशेषतस्तेषां विद्यापादाः, यत्रागमेषु दार्शनिकप्रक्रियाः प्रदीयन्ते । अतः पाशुपताख्यद्वैतशैवदर्शनस्य दार्शनिकतत्त्वविवरणमतीव दुष्करमपि बादरायणीयब्रह्मसूत्रे तट्टीकासु च खण्डनार्थमुपन्यस्तं तथा हरिभद्रसूरिराजशेखरकृत्योः षड्दर्शनसमुच्चयनाम्न्योः संक्षेपेण प्रतिपादितं तन्मतमाश्रित्य यावच्छक्यं करोमि ।

पाशुपतमतखण्डनपरं ब्रह्मसूत्रपत्यधिकरणम्

बादरायणीयब्रह्मसूत्रद्वितीयाध्यायद्वितीयपादस्थं सप्तममधिकरणं पत्यधिकरणमिति शाङ्कर-वेदान्तिषु प्रसिद्धम् । परन्तु विशिष्टाद्वैतदृष्ट्या श्रीकण्ठेन कृते ब्रह्मसूत्रभाष्ये तत् पाशुपताधिकरण-मिति निर्दिष्टम् । केचन शाङ्करवेदान्तिनो मन्यन्ते यत् पत्यधिकरणे निराकृतं दर्शनं लकुलीश-पाशुपतदर्शनमिति । यतः शङ्कराचार्येण "पत्युरसामञ्जस्यात्" इति सूत्रटीकायां लकुलीशपाशुपत-दर्शनस्वीकृताः कारणकार्ययोगविधिदुःखान्ताः पञ्च पदार्थाः समुपन्यस्ताः, परन्त्वयं तेषां भ्रम एव । यतः शङ्कराचार्यस्तदनन्तरं स्वयमेव कथयति यन्निराक्रियमाणं दर्शनं द्वैतदर्शनम्, यस्मिन् 'अप्रकृतिरधिष्ठाता केवलं निमित्तकारणमीश्वरः' । माहेश्वरदर्शनविषये च स्पष्टमुल्लिखति—"माहेश्व-रास्तु मन्यन्ते कारणकार्ययोगविधिदुःखान्ताः पञ्च पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षणायो-पदिष्टाः । पशुपतिरीश्वरो निमित्तकारणमिति वर्णयन्ति" इति । अस्य शाङ्करभाष्यांशस्य व्याख्यां कुर्वता वाचस्पतिमिश्रेण भामत्यां निराक्रियमाणदर्शनस्य द्वैतत्वमेवं साधितम्—

"चत्वारो माहेश्वराः—शैवाः, पाशुपताः, कारुणिकसिद्धान्तिनः, कापालिकाश्च । चत्वारोऽप्यमी महेश्वरप्रणीतसिद्धान्तानुयायित्वान्माहेश्वराः ....एष तेषामभिसन्धिः—

चेतनस्य खल्वधिष्ठातुः कुम्भकारादेः कुम्भादिकार्ये निमित्तकारणत्वमात्रं न तूपादानत्वमपि। तस्मादिहापीश्वरो जगत्कारणं निमित्तमेव न तूपादानमपि, एकस्याधिष्ठातृत्वाधिष्ठेयत्व-विरोधात्" इति।

अतो निमित्तोपादानकारणयोः पारस्परिकभेदस्वीकारादिदं दर्शनं न्यायवैशेषिकवद् द्वैत-दर्शनमेवेत्यत्र सन्देहलेशोऽपि नास्ति। इदमस्मन्मतं श्रीकण्ठभाष्येणापि समर्थ्यते, यत्रास्याधिकर-णस्य नाम 'पाशुपताधिकरणम्', न तु 'लकुलीशपाशुपताधिकरणम्' इत्युपन्यस्तम्।

शङ्कराचार्यव्याख्यानुसारं बादरायणनिराक्रियमाणं दर्शनं न लकुलीशपाशुपतदर्शनमिति लकुलीशकृतपाशुपतसूत्रोपरि दृष्टिपाते क्रियमाणे सुस्पष्टीभवति। यतो लकुलीशपाशुपतदर्शनं न द्वैतदर्शनमपि तु द्वैताद्वैतदर्शनम्। द्वैताद्वैतत्वं चास्य "भवोद्भवः", "कलितासनम्" इति सूत्रयोः कौण्डिन्यकृतव्याख्यायामेवं साधितम्—

विद्याकलापशुरूपं कार्यमिह भवशब्दनिर्दिष्टं कारणरूपात् पत्युरेवोद्भवतीति स भवोद्भवः। एवञ्च न निमित्तकारणाद्भिन्नं समवायिकारणं कुम्भकारान्मृदिव स्वीक्रियतेऽनेन दर्शनेन। प्रत्युत कारणरूपः पतिः कार्यजातस्यासनरूपत्वेनाभ्युपगम्यते। कार्यत्रयस्य सत्ता पतिशक्तौ स्वीक्रियते, शक्तिश्चैतन्मते सामर्थ्यमैश्वर्यं स्वगुणः सद्भावः सतत्त्वं तत्त्वधर्मः, अव्ययोऽमृतो भगवान् कामतः स्वशक्तिस्थं कार्यं स्वशक्त्याऽध्यास्ते, सर्वमपि कार्यजातं पत्यौ नभसि नक्षत्रजातमिव तिष्ठति।

अपरञ्च पाशुपत-लकुलीशपाशुपतयोर्मोक्षस्वरूपे भेदः। पूर्वमते सर्वेषां दुःखानामन्त एव मोक्षः, अपरमते न केवलं दुःखान्तः, अपि तु पारमैश्वर्यावाप्तिर्मोक्षः। इदं सर्वं द्वैताद्वैतशैव-विषयकद्वितीयव्याख्याने स्पष्टतरं करिष्यते।

षड्दर्शनसमुच्चयकर्ता हरिभद्रसूरिः परस्परतो भिन्नानां परःशतं दर्शनानां सत्तां स्वीकुर्वन्नपि दर्शनानि धर्मोद्भवानीति मन्यमानो धर्म-मोक्षोपाय-मोक्षस्वरूप-दार्शनिकतत्त्वाद्याश्रयेण दर्शन-विभागं कुर्वाणः षडेव भारतीयदर्शनानि बौद्ध-नैयायिक-सांख्य-जैन-वैशेषिक-जैमिनीयाख्यानि प्रधानानीति मनुते, कथयति च यन्न्यायवैशेषिकदर्शनप्रवर्तयितारौ शैवावास्ताम्, मोक्षश्च तयोर्मते दुःखान्तस्वरूपः। तट्टीकाकारो मणिभद्रसूरिश्चाभिदधाति यत्तयोर्मते सृष्टिकारणमीश्वरः शिवो वा केवलं निमित्तकारणम्।

राजशेखरश्च स्वीयषड्दर्शनसमुच्चये तान्येव दर्शनानि प्रतिपादयन् न्यायदर्शनञ्च यौगनाम्ना समुल्लिखन्, शैवधर्मानुयायिनां शैवदार्शनिकानां वेषाचारगुरुपरम्परादिकमेवं वर्णयति—

अथ यौगमतं ब्रूमः शैवमित्यपराभिधम् ।
ते दण्डधारिणः प्रौढकौपीनपरिधायिनः ॥
कम्बलिकाप्रावरणा जटापटलशालिनः ।
अक्षपादो गुरुस्तेषां तेन ते ह्याक्षपादिकाः ॥ इत्यादि ।

एषां शैवानां चत्वारो भेदा हरिभद्रसूरिणैवं समुल्लिखिताः—
शैवाः पाशुपताश्चैव महाव्रतधरास्तथा ।
तुर्याः कालमुखा मुख्या भेदा एते तपस्विनाम् ॥ इति ।

गोविन्दानन्दश्च रत्नप्रभाख्यशाङ्करभाष्यव्याख्यायां पत्यधिकरणे निराक्रियमाणदर्शनपरिचयमित्थं ददाति—"लुञ्चितकेशमतनिरसनानन्तरं जटाधारिशैवमतं निराक्रियत इति प्रसङ्गसङ्गतिमाह—इदानीमिति" इति ।

अतः शाङ्करभाष्ये जटाधारिशैवमतनिराकरणस्य रत्नप्रभायां स्वीकृतत्वात्, हरिभद्रसूरिणा जटाधारिणां पाशुपतत्वेनाभ्युपगम्यमानत्वात्, उल्लिखितबहुग्रन्थकर्तृमतानुसारं पाशुपतैः शिवस्य निमित्तकारणत्वमात्रप्रतिपादनात्, मोक्षस्य दुःखान्तस्वरूपत्वावधारणाच्च न भ्रमितव्यं यत्पत्यधिकरणे लकुलीशपाशुपतदर्शननिराकरणमिति ।

द्वैतपाशुपतदर्शनप्रतिपादकः कोऽपि स्वतन्त्रो ग्रन्थो नास्माभिर्यावध्युपलब्धः । अतः केवलमेतावदेव शक्यतेऽस्य विषये वक्तुं यदस्मिन् दर्शने कारण-कार्य-योग-विधि-दुःखान्तरूपाः पञ्च-पदार्थाः, ये पाशुपतदर्शनोत्थानानन्तरभाविना लकुलीशपाशुपतनामकद्वैताद्वैतशैवदर्शनप्रवर्तकेन लकुलीशेनापि स्वीकृताः, ईश्वरः पतिर्वा निमित्तकारणम्, दुःखान्त एव च मोक्ष इत्यभ्युपगतम् । पदार्थानां स्वरूपविषये न किमपि सप्रमाणं शक्यते वक्तुम् ।

द्वैतशैवसिद्धान्तदर्शनम्

द्वैतशैवसिद्धान्तविषयकं विपुलं साहित्यमुपलभ्यत इति तस्य सविस्तरं व्याख्यानं सुशकम् । अस्य दर्शनस्य आधारभूता अष्टाविंशत्यागमाः । तेषु दश कामिकादयः पूर्वोपन्यस्ता द्वैतशैवसाधारणाः । अपरेऽष्टादश, येऽभिनवगुप्तपादैर्द्वैताद्वैतप्रतिपादकत्वेनोपन्यस्तास्ते शैवसिद्धान्तदार्शनिकैर्द्वैतपरत्वेन स्वीकृता व्याख्याताश्च, तेषां नामानीत्थम्—[१]विजय-[२]निश्वास-[३]मद्गीत-[४]पारमेश्वर-[५]मुखबिम्ब-[६]सिद्ध-[७]सन्तान-[८]नारसिंह-[९]चन्द्रांशु-[१०]वीरभद्र-[११]आग्नेय-[१२]स्वायम्भुव-[१३]विसर-[१४]रौरव-[१५]विमल-[१६]किरण-[१७]ललित-[१८]सौरभेया इति ।

अस्य प्रचारो दक्षिणभारते तेषु तेषु द्वैतशैवमठेषु केषुचन गृहेषु चाद्यापि वर्तत इत्यस्माभिर्दक्षिणभारते शैवागमसंग्रहं कर्तुं भ्रममाणैः प्रत्यक्षीकृतम्। ईशवीयनवमशतकादारभ्य द्वादशशतकपर्यन्तं चास्य प्रसारः काश्मीरे, चोले, लाटे, मध्यप्रदेशे, कान्यकुब्जे चासीदिति नातिदूरे तत्तद्देशजातद्वैतसिद्धान्तशैवव्याख्यातृनामोपन्यासपुरःसरं तत्कृतिवर्णनावसरे स्पष्टीकरिष्यामः। अस्य परम्परा च रौरवागमद्रष्टू रुरोः समयादारभ्य आत्रेयादिद्वारा मोक्षकारिकाकर्तृसद्योज्योतिपर्यन्तमविच्छिन्ना आसीदिति मोक्षकारिकातट्टीकाकारवचनाभ्यामवगम्यते। यथाहतुः—

शिवात् परम्परायातौ भोगमोक्षौ ससाधनौ।
आत्रेयाय मुनीन्द्रेण रुरुणा संप्रकाशितौ॥
मन्दबुद्धिप्रबोधाय करुणाविष्टधीः स्फुटम्।
सद्योज्योतिस्तु संक्षेपात्तावेतौ परिबद्धवान्॥
यं चानुशासयामास भगवानीशसम्मतः।
उग्रज्योतिर्गुरुः श्रीमान् सर्वविद्यासरित्पतिः॥ इति,

"गुर्वाम्नायतोऽविच्छिन्नस्मरणसन्ततेरेव पारमेश्वरत्वेनैतत्प्रतीयते" इति च।

(मो० का० ६२-३)

शैवसिद्धान्तप्रतिपादकाष्टाविंशत्यागमटीकाकाराः सैद्धान्तिकनिबन्धलेखकाश्च

१. सद्योज्योतिः

सद्योज्योतिः खेटपाल-खेटकनन्दनेत्यपरनामद्वयेन प्रसिद्धो द्वैतशैवसिद्धान्तप्रतिपादकत्वेनाभिनवगुप्तपादैस्तन्त्रालोके मलस्य द्रव्यत्वनिराकरणे प्रत्यभिज्ञासम्मतषट्त्रिंशत्तत्त्वप्रतिपादने चोद्धृतः। अतः स ईशनवमशतके समभूदिति प्रतीयते। एतल्लिखिता इमे ग्रन्थाः—

१. रौरवागमटीका, २. स्वायम्भुवागमटीका, ३. तत्त्वत्रयनिर्णयः, ४. भोगकारिका, ५. मोक्षकारिका, ६. तत्त्वसंग्रहः, ७. परमोक्षनिरासकारिका च।

अनेन सर्वतः प्रथमं रौरवागमप्रतिपादितशैवदर्शनार्थे 'सिद्धान्त'शब्दः प्रयुक्तः। यथाह—

रुरुसिद्धान्तसंसिद्धौ भोगमोक्षौ ससाधनौ।
वच्मि साधकबोधाय लेशतो युक्तिसंस्कृतौ॥ इति। (मो० का० ७९)

तदनन्तरं श्रीकण्ठकृतरत्नत्रयटीकाकारश्रीमदघोरशिवाचार्यवचनानुसारं 'सिद्धान्त'शब्दः पङ्कजादिशब्दवद्योगरूढ्या शिवप्रणीतेषु दशाष्टादशसु तन्त्रेषु प्रसिद्धिं गतः। (र० त्र० ५)

२. बृहस्पतिः

बृहस्पतिः सद्योज्योतिसमकालिक आसीदिति प्रतीयते, तन्त्रालोके प्रथमाष्टमनवमाह्निकेषु तन्मतप्रतिक्षेपात्, अघोरशिवाचार्येण मोक्षकारिकाटीकायां द्वयोरपि सममुपन्यासाच्च। यथाह—

याभ्यां प्रकाशितं वर्त्म सिद्धान्ते सिद्धभावतः।
गुरूणामपि तौ वन्द्यौ सद्योज्योतिबृहस्पती॥ इति।

(मो० का० १)

एकैवास्य कृतिः शिवतनुशास्त्राभिधाऽद्यावधि तन्त्रालोकवाक्यमात्राज्ज्ञायते।

३-४. शङ्करनन्दनदेवबलौ

शङ्करनन्दनदेवबलयोर्मते प्रत्याख्येयत्वेन निर्दिष्टे जयरथेन स्वीयतन्त्रालोकटीकायाम्, अतो ज्ञायते यदिमावपि द्वैतशैवावास्ताम्। यथाह —

सद्योज्योति-देवबल-शङ्करनन्दन-कणभुगादिमतम्।
प्रत्याख्यास्यन्नवममाह्निकं व्याचख्यौ जयरथः॥ इति।

देवबलस्य काऽपि कृतिः केनाप्यन्येनोल्लिखितत्वेनापि न ज्ञायते। परन्त्वाचार्याभिनवगुप्त ईश्वरप्रत्यभिज्ञाविमर्शिन्यां शङ्करनन्दनकृतिं प्रज्ञालङ्कारनाम्नीं संकेतयति परमाणुवादनिरसनावसरे (भा०, भा० १,२२५), कथयति च यत्परमाणुवादनिरासः शङ्करनन्देन सविस्तरं प्रज्ञालङ्कारे कृतः। जानीमो वयं यत् शैवाद्वैतवादिनः शैवद्वैतवादिनश्च परमाणुवादं खण्डयित्वा मायावादं स्थापयन्ति स्म। अत इदं प्रतिभाति यत्प्रज्ञालङ्कारे शङ्करनन्दनः परमाणुवादं निरस्य मायावादं स्थापितवानिति। अयमप्यभिनवगुप्तेनास्य मतस्योल्लिख्यमानत्वात् तत्पूर्वभावी ईशवीयनवमशतकभवः प्रतिभाति।

काश्मीरे द्वैतशैवसिद्धान्तः

सद्योज्योतिमहाभागस्य महान्तोऽनुयायिनः काश्मीरे समभूवन्निति स्पष्टीभवति तन्निर्मितमोक्षकारिकाया उपरि काश्मीरिकद्वितीयरामकण्ठकृतायाष्टीकाया दर्शनेन। तत्र चेदं पद्यमस्ति टीकान्ते—

इति मोक्षकारिकायां नारायणकण्ठसूनुना रचिता।
संक्षेपाद् वृत्तिरियं शिष्यहिता भट्टरामकण्ठेन॥ इति।

द्वितीयो रामकण्ठः काश्मीरिक आसीदिति नादकारिकान्ते तद्वचनादेवावगम्यते, यथाह—

इति नादसिद्धिमेनामकरोच्छ्रीरामकण्ठोऽत्र ।
नारायणकण्ठसुतः काश्मीरे वृत्तपञ्चविंशत्या ॥ इति ।

अद्वैतशैवदर्शनव्याख्यातारः सोमानन्दकल्लटोत्पलदेवलक्ष्मणगुप्ताभिनवगुप्तक्षेमराजादयः सुप्रसिद्धाः । द्वैतशैवसिद्धान्तप्रतिपादकौ काश्मीरिकावेकवंशजातौ द्वौ रामकण्ठावास्तामिति नातिदूरे साधयिष्यते ।

प्रथमो रामकण्ठो न केवलमद्वैतप्रतिपादिकायाः स्पन्दकारिकायाष्टीकां व्यदधादपि तु सद्वृत्तिनामकमपरमपि द्वैतपरं ग्रन्थं व्यलिखत्, यस्यानुकरणं श्रीकण्ठः स्वीयरत्नत्रयेऽकरोदिति तद्ग्रन्थसमाप्त्युपलभ्यमानाद्वाक्यद्वयात् स्पष्टीभवति । यथाह—

"कृतिः श्रीमदुत्पलदेवपादपद्मोपजीविनः । श्रीमद्राजानकरामकण्ठस्य" इति ।

श्रीरामकण्ठसद्वृत्तिं मयैवमनुकुर्वता ।
रत्नत्रयपरीक्षेयं कृता श्रीकण्ठसूरिणा ॥ इति च ।

अयं प्रथमो रामकण्ठो मृगेन्द्रतन्त्रवृत्तिकर्त्रा नारायणकण्ठेन स्वद्वैतगुरुपरम्परामुल्लिखता इत्थं वर्णितः—

साक्षाच्छ्रीकण्ठनाथादिव सुकृतिजनानुग्रहायावतीर्णा-
च्छ्रुत्वा श्रीरामकण्ठाच्छिवमतकमलोन्मीलनप्रौढभास्वान् । (मृ० वृ० १)

अत इदं स्पष्टं यत् काश्मीरे द्वैतशैवसिद्धान्तप्रतिपादकाः क्रमेणैवमभूवन्—

रामकण्ठः प्रथमः ।

श्रीकण्ठः रत्नत्रयकर्ता ।

नारायणकण्ठो विद्याकण्ठद्वारा प्रथमरामकण्ठप्रशिष्यो मृगेन्द्रवृत्तिकारः ।

रामकण्ठो द्वितीयो नारायणकण्ठसुतः ।

अनेन बहूनां सिद्धान्तागमानामुपरि टीका लिखिताः । तासु मतङ्गागमटीका हस्तलिखिता कलिकातास्थराजकीयसंस्कृतविद्यालयेऽद्यापि समुपलभ्यते ।

तत्पूर्वमाविभिराचार्यैरर्थतत्त्वसमीक्षाऽद्वैतदृष्ट्या द्वैतदृष्ट्या च कृता आसीत् । हेलाराजः, यो वाक्यपदीयतृतीयकाण्डटीकावसाने आत्मानं काश्मीरराजमुक्तापीड(७३३ ई०)मन्त्रि-

लक्ष्मणवंशजत्वेन भूतिराजतनयत्वेन चोल्लिखति, भूतिराजश्चाभिनवगुप्तपादगुरुरासीदिति ईशवीय-दशमशताब्द्यां समभूत्—सोऽर्थतत्त्वमद्वैतदृष्ट्या प्रत्यपादयत्। श्रीकण्ठश्च रत्नत्रये द्वैतदृष्ट्या तद्विवेचनमकरोत्। द्वैतदृष्टिमनुसरता द्वितीयेन रामकण्ठेन स्वीयनादकारिकायां सिद्धान्तशैवमतानुसारं स्फोटवादः समालोचितः। पुरा सद्योज्योतिः मोक्षकारिका-परमोक्षनिरासकारिकेतिप्रसिद्धकृतिद्वये परदर्शनसम्मतमोक्षस्वरूपखण्डनमकरोत्। द्वितीयो रामकण्ठः स्वकृततट्टीकयोः–(१) उत्पत्तिसमतापक्षम्, यदनुसारं सर्वज्ञत्वं सर्वशक्तिमत्त्वं च जीवे न नैसर्गिके, अपि तु मोक्षे उत्पद्येते; (२) लकुलीशपाशुपतीयं समतासंक्रान्तिपक्षम्, यदनुसारं कस्तूरीगन्धो वस्त्रमिव सर्वज्ञत्वसर्वशक्तिमत्त्वे शिवान्मुक्ते संक्रामतः; (३) आवेशपक्षम्, यदनुसारं स्वस्थानस्थो ग्रहः पुरुषविशेषमिव शिवस्थे सर्वज्ञत्वसर्वकर्तृत्वे मुक्तमाविशत इति मतत्रयं निरस्य चतुर्थमभिव्यक्तिपक्षमस्थापयत्, यदनुसारं जीवे स्वाभाविके सर्वज्ञत्वसर्वकर्तृत्वे मलतिरोहिते व्यपगतमले मुक्तेऽभिव्यक्तीभवतः। अस्यान्यत् कृतिद्वयं (१) मन्त्रविवेकटीका, (२) आगमविवेक इतिनामकं मोक्षकारिका(पृ० ४)-परमोक्षनिरासकारिका(पृ० ४९)समुद्धरणाभ्यामेव ज्ञायते।

मध्यप्रदेशे गुर्जरप्रदेशे च शैवसिद्धान्तप्रचारः

धारानगरीभवो राजा भोजः (१०१८-६०ई०) योऽलङ्कारशास्त्रवास्तुशास्त्रयोः प्रतिपादकत्वेन सर्वसम्मतः, सः स्वलेखनीं द्वैतसिद्धान्तशैवमतप्रतिपादनायाप्युपयुनक्ति स्मेति तदीयात् तत्त्वप्रकाशिकेति नाम्नो ग्रन्थादवगम्यते। तत्त्वप्रकाशिकाटीकाकर्तुरघोरशिवस्य वचनादस्या उपरि कैश्चन सिद्धान्तशैवरहस्यमजानानैरद्वैतदृष्ट्या टीकाः कृता आसन्निति बुध्यते। यथाह—

अद्वैतवासनाविष्टैः सिद्धान्तज्ञानवर्जितैः।
व्याख्यातोऽत्रान्यथान्यैर्यत् स ततोऽस्माकमुद्यमः॥
(त० प्र० १)

इयं विद्यारण्ययतीन्द्रेण स्वसूतसंहिताटीकायां प्रमाणत्वेनोपन्यस्ता। अस्यां षट्त्रिंशत्तत्त्वानि स्वीक्रियन्ते, शक्तेः शिवे समवायसम्बन्धेन विद्यमानताभ्युपगम्यते। शिवश्च तत्त्वातीतो गीयते।

अघोरशिवकृतपद्धतिवाक्यादिदमवगम्यते यद् भोजराजस्य गुरुर्गुर्जरदेशदक्षिणभागलाटस्थकल्याणनगरीवासिन उत्तुङ्गशिवस्य कनीयान् भ्राता आसीदिति, यथाह—

ततोऽभूल्लाट उत्तुङ्गशिवो विन्ध्ये यतीश्वरः ।
कल्याणनगरीवासी गुरुः पद्धतिकृत् सुधीः ॥
सर्वविद्याधिपो यस्य कनीयानार्यदेशजः ।
सर्वागमार्थनिर्णेतुः श्रीभोजनृपतेर्गुरुः ॥ इति ।

द्वैतसिद्धान्तशैवदर्शनप्रचारो दक्षिणभारते

अघोरशिवाचार्यो द्वैतसिद्धान्तशैवदर्शनप्रतिपादकानां बहूनां ग्रन्थानामुपरि टीका लिखितवान्। स च चोलदेशीयकुण्डिनकुलवास्तव्यः स्वीयां 'पद्धतिम्' अष्टपञ्चाशदधिकैकादशशततमे ईशवीयसंवत्सरे समापितवानिति बुध्यते पद्धतिसमाप्तावुल्लिखितात्तद्वचनात्, यथाह—

"नादज्ञेये शकस्याब्दे वर्तमाने कलौ युगे" इत्यादि ।

तत्त्वत्रयनिर्णयटीकान्ते समुपलब्धश्लोकाच्च तत्स्थाननिर्णयः । यथाह—

श्रीमद्घोरशिवाह्वयेन गुरुणा श्रीजन्यया व्याख्यया
लोकेऽपि प्रथितेन कुण्डिनकुलं चोलेष्वलङ्कुर्वता ॥ इति ।

(त० त्र० नि० टी० २२)

स च लक्षद्वयशिष्याध्यापक आसीदिति स्वयं तत्त्वप्रकाशिकादिटीकासमाप्तिषूद्घोषयति ।

अयं न केवलं महान् टीकाकारः स्वकाले च द्वैतसिद्धान्तशैवदर्शनप्रतिपादकानामग्रेसरः, अपि तु महान् कविर्नाटकलेखकश्चासीत् । इमास्तत्कृतयः—

काव्यानि—[1]आश्चर्यसारः, [2]पाखण्डापजयः, [3]भक्तप्रकाशः । नाटकम्—अभ्युदयः । द्वैतशैवग्रन्थटीकाः—[1]भोजकृततत्त्वप्रकाशिकायाष्टीका, सद्योज्योतिकृततत्त्वसंग्रह[2]-तत्त्वत्रयनिर्णय[3]-भोगकारिकाणां[4] टीकाः, द्वितीयरामकण्ठकृतनादकारिकायाष्टीका[5], श्रीकण्ठकृतरत्नत्रयस्य[6] टीका, नारायणकण्ठकृतमृगेन्द्रागमवृत्तेष्टीका[7] च ।

कान्यकुब्जे द्वैतसिद्धान्तशैवदर्शनप्रचारः

काश्मीरिकरामकण्ठद्वयविषये पूर्वं किञ्चिदुक्तम्। अयमपरो रामकण्ठो भगवद्गीतायाः सर्वतोभद्राभिधटीकाया रचयिता स्वात्मानं कान्यकुब्जदेशजातनारायणवंशजमुक्ताकणस्य कनीयांसं भ्रातरं वक्ति । मुक्ताकणश्च काश्मीरराजावन्तिवर्मणो राजसभायामेकः कविरासीदिति सुप्रसिद्धम् । एवञ्च यदि रामकण्ठेन स्वभ्रातृतयोल्लिखितमुक्ताकणस्य अवन्तिवर्मराजसभाकविना सहैक्यं स्वीक्रियेत,

तर्हि एवं प्रतिभाति यत्कश्चन एतस्य रामकण्ठस्य पूर्वजः अभिनवगुप्तपूर्वजवत् कान्यकुब्जात् काश्मीरं ललितादित्यनेनानीतः। अतः शक्यत इदं वक्तुं यत् कान्यकुब्जेऽपि सिद्धान्तशैवदर्शन-प्रचार आसीदिति, यद्यपि सन्देहलेश एतद्विषयेऽस्तीति स्वीकार्यमेव।

अतो नवमाद् ईशवीयशतकादारभ्य ईशवीयद्वादशशतकपर्य्यन्तं द्वैतसिद्धान्तशैवमतस्य प्रचारो गुर्जरे, चोले, मध्यप्रदेशे, कान्यकुब्जे, काश्मीरे चासीदिति सिध्यति।

द्वैतशैवसिद्धान्तदर्शनस्य दार्शनिकविवरणम्

द्वैतशैवसिद्धान्तदर्शनस्य मौलिकसिद्धान्तानां वैशेषिक-न्याय-सांख्य-वेदान्त-पाशुपताद्यपर-दार्शनिकसिद्धान्तेभ्यो महान् भेदः। स चास्य दर्शनस्य स्वतन्त्रां सत्तां स्वीकुर्वद्भिः सम्यगवधेय इति यथायथं निरूप्यते।

द्वैतशैवसिद्धान्तवैशेषिकदर्शनयोः सैद्धान्तिका भेदाः ✓

१. द्वैतशैवसिद्धान्तस्वीकृतो जगदुत्पत्तिसिद्धान्तस्तद्विषयकवैशेषिकसिद्धान्ताद्भिन्नः। सिद्धान्तशैवदर्शनं सांख्यसिद्धान्तेन सह बहुष्वंशेषु साम्यं भजमानं परिणामवादं स्वीकरोति। एतन्मते माया विपरिणमते, पूर्वावस्थां परित्यज्य पयो दधिवदवस्थान्तरं परिगृह्णाति। इदं सत्कार्य-वादमप्यनुसरति, मनुते च यत् पयसि विद्यमानमेव दधि अभिव्यक्तीभवति। एवञ्च एतस्मिन्मते मायैव कलाविद्यारागनियतिकालादिरूपव्याख्यास्यमानतत्त्वरूपैः परिणमते। परं माया न सर्वथा, अपि त्वंशेनैव घृतकीटन्यायेन रूपान्तरं गृह्णाति। यथा घृतं तत्पतितकीटकारणात् कस्मिंश्चिदंश एव रूपान्तरं परिधत्ते तथैव मायाऽपि। अतः सत्कार्यवादिद्वैतसिद्धान्तशैवदर्शनमसत्कार्यवादि-वैशेषिकदर्शनाद्भिन्नम्।

२. कर्म चैतद्दर्शने बुद्धिधर्मो न तु वैशेषिकवदात्मधर्मः, यतोऽस्यात्मधर्मत्वे स्वीक्रियमाणे धर्मभूतस्य कर्मण उपचयापचयाभ्यां धर्मिण आत्मनो विकारित्वापातः।

३. यत्किञ्चिदप्यचेतनं सदनेकं तत्सर्वमनित्यमिति मन्यन्ते सिद्धान्तशैवाः। अत एतन्नये भूतभविष्यद्वर्तमानादिभेदभिन्नोऽचेतनः कालोऽनित्यः, न तु वैशेषिकवन्नित्यः।

४. पूर्वोक्तनयानुसारं न्यायवैशेषिकस्वीकृतमचेतनानामसंख्याकानां च परमाणूनां नित्यत्वं सर्वथाऽसंगतमिति मन्यन्ते सिद्धान्तशैवाः।

५. आत्मा च एतन्नये ज्ञानस्वरूपः, न तु ज्ञानमात्मगुणो यथा वैशेषिकदृशि।

सिद्धान्तशैवसांख्ययोर्भेदः

वक्ष्यमाणांशेषु सिद्धान्तशैवसांख्ययोः पारस्परिको महान् भेदः—

१. पुरुषः पुष्करपलाशवन्निर्लेप इति सांख्यमतविरोधि पुरुषस्यानादिमलोपेतत्वं सिद्धान्तशैवैरभ्युपगम्यते, पुरुषस्यात्मनो वा नैर्मल्ये स्वीकृते भोगाभावप्रसङ्गात्; भोगस्य स्वाभाविकत्वाभ्युपगमे मुक्तस्यापि तत्प्रसङ्गात्। भोगासक्ती रागजन्या, रागश्च बुद्धिधर्मः, अतः पुरुषस्य नैर्मल्ये स्वीकृतेऽपि भोगासक्तिः सम्भवतीति न शक्यते वक्तुं सांख्यैः, यतो रागव्यापारः समलपुरुषसम्बन्धे सत्येव सम्भवति।

२. भोगोऽस्मिन्मते सांख्यसम्मतभोगाद्विलक्षणः। सांख्याभ्युपगतो भोग इत्थं व्याख्यातः—भोगश्चतुष्टयमपेक्षते—

१. बुद्धिपतितस्वप्रतिबिम्बतादात्म्यापन्नं पुरुषम्,

२. आन्तरपुरुष-बाह्यवस्तुजातप्रतिबिम्बग्राहिणीं बुद्धिम्,

३. बुद्धिप्रतिबिम्बितविषयम्,

४. अहङ्कारं च, यः (क) पुरुषप्रतिबिम्बं विषयप्रतिबिम्बेन संयोजयति, (ख) पुरुषप्रतिबिम्बं पुरुषेणैकीकरोति, (ग) पुरुषतत्प्रतिबिम्बतादात्म्यं व्यवहारार्थमुपयुनक्ति, (घ) 'अहमिदं जानामि' इति धियञ्च जनयति।

सांख्यसम्मतभोगस्वरूपञ्चाभिनवगुप्तपादैनैवमुल्लिखितमीश्वरप्रत्यभिज्ञाविवृत्तिविमर्शिन्याम्—"बुद्धिरूपं यत् सत्त्वं तस्य यतो नैर्मल्यं रजोऽपसारणसहिष्णुता तदीयतमोभागस्य, न तु नीलादाविवानपसारणीयत्वम्, ततो हेतोरुभयीमप्यात्मनो विषयस्य च संबन्धिनीं रूपच्छायां संवेदननीलमयतामनुकरोति, तदाकारधारितया भासते, नीलरक्तपटमध्यस्थितसितवस्त्रवत्, ततो हेतोस्तत्प्रतिबिम्ब आत्मविषयप्रतिबिम्बे यतो युज्यते, ततो विषयबोधस्वभावो भोगः सिध्यति। स हि ग्राह्यस्य ग्राहकस्य च यो मेलनात्मा सम्बन्धस्तद्रूपतयैव लक्षितः, नान्यदस्य रूपमित्याशयः।" (ई० प्र० वि० वि०, भा० १, पृ० १५३) इति, "बुद्धिबोधं हि यदात्मन्यविशिष्टतया अहङ्कारो व्यवहरति स एवायं भोगः" (ई० प्र० वि० वि०, भा० १, पृ० १५५) इति च। परन्तु सिद्धान्त-शैवमतानुसारं भोगो बाह्यविषयप्रतिबिम्बापतनात्तद्रूपेण परिणताया दर्पणसदृश्या बुद्धेः पुरुषेणानुभव-मात्रस्वरूपः। भोगे सत्यतो न पुरुषो बुद्धिपरिणामेन संसृष्टिं भजते, अपि तु तस्य विषयप्रतिबिम्ब-परिणतबुद्ध्या तथैव संसर्गो यथा जलराशिप्रतिबिम्बितस्य चन्द्रमसो जलेन। अत एतन्मते चेतनः पुरुष एव भोक्ता कर्ता च, न त्वचेतनं बुद्ध्यादि, तेषां विषयस्वरूपत्वादचेतनत्वाच्च।

सिद्धान्तशैवदर्शनस्याद्वैतवेदान्ताद् भेदः

सिद्धान्तशैवदर्शनमद्वैतवेदान्तदर्शनाद्वक्ष्यमाणेष्वंशेषु भिन्नम्—

१. इदं जीवब्रह्मणोरैक्यं न मनुते। असंख्यानां जीवानां ब्रह्मणः पृथक् सत्तां स्वीकरोति, अभ्युपगच्छति च यत्ते भोगमोक्षार्थं परमात्मपरतन्त्राः।

२. जगदुपादानकारणमेतन्नये निमित्तकारणाद्भिन्नम्, न त्वद्वैतवेदान्तमत इवैकमेव। सिद्धान्तशैव उद्भावयति दोषमेकत्वाभ्युपगमे यत् कार्ये कारणधर्मानुगमस्य सर्वैरभ्युपगम्यमानत्वात् कार्यभूतस्य जगतश्चेतनाचेतनरूपत्वाद् ब्रह्म न केवलं चित्स्वरूपमपि त्वचित्स्वरूपमपि वेदान्तिभिरभ्युपेयं स्यात्।

३. समालोचयत्यद्वैतं वेदान्तिनां कथयन् यद् वेदान्तिभिर्ज्ञानं मोक्षोपाय इति स्वीक्रियते, परं क्वास्ति संभव उपायोपेयभेदस्य परमाद्वैत इति।

द्वैतपाशुपतात् सिद्धान्तद्वैतस्य भेदः

यद्यपि सिद्धान्तशैवद्वैतं पाशुपतद्वैताद्भिन्नम्, तथापि बह्व्यः पाशुपतदर्शनविचारधाराः सिद्धान्तशैवदर्शनेन स्वीकृता इति स्पष्टं प्रतिभाति। पाशुपतदर्शने कारण-कार्य-योग-विधि-दुःखान्त-रूपाः पञ्च पदार्थाः समभ्युपगताः, परन्तु सिद्धान्तशैवदर्शने पतिपशुपाशास्त्रय एव प्रतिपाद्यन्ते। परन्तु सूक्ष्मे विचारे क्रियमाणे स्पष्टीभवतीदं यत् सिद्धान्तशैवाभ्युपगतः पतिपदार्थः पाशुपतदर्शनादेव परिगृहीतः, यतः पाशुपतैः कारणशब्देन व्यपदिष्टात् प्रथमपदार्थात् सिद्धान्तशैवप्रतिपादितस्य पतिपदार्थस्य न कोऽपि भेदः प्रतीयते। तथ्यं त्विदं यल्लकुलीशो यः स्वीयपाशुपतसूत्रे पूर्वभाविद्वैतपाशुपतदर्शनात् पञ्च पदार्थान् परिगृह्णाति स्म स कारणार्थे पतिशब्दं प्रयुङ्क्ते, यथा व्याख्यातं तट्टीकाकृता कौण्डिन्येन—"पशुपतेरिति कार्यकारणयोः प्रसादस्य चोद्देशः" इति। पशोः पाशस्य चापि विचारो द्वैतपाशुपतदर्शने कृत आसीदिति तन्मतं प्रतिपादयतः शङ्कराचार्यस्य वचनादवगम्यते। यथाह—"पञ्च पदार्थाः पशुपतिनेश्वरेण पशुपाशविमोक्षणायोपदिष्टाः" इति। अतः पशुपाशविषयिणीं विचारधारामनुसरन्तः सिद्धान्तशैवाः पशुपाशनामकपदार्थाभ्युगमेऽपि द्वैतपाशुपतदर्शनप्रभाविता इति भाति।

सिद्धान्तशैवैर्धर्मदर्शनयोः पार्थक्यं भारतीयापरदार्शनिकवत्कृतमिति धर्माश्रितं द्वैतपाशुपतस्वीकृतं योगविधिदुःखान्तस्वरूपपदार्थत्रयं पदार्थेषु न गणितम्। एवं पाशुपतदर्शनप्रभाविताः सिद्धान्तशैवाः पदार्थत्रयं स्वीकुर्वन्ति।

सिद्धान्तशैवानां जगदुत्पत्तिकारणसिद्धान्तोऽपि पाशुपतदर्शनादेवोपात्तः, यतस्तैरपि उपादाननिमित्तकारणयोः पार्थक्यं प्रतिपाद्यते। परं मुक्तिस्वरूपविषये तयोर्भेदः सुस्पष्टः। द्वैतपाशुपतमते दुःखान्त एव मोक्षः, परन्तु सिद्धान्तशैवमते शिवसाम्यं मोक्षः।

सिद्धान्तशैवदर्शनस्य वैयाकरणदर्शनाद् भेदः

वैयाकरणदर्शनेतिहासः संक्षिप्तरूपेणागमपरिषद्युपस्थापितः, विस्तारश्चास्याग्रे करिष्यते। भर्तृहरिः स्वीयवाक्यपदीये, तत्समालोचकः सोमानन्दश्च शिवदृष्टौ वैयाकरणदर्शनस्याऽद्वैतपरम्परामनुसृतवन्तौ। सिद्धान्तशैवदार्शनिकै रत्नत्रयकृच्छ्रीकण्ठ-नादकारिकाकृद्द्वितीयरामकण्ठादिभिस्तु तस्य द्वैतपरम्परागताः सिद्धान्ता निबध्यन्ते स्म।

सिद्धान्तशैवमते शुद्धसृष्ट्युपादानस्वरूपो बिन्दुः 'परा' इत्यप्युच्यते। स च प्रथमोऽवान्तरपदार्थः। वाचः सूक्ष्मा-पश्यन्ती-मध्यमा-वैखरीतिरूपचतुष्टयं बिन्दुसम्बद्धमित्यादि तन्मतं सत्यवसरेऽग्रे व्याख्यास्यते।

✓ सिद्धान्तशैवाभ्युपगतानि तत्त्वानि

तत्त्वलक्षणम्—सिद्धान्तशैवानां तत्त्वलक्षणं महार्थसंहारेणातीव संबद्धम्। एतन्मते तत्तत्त्वं यन्महार्थसंहारे महाप्रलयेऽपि वा तिष्ठति, सर्वेषां सांसारिकाणां विश्वोत्तीर्णानां चानुभवानां साक्षात्परम्परया वा पृष्ठभूमिः। महाप्रलये सर्वमपि मायाया महामायायाश्च कार्यजातं स्वोपादानकारणे निमज्याऽभेदरूपेणास्ते। इयञ्च कार्याणां स्वोपादानाऽभेदावस्था सृष्टिभाविबहुत्वस्य कारणशक्तिरूपा। सृष्टिश्च द्विविधा—शुद्धा, अशुद्धा च। एवं मायापि द्विविधा—एका सा यस्याः कार्यजातं सांसारिकानुभवस्य कारणम्, अपरा च सा यस्याः कार्याणि विश्वोत्तीर्णानुभवानां मन्त्र-मन्त्रेश-मन्त्रमहेशैरनुभूयमानानां कारणत्वेन स्वीक्रियन्ते। सा च महामायेत्युच्यते। महाप्रलये सर्वाण्यप्यनुभवकारणानि वक्ष्यमाणरूपायां शक्तौ प्रलीयन्ते, सा च महामायायाम्।

त्रीणि तत्त्वानि

अतो जगत्सृष्टिकारणसिद्धान्तं प्रतिपादयद्भिः सिद्धान्तशैवैस्त्रीणि प्रधानतत्त्वान्यभ्युपगम्यन्ते—१ महामाया, २ पुरुषः, ३ शिवश्चेति।

इदमिहावश्यं वक्तव्यं यद्यदा जगत्सृष्टिकारणसिद्धान्तस्तेषां मनसि न प्रधानीभवति तदेदं तत्त्वत्रयं पतिः, पशुः, पाश इति नामत्रयेण ते कथयन्ति। यद्यपि पतिपशुशब्दौ शिवपुरुषपर्यायौ, तथापि महामायापाशयोरत्यन्तं पारस्परिको भेदः। यतो मुख्यतत्त्वत्रये स्वीकृतः पाशो महामायापेक्षयाऽ-

तीव व्यापकः, पाशान्तर्गतेषु मल-माया-रोधशक्ति-कर्म-बिन्दुरूपाऽमुख्यपदार्थेषु बिन्दोर्महामायापर्य्यायत्वेन स्वीकरणात् ।

सिद्धान्तशैवद्वैते षट्त्रिंशत्तत्त्वस्वीकारः

यद्यपि मुख्यं तत्त्वत्रयमेव स्वीकुर्वन्ति सिद्धान्तशैवाः, तथापि तदन्तर्गतं पदार्थषट्त्रिंशकमपि मन्यन्ते । षट्त्रिंशत्तत्त्वविषये शिद्धान्तशैवदर्शनव्याख्यातॄणां पारस्परिको मतभेदस्तत्र तत्रोपलभ्यते । पत्यन्तर्गतानि शिव-शक्ति-मन्त्रमहेश-मन्त्रेश-मन्त्ररूपाणि पञ्च, पशुं विज्ञानाकल-प्रलयाकल-सकलेत्यवान्तरभेदभिन्नमप्यवान्तरभेदानुपेक्ष्य एकम्, पाशान्तर्गतं मल-निरोधशक्ति-माया-बिन्दु-कर्मरूपपञ्चाप्रधानतत्त्वस्वीकारेऽपि चत्वार्यप्रधानतत्त्वानि न गणयित्वा मायामेकाम्, मायापरिणामभूतं कला-नियति-राग-विद्या-कालसहितं सांख्यस्वीकृतप्रकृत्यादिपृथिव्यन्तचतुर्विंशतिं चैकीकृत्य षट्त्रिंशत्तत्त्वानि परिगण्यन्ते कैश्चन । एवं भाति यदियं षट्त्रिंशत्तत्त्वपरिगणनाऽद्वैतागमानां द्वैतव्याख्यां समर्थयितुं कृता । अपरैश्चावान्तरषट्त्रिंशत्पदार्थाः काश्मीराद्वैतस्वीकृतनामभिरेव निर्दिष्टाः ।

सिद्धान्तशैवाभ्युपगतमुख्यपदार्थत्रयस्वरूपम्

१. पतिः—विश्वोत्तीर्णः शिवः

पतिनामकं विश्वोत्तीर्णशिवापराभिधं सिद्धान्तशैवस्वीकृतं प्रथमं तत्त्वं वेदोपलब्धस्य देवस्य पशुपतेः परिवर्धितं रूपमिवाभाति । वेदे पशुपतिश्चतुष्पदानामेव पतिः, इह तु स सर्वेषां पतिः । वेदे स चतुष्पदपालनशक्तः, इह तु सर्वशक्तिमान् ।

पतिरेकः, सर्वव्यापी, नित्यः, अनाद्यन्तः, अनादिमुक्तः, निर्मलः, चिद्घनः, प्रभुः, शान्तः, अकारणकारणम्, सर्गादिकार्याणां कर्ताऽप्यविकारः, कमलोन्मीलनकर्ता उष्णगभस्तिरिव, स निमित्तकारणं जगतः, उपादानकारणं तच्छक्तयः, माया च समवायिकारणम् । यथोक्तम्—

निमित्तकारणं त्वीशो ह्युपादानं च शक्तयः ।
समवायि तथा माया कार्यमेतज्जगत्त्रयम् ॥ इति ।

(म० पा० ३७)

शक्तिस्तस्योपादनभूता यया स विश्वं सृजति, यत्र जीवाः स्वस्वकर्मानुसारं सुखानि दुःखानि वाऽनुभवन्ति, अन्ते च पतिस्तान् पाशमुक्तान् करोति । इयमेका, यद्यपि सा भिन्नसर्जनीयसंबन्धा-

द्भिन्नेव भाति। इयमपि परमार्थतश्चित्स्वरूपैव, अतश्च मायेव न विपरिणमते। पत्या सहैतस्याः समवायः सम्बन्धः। यथाह—

शक्तो यया स शम्भुर्मुक्तौ मुक्तौ च पशुगणस्यास्य।
तामेकां चिद्रूपामाद्यां सर्वात्मनाऽस्मि नतः॥ इति।
(त० प्र० ५)

आद्यां प्रधानभूतां समवेताम् (त० प्र० टी० ५)। परन्तु श्रीकण्ठकृते रत्नत्रये शिवस्य शक्त्या संबन्धः सूर्यस्य स्वरश्मिभिरिवाभ्युपगतः (र० त्र० २)। इयममोघा अपरिच्छिन्ना अत एवाविकल्परूपा, अकारणा, स्वप्रकाशा, सर्वोत्तीर्णा, अतिसूक्ष्मा, शिवादनन्यभूतापि शिवे धर्मिणि धर्मरूपेण तिष्ठतीत्यभ्युपगम्यमाना सिद्धान्तशैवानां द्वैताद्वैतप्रभावितत्वं गमयति। इदञ्च रत्नत्रयोल्लिखिताया अपरस्या विचारधारायाः प्रेक्षणेन समर्थ्यते। तत्रेदमभ्युपगम्यते यच्छिवशक्त्योरैकात्म्यम्, उभयोश्चित्स्वरूपत्वात्। परन्तु तयोः सम्बन्धकृतः कार्यकृतो न्यायाश्रितश्च भेदः। यतः स्वनिष्ठा चिच्छिवः, ज्ञानार्थे विषयाश्रिता च चिच्छक्तिः। तयोश्च धर्मधर्मिरूपः सम्बन्धः। शिवः परानपेक्षः, परं शक्तिः परापेक्षिणी। यथा अग्नेर्दाहकशक्तिर्दाह्येन्धनादिसंबद्धैवाभिव्यक्तीभवति, तथैव शिवस्य शक्तिर्बाह्यजगत्संबद्धैव स्वात्मानमभिव्यनक्ति।

सिद्धान्तशैवाः खण्डयन्ति शक्त्यद्वयवादम्, यदनुसारं शक्तिरेव जगत्कारणं शिवश्च व्यर्थोऽभ्युपगमः। शिवाभ्युपगमं समर्थयन्ति च धर्मरूपायाः शक्तेर्धर्मिणं शिवं विना सद्भावस्यान्याय्यत्वं वदन्तः।

एवञ्च केषुचित् स्थलेषु प्रकरणानुसारं शिवस्य शक्तिद्वयं वर्णितम्, यत्र चिच्छब्दो ज्ञानक्रियाशक्तिपरत्वेन मतः। अतो यत्र विश्वोत्तीर्णः शिवश्चिद्घन इत्युच्यते, तत्रायमभिप्रायो यज्ज्ञानक्रियाशक्त्योः शिवेन सम्बन्धः शरीरस्य शरीरिणा आत्मनेव। साम्येन चेदं द्योत्यते यद्यथा शरीरी स्वसमीहितं शरीरद्वारा संपादयति, एवं पतिरपि शक्तिद्वारा। क्वचन इच्छाज्ञानक्रियारूपं शक्तित्रयं प्रतिपादितमपरत्र सृष्टि-स्थिति-प्रध्वंस-पिधान-अनुग्रहरूपं शक्तिपञ्चकञ्च। शक्तिसंख्याविषये भेदः प्रकरणकृत इति स्पष्टं प्रतिपादितं तत्र तत्र।

द्विविधा सृष्टिः

शुद्धाशुद्धरूपा द्विविधा सृष्टिः। पूर्वस्याः पत्यपरपर्यायः शिवः साक्षात् कर्ता, समवायि-

कारणं चास्या बिन्दुः । तस्माच्च शुद्धतत्त्वभुवनाद्युत्पाद्य मुक्तान् विद्येश्वरादीन् बैन्दवशरीरै-र्योजयति (त० प्र० टी० ९) ।

शुद्धसृष्टौ बिन्दोर्नादः—तस्माच्च परिणामक्रमेण शुद्धविद्याविर्भवति । नित्यशुद्धाऽपरिमित-सर्वाधिकज्ञानक्रियाशक्तिमान् अशरीरोऽपि पतिः शुद्धां सृष्टिमुत्पादयति,यथा परिमितात्मा शरीरे स्पन्दम् । इदन्तु सर्वस्वीकृतं यन्निमित्तकारणं शरीरं तदैवापेक्ष्यते यदा तस्य सर्जनव्यापारः सविकल्प-ज्ञानग्राह्यवस्तुविषयो भवति । एवञ्च यतः शुद्धा सृष्टिः सविकल्पज्ञानग्राह्या न भवत्यतः तत्कर्ता शिवस्तदुत्पादनार्थं नापेक्षते शरीरम् । शुद्धा सृष्टिर्निर्विकल्पज्ञानभूमिः, न तस्यां विकल्पः प्रोद्-भवति,यतः सा विकल्पज्ञानापेक्षितशब्दोत्पत्तिभूमेरूर्ध्ववर्तिनी ।

अशुद्धा सृष्टिः पतिप्रेरितबैन्दवशरीरविद्येशानन्तादिकर्तृका । इयमशुद्धेत्युच्यते, यतोऽस्याः समवायिकारणं माया, यतश्चास्यां पाशबद्धाः पशवः कर्मानुसारं विविधसुखदुःखान्यनुभवन्तश्च सन्ति । इयं सविकल्पा सृष्टिः, यत इयं शब्दोत्पत्त्यनन्तरमस्तित्वं भजते ।

२. पाशः

पाश एव पशोः पत्युर्भेदकारणम् । स चास्मिन्नये द्वितीयः पदार्थः । तदन्तर्गत-मल-माया-कर्म-निरोधशक्ति-बिन्दुसंज्ञकाः पञ्चावान्तरपदार्थाः । अवान्तरपदार्थानां मोक्षविषयकविचारधारया घनिष्ठः सम्बन्धः । कर्म-मायास्वरूपं बन्धनद्वयं वेदान्तिनोऽपि स्वीकुर्वन्ति, ये मन्यन्ते यदुपरि-निर्दिष्टबन्धद्वयापगम एव मोक्षः । परन्तु सिद्धान्तशैवानुसारं वेदान्तिसम्मतो मोक्ष आंशिक एव । यतस्तदुपात्तमलद्वयापगमानन्तरमपि पाशावान्तरतत्त्वेषु मलसंज्ञया निर्दिष्ट आणवो मलो बन्धकत्वेन विद्यत एव । एतन्मते मायाकर्माख्यमलद्वयमुक्ताः परं ध्वंसोन्मुखाणवमलयुक्ताः पशवो विज्ञानाकला इत्युच्यन्ते । इमे च यदा शुद्धायां सृष्टौ बैन्दवशरीराणि दत्त्वा आणवमलस्य ध्वस्यमानध्वस्ताद्य-वस्थानुसारं विद्या-ईश्वर-सदाशिवाभिधासूच्चोच्चभूमिकासु नीयन्ते, तदा ते क्रमशो मन्त्र-मन्त्रेश-मन्त्रमहेशशब्दैरभिधीयन्ते । परापरद्विविधमोक्षप्रकरणानुसारं पाशसंख्यायां भेदस्तेषु तेषु ग्रन्थेषु लक्ष्यत इति न विस्मरणीयम् ।

(अ) मलः—आणवमलः

मलशब्दो यद्यपि साधारणतया मलत्रयार्थमुपयुज्यते, तथापि पाशान्तर्गतपदार्थगणनायामयं शब्द आणवमलार्थमेव प्रयुज्यते । अनादिरयं पशुज्ञानक्रियाशक्तितिरोधायकः । एकस्याप्यस्यानन्ताः

शक्तयः । तास्वेकयैकस्य पशोर्ज्ञानक्रियाशक्ती तिरोधत्ते, अत एवैकस्य परिमितात्मन आणवमलाऽपगमे न सर्वमुक्तिसंभवः । मलश्चायं चक्षुःपटलवद् द्रव्यस्वरूपः । निवृत्तिश्चास्य पत्याख्यवैद्यव्यापारसाध्या । परन्तु वैद्यव्यापारश्चक्षुःपटलपरिपाकवद् ईश्वरव्यापारो मलपरिपाकमपेक्षते । अयञ्च परिपाकः शैवागमोपदिष्टक्रियाचर्यायोगानुष्ठानसाध्यः ।

अयं स्थलविशेषेषु पशुत्वमलसंज्ञयापि निर्दिष्टः । अथ चायमधिकारिमलशब्देनोच्यते यदास्य चर्चा व्यपगतमायाकर्ममलानां परिपक्वाणवमलानामात्मनां विषये क्रियते । यतः परिपक्वाणवमलेभ्य एवानन्तादिभ्यः पतिरशुद्धसृष्टिकर्तृत्वशक्तिं प्रयच्छति ।

(आ) माया

माया वस्तुरूपा सद्रूपा च, न तु वेदान्तिमत इवासत्यरूपा । इयमशुद्धसृष्टिगतस्य सर्वस्य कला-भुवन-सूक्ष्म-स्थूल-शरीरतदुपभोग्यविषयजातादेरुपादानकारणम् । परं मायाशब्दो बन्धनत्रयान्तर्गतैकबन्धनार्थे प्रयुक्तो मायाकार्याणि द्योतयति । बन्धनस्वरूपमायार्थं मायीयमलशब्दो बहुश उपलभ्यते । मायीयो मल आत्मनो बुद्ध्यादिभिस्तादात्म्यं जनयति । अनिदञ्च इदन्तया भासयति । सांख्यसंमतोऽनाद्य आत्मानात्माविवेको न स्वीकार्य आत्मनो बुद्ध्यादिभिस्तादात्म्यस्य कारणत्वेन । यतो यदकारणकं भवति न तद् ध्वंसमेति । अतोऽकारणकस्याविवेकस्य ध्वंसासंभवान्मुक्तेष्वपि स संभवेत् । अत आत्मनो बुद्ध्यादिभिस्तादात्म्यादिकारणभूता मायाऽवश्यमभ्युपेया ।

(इ) कर्म

अनुष्ठितकर्मणां फलराशिस्वरूपं कर्म प्रवाहानादितयाऽनादि स्वीक्रियते । इदञ्च भोगस्य सुखदुःखादेर्भोगसाधनानाञ्च शरीरेन्द्रियाणां प्रत्यात्मनियतत्वेन विचित्रत्वात्तद्वैचित्र्यकारणत्वेनावश्यमभ्युपेयम् । अनन्तादिकृताऽशुद्धा सृष्टिः कर्माधीना, यतस्ते प्राणिकर्मभोगार्थं सृज्यमानायां सृष्टौ सर्वान् भोग्य-भोजक-भोगसाधनादींस्तथा सृजन्ति, यथा सर्वे स्वस्वकर्मानुसारं भोगं भोक्तुं शक्नुयुः ।

भारतीयः कर्मसिद्धान्तः प्रत्यभिजानीते यत्प्राणिनः क्रियमाणकर्मणः फलं याथार्थ्येन ज्ञातुं न शक्नुवन्ति । "अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम्" इत्येष सिद्धान्तः सम्यगनुसृतः कुपथान्निवार्य सुपथं नयति ।

(ई) निरोधशक्तिः (तिरोभावः)

निरोधशक्ती रोधशक्तिर्वा न केवलं पाशेषु परिगणिता, अपि तु पारमेश्वरशक्तिष्वपि । इदं चाभ्युपगम्यते यन्मुख्यतयेयं पारमेश्वरशक्तिरेव, पाशत्वं तु तस्याः पाशधर्मानुवर्तनेनोपचारात्

(त० प्र० १०), यतः सा परमेश्वरस्य उपकरणम् । मलान्तरसहकृतेनानेनोपकरणेन निगडेनेव नियम्य प्राणिनः स्वस्वभोग्यभोगान् प्रति नयति परमेश्वरः ।

(उ) बिन्दुः

बिन्दुर्न केवलं मलस्वरूपः, अपि तु शुद्धसृष्ट्युपादानभूतोऽपि, यथा प्राक् प्रतिपादितम् । मलस्वरूपस्य बिन्दोर्मोक्षविचारधारयातीव घनिष्टः संबन्धः । मोक्षो द्विविधः–परोऽपरश्च । मायाकर्मरूपपाशद्वयविमुक्तः पशुर्न सर्वथा मुक्तः, आणवापरपर्यायपशुत्वमलस्य सद्भावात्, अतः सोऽपरमोक्षभाक् ।

सिद्धान्तशैवानामिमेऽभ्युपगमाः—(क) अस्माल्लोकादूर्ध्वं बहवो लोकाः सन्ति यत्र कर्मादिपाशबद्धा जीवाः कर्मभोगान् भुञ्जन्ति । (ख) मायोर्ध्वभाविनः पञ्च पदार्थाः, येषु सदाशिव-ईश्वर-विद्याख्यं त्रयं गण्यते । (ग) मायाकर्मोभयपाशविमुक्ता ध्वस्यमानाद्यवस्थावशिष्टाणवमलाः क्रमशोऽनुभूतविद्या-ईश्वर-सदाशिवतत्त्वाः पशवः मायीयलोकोर्ध्वोर्ध्ववर्तिषु त्रिषु लोकेषु क्रमशो निवसन्ति, ते च क्रमशो मन्त्र-मन्त्रेश-मन्त्रमहेशशब्दैरभिधीयन्ते । एषां शरीराद्युपादानकारणं बिन्दुः । एवं चैतादृशप्रकरणेषु बिन्दुरुपादानस्वरूपत्वेन सृष्टिकारणत्वेन व्याख्यायते, परन्तु यतो यावद्बिन्दुकारणकाच्छरीरान्मुक्तिर्न भवति, न तावत् परमोक्षः, अतो बिन्दुर्मलत्वेनाप्युच्यते ।

बिन्दुरवान्तरपदार्थेषु प्रथमः

सिद्धान्तशैवाभ्युपगतेषु षट्त्रिंशदवान्तरपदार्थेषु बिन्दुः प्रथमः । स च शिवशब्देनाप्यभिधीयते । परन्तु शिवशब्दो बहुशः प्रथमप्रधानपदार्थार्थमपि प्रयुज्यते । अतः पाठकेन प्रकरणानुसारं शिवपदार्थो निर्णेयः । परन्तु केचन सिद्धान्तशैवदर्शनप्रतिपादयितारः पत्यर्थं परशिवशब्दं प्रयुञ्जते । यथा—"तत्त्वातीतः परः शिवः" इति ।

बिन्दुः शिवापरपर्यायो महामायाशब्देनाप्यभिधीयते । अयमेको नित्यः, शक्ति-सदाशिव-ईश्वर-विद्याख्याश्चावान्तरपदार्था अस्यैव परिणामभूताः शरीरांशे । अयं तत्तद्भुवनेश्वराराधनाद् दीक्षया वा स्वकार्यभूतशुद्धाध्वभुवनप्राप्तानां ज्ञानक्रिये प्रकटयति । अयं कुण्डलिनीशब्देनाप्यभिधीयते । अयं परशिवस्य परिग्रहशक्तिरूपः । नायं स्वतन्त्रः, जाड्यात्, अपि तु परशिवेच्छापरवशः (त० प्र० २७) ।

बिन्दुपरिणामो नादः

बिन्दुर्न केवलं शुद्धसृष्ट्युपादानकारणत्वेनाभ्युपगतः, अपि तु परिमितप्रमात्रुपाधिभूतनादकारणत्वेनापि । नादरूपोपाधेरावश्यकता चेत्थं स्थाप्यते—

'कः खलु परिमितप्रमातुर्लौकिकज्ञानेन संबन्धः' इति प्रश्ने समुपस्थिते स सम्बन्धो न समवाय इति शक्यते वक्तुम्, यथा वैशेषिकाः कथयन्ति। यतः प्रत्येकमात्मनो ज्ञानमुपचयापचयौ भजते। अत आत्मना सह ज्ञानस्य समवायसम्बन्धाभ्युपगमे आत्मनः परिवर्तनशीलत्वमतश्चानित्यत्वमापतति। अतः सिद्धान्तशैवनये ज्ञानं नात्मनि समवेतमपि तु तदुपाधिरूपे नादे, यो बिन्दोः परिणामः। असंख्या नादाः प्रत्यात्मभिन्नाः। परिमितात्मन उपाधिभूतो नादोऽभिधेयबुद्धिबीजरूपः (र०त्र० २३-४)। आत्मनो ज्ञानशक्तिर्विभिन्नसूक्ष्मशब्दरूपनादवृत्तिसंपृक्ता सती मायीयसविकल्पार्थावलोकने प्रवर्तते, नादरूपोपाधिकारणाद्विचित्रेव भासते च। भिन्नानि ज्ञानानि नादवृत्तिरूपाण्येव, न तु बुद्धिवृत्तिरूपाणि, यथा सांख्याः कथयन्ति। यतो बुद्धिवृत्तिरूपत्वेऽभ्युपगते शुद्धभुवनेषु वर्तमानानामनन्तादीनां सविकल्पकज्ञानाभावप्रसङ्गः। यतस्ते मायोर्ध्ववर्तिनोऽतस्तेषु न संभवति बुद्धिः। सविकल्पज्ञानं च तेष्वावश्यकम्, ऐहलौकिकविचित्रसृष्टिकर्तृत्वात्। अतो नादः स्वीक्रियते सिद्धान्तशैवदार्शनिकैः।

वैयाकरणदर्शनाभ्युपगतस्फोटनिरसनपूर्वकं नादसमर्थनम्

वैयाकरणदर्शने एको मुख्यः प्रश्नोऽयम्—कथं शब्दाः वाक्यानि चार्थज्ञानं जनयन्ति। स चैवमुत्थाप्यते। शब्दघटकान्यक्षराणि क्रमशः श्रुतिपथमागच्छन्ति, क्रमेणैव ज्ञायन्ते, नश्यन्ति चोच्चारणक्षणसमनन्तरमेव। एवं चार्थस्य शब्देन सह संबन्धात्, शब्दघटकाक्षराणामुच्चारणक्षणसमनन्तरविनाशित्वादक्षरराशिस्वरूपाणां शब्दानां तद्घटितवाक्यानां च प्रत्यक्षीकरणासंभवाद् न संभवत्यर्थज्ञानम्। न चेदं शक्यते वक्तुं यदर्थज्ञानं शब्दान्तिमवर्णाच्छ्रूयमाणात् सम्भवति; उदाहरणतः 'गौः' इति शब्दान्तभाविनो विसर्जनीयात्। यतोऽस्मिन् मते स्वीकृते न शक्यत उत्तरयितुमयं प्रश्नो यद् नरशब्दान्तभाविनः श्रूयमाणाद्विसर्गात् कुतो न भवति सास्नालाङ्गूलककुदखुरविषाणिनो ज्ञानम्, अन्त्यविसर्गस्योभयत्राप्युपलभ्यमानत्वात्। न चेदमपि शक्यते वक्तुं यद्विसर्जनीयात् पूर्वाक्षरजातसंस्कृतिसहायकात् संभवति वाच्यबुद्धिः। यतः संस्कारा अपि यैरेव पूर्वानुभूतैर्विषयैर्बुद्धावारोपितास्तेष्वेव घटादिषु स्मृतिहेतवो भवन्ति नाननुभूतेषु पटादिषु, अतः संस्कारा अपि यैर्वर्णैर्बुद्धावारोपितास्तेष्वेव ज्ञानहेतवो युक्ता नार्थे। एवञ्च पदस्य वाक्यस्य वा नार्थबुद्धिजनकत्वं सम्भवति।

उत्तरं चेत्थं प्रदीयतेऽस्य—पूर्वपूर्ववर्णसंस्कारसहितान्त्यवर्णाभिव्यङ्ग्योऽन्य एवाविनिर्भक्तो मायूराण्डरसवदनेकवर्णावभासकः पदात्मा पदव्यतिरिक्तश्च वाक्यस्वभावः समस्तस्य जगतो युगपत्

क्रमेण वार्थप्रतीतिहेतुत्वाद् व्यापको नित्यश्च स्फोटोऽभ्युपगन्तव्यः। यतः स एव व्यवहर्तॄणामर्थं स्फुटयति। इत्थञ्च स्फुटत्यर्थो यस्मात् स स्फोट इति वैयाकरणैः स्फोटसिद्धान्तः स्थाप्यते। स चेत्थं निरस्यते सिद्धान्तशैवैः—

न शक्यते स्फोटः स्वीकर्तुं वर्णव्यतिरिक्तस्य तस्याननुभवात्, तस्य वर्णेभ्यो भिन्नाभिन्नत्वप्रतिपादनस्याशक्यत्वात्। न तावद्भिन्नः, वर्णव्यतिरेकेण शशविषाणादेरिव तस्यानुपलब्धेः। न चानुमानात् स्थितिरुपपद्यते, तस्य प्रत्यक्षनिराकृतत्वात्। अभिन्नत्वे स्वीकृते 'हस्तः करः' इतिवदेकार्थाभिधानाद् वर्ण एव स्फोटः, न तु ततो भेदेनावस्थित इत्यापातात्। विभुत्वे चास्यैकपुरुषोच्चरितैर्वर्णैरभिव्यक्तिमत्त्वे सति विशेषाभावादेशान्तरेऽपि नित्यत्वाच्च कालान्तरेऽपि प्रमातॄणामर्थप्रतिपत्तिसंभवापातात्।

अत एके विज्ञानमेवार्थोद्भावकं स्वीकृतवन्तः। तन्मतं चेत्थम्—

व्यक्तं सास्नालाङ्गूलककुदादिलक्षणमर्थं बुद्ध्याध्यवस्य तदनुगुणं गौरित्यादिपदं चिन्तयैवानुसन्धाय स्थूलं शब्दं प्रयुङ्क्ते साधारणो जनः।

एवं प्रयुज्यमानः शब्दः श्रोतृकर्णशष्कुलीं गतो न केवलं स्मृतिकृतात् संयोजनात् प्रागनुभूतं शब्दमेव स्मारयति, अपि तु नियमेन तत्सहचरमर्थमपि। एवञ्च शब्दार्थयोर्वाचकवाच्यसंबन्धः शब्दार्थप्रतीतिश्च।

इयमान्तरस्य परामर्शज्ञानस्य वाचकता स्वीक्रियते सिद्धान्तशैवैः। अभ्युपगम्यते च बुद्ध्याकारस्य वाचकस्य बाह्याकाराद् वाच्याद् विशेषः "बाह्याकारपरामर्शरूपत्वाद्वाचकत्वम्, ततश्च वाचकैः परामर्शज्ञानभेदैर्गवादिलक्षणा बाह्याकारभेदा विमृश्यमाना वाच्या भवन्ति" इति मन्यमानैः। परन्तु नादसत्तां स्थापयद्भिरेभिरुच्यते यद् वाच्याद्भिन्नस्यार्थान्तरस्य विमर्शात्मकविज्ञानस्य नाऽकारणमुत्पत्तिः, कादाचित्कत्वात्। तच्च कारणं नादशब्देनाभिधीयते।

नादपदव्याख्यानम्

बुद्ध्याध्यवस्यमानो विषयो न बुद्धिप्रभवः। बुद्धिबाह्यो ह्ययमिन्द्रियैः प्रत्यक्षीक्रियते। बुद्धिगतविषयप्रतिबिम्बं यद् बुद्धिरध्यवस्यति तत् केनापीन्द्रियेण निर्विकल्पकपरिगृहीतमेवेति स्वीकार्यम्, कस्यचनैव विषयस्य एकस्मिन् कालेऽध्यवसायसंभवात्। एवमेवान्तरविषयाध्यवसाये बुद्ध्या अन्तःसंजल्पेन परिगृहीत एव विषयोऽध्यवसितो भवति। अक्षरबिन्दुरूपस्यान्तःसंजल्पस्य कारणं नादः।

सिद्धान्तशैवदृष्ट्याऽर्थग्रहणप्रकारः

नादोऽन्तःसञ्जल्पस्याऽक्षरबिन्द्वपराभिधस्य कारणम् । एवञ्च नाद एव शब्दार्थ-ज्ञानस्य कारणम्, यतो नादोऽन्तःसंजल्पं जनयति, येन बुद्धिर्बाह्यविषयप्रतिबिम्बमध्यवस्यति । बाह्यो व्यक्तः शब्द आन्तरसंजल्पस्य बाह्याकार एव, अतो न परमार्थतोऽर्थबुद्धिजनकः ।

असंख्येया नादाः । एष्वेकः प्रत्येकेन परिमितात्मना संबद्धः । स च व्यक्तिविशेषेऽन्तः-संजल्पोद्भावको बाह्यविषयस्य सविकल्पग्रहणकाले । संजल्पश्च शब्दार्थयोरैक्यरूपात्मकः ।

बाह्यविषयस्य प्रतिबिम्बे कस्मिंश्चिदिन्द्रिये समापतिते वक्तृनिष्ठो नादः शब्दार्थैक्यात्म-कान्तःसञ्जल्परूपेण विषयं बुद्धेः पुर उपस्थापयत्यध्यवसायार्थम् । बुद्धिरध्यवस्यति । बुद्धिकृतोऽ-ध्यवसायो व्यक्तवर्णैः प्रकटीक्रियते । श्रूयमाणा वर्णाः श्रोतृनिष्ठं नादमभिव्यक्तीकुर्वन्ति । अभिव्यक्तो नादः श्रोतृबुद्धेः पुरः शब्दार्थैक्यात्मकान्तःसंजल्पमुपस्थापयति । श्रोतृबुद्धिः शब्दार्थयोः पृथक्-करणरूपमध्यवसायं कृत्वाऽस्यायमर्थ इत्यध्यवस्यति ।

एवं प्रत्येकं नादो निखिलशब्दतदर्थाव्यक्तरूपः, यत्र सर्वे मयूराण्डरसे तत्पक्षवर्णा इव परस्पराऽविभक्ततया ऐक्येन सन्तिष्ठन्ते । एष एव बाह्यविषयस्य प्रत्यक्षीकरणसमये द्रष्टरि, एवं चाध्यवसितविषयबोधनाय प्रयुक्तानां वर्णानां श्रवणकाले श्रोतरि, शब्दार्थैक्यरूपमन्तःसञ्जल्पमुद्-भावयति । यस्य शब्दार्थयोः पृथक्करणरूपेऽध्यवसाये क्रियमाणेऽस्यायमर्थ इति शब्दार्थप्रतीति-र्भवतीति सिद्धान्तशैवानां नादराद्धान्तः ।

अयं बिन्दुः पराशब्देनाप्युच्यते ।

अस्मादेव सूक्ष्मा-पश्यन्ती-मध्यमा-वैखरीरूपाश्चतस्रो वाचः समुद्भवन्ति । एतद्विषये भर्तृहरिश्रीकण्ठयोर्मतभेदः । भर्तृहरिरद्वैतदृष्ट्या वैयाकरणदर्शनं प्रतिपादयन् सूक्ष्मा-पश्यन्त्योरैक्य-मभ्युपगच्छति । वाक्यपदीये हि 'सूक्ष्मा वागनपायिनी' इत्यत्र समुपात्तः सूक्ष्माशब्दः पश्यन्त्या विशेषणम् । परन्तु श्रीकण्ठः सूक्ष्मां भिन्नां पश्यन्त्युपरिभाविनीं वाचं मनुते, नादसूक्ष्मयोश्चैक्यं स्वीकरोति । अतो नादापरपर्याया सूक्ष्मा एतन्मते बिन्दोः प्रथमः परिणामः, एवं चाघोरशिवकृत-टीकानुसारं पश्यन्त्यक्षरबिन्द्वोरैक्यमतः पश्यन्तीविषयेऽप्यनयोर्मतभेदः ।

भर्तृहरिमते पश्यन्तीसाक्षात्कार एव ब्रह्मसाक्षात्कारः, पश्यन्त्या ब्रह्मरूपत्वात् । परं द्वैत-वादी श्रीकण्ठः कथयति यत् पुरुषसूक्ष्मयोः पारस्परिकभेदज्ञानं ज्ञातारं भोगाधिकारादेव मोचयति ।

सूक्ष्मा यस्या भर्तृहरिपादैः पश्यन्त्या सह तादात्म्यं कृतम्, सा श्रीकण्ठमते न ब्रह्म, अपि त्वचेतनस्य बिन्दोरचेतनः परिणामः।

बिन्दुनादौ शिवशक्तिशब्दाभ्यामुच्यमानौ सिद्धान्तशैवाभ्युपगतषट्त्रिंशदवान्तरपदार्थेषु प्रथमद्वितीयौ।

बिन्दुनादात्मको विषयोऽतीव गहनः क्लिष्टश्चेति नाधिकमिह शक्यते व्याख्यातुं निर्धारितसमये। अत इममिहैव परित्यज्यावशिष्टं तृतीयं पदार्थं मोक्षस्वरूपञ्च संक्षेपेण प्रतिपाद्य समाप्नोमीदं व्याख्यानम्।

(३) पशुस्तृतीयो मुख्यपदार्थः

क्षेत्रज्ञादिपर्यायः पशुर्न देहात्मा यथा देहात्मवादिचार्वाकमते। न ज्ञेयो यथा नैयायिकमते। न देहपरिमाणो यथा जैनमते। न क्षणिको यथा बौद्धमते। नापि परमार्थतो ब्रह्मस्वरूपः, यथा वेदान्तिमते। नापि ज्ञानक्रियाशक्तिरहितः, यथा सांख्यमते। परन्तु ज्ञानक्रियाशक्तिमान् नित्यः, यस्यापरिमितज्ञानक्रियाशक्ती ईशप्रसादान्मुक्तावभिव्यक्ते भवतः, एवञ्च यः शिवसाम्यमवाप्नोति।

पशुस्त्रिविधः, विज्ञानाकल-प्रलयाकल-सकलभेदात्। विज्ञानाकला एव आणवमलस्य विभिन्नध्वस्यमानध्वस्तादिदशानुकूलं मन्त्र-मन्त्रेश-मन्त्रमहेशशब्दैरुच्यन्ते। विज्ञानाकलाश्च कलादितत्त्वविमुक्ता मायीयकार्ममलद्वयरहिता विध्वंसिष्वाणवमलमात्रयुताः स्वीक्रियन्ते।

प्रलयाकल आणवकार्माख्यमलद्वययुक्तः पशुः प्रलयकालभाविपरिमितप्रमातृरूपः। सकलो मलत्रययुक्तः पशुः। अयं खलु कलादिपृथिव्यन्तत्रिंशत्तत्त्वसंबद्धः, यथा वयम्।

मोक्षः

मोक्षस्य परापरभेदाद् द्वैविध्यं परमोक्षस्य शिवसाम्यरूपत्वञ्च प्रागेवोक्तम्। परमोक्षेऽपरिमितज्ञानक्रियाशक्ती पशौ वर्तमाने परं मलाच्छादिते क्रिया-चर्या-योगानुष्ठानाद् व्यपगतमायाकर्ममले ईशानुग्रहादपेताणवमले च पशावभिव्यक्तीभवतः, ततश्च पशुः शिवसाम्यमवाप्नोति, परन्तु शिवात् पृथगेव सन्तिष्ठते। अतो मोक्षेऽपि पशोः शिवात् पृथक्सत्तास्वीकाराद् द्वैतमिदं दर्शनम्।

उपसंहारः

द्वैतदर्शनं सांसारिकसाधारणजनदृष्टिकोणमाश्रित्य प्रवर्तते। साधारणो जनो दुःखाक्रान्त ईश्वराराधनेन दुःखविमुक्तो भवति। परमद्वैतदर्शने ईश्वराराधनमनर्थकम्। यत आराध्यो मिथ्या, अत आराधकस्येश्वरमुद्दिश्याक्रन्दनं निर्जनवन इवाक्रन्दनम्। अद्वैतं मानुषेभ्य ईश्वरकृतदुःखापहरणाशां छिनत्ति। इदं धर्ममूले कुठाराघातमिव करोति, यतो धर्माचरणं द्वैतमाश्रित्यैव संभवति। अतः साधारणजनैर्द्वैतमेवाश्रयणीयमित्युपसंहरन्नवसरान्तरे लब्धेऽस्य सिद्धान्तस्यावशिष्टांशविवरणं प्रतिजानानो विरमाम्यत्र ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

शैवद्वैताद्वैतदर्शनम्

महनीयपरिषत्पते, माननीयाश्च पारिषद्याः !

प्रथमे व्याख्याने शैवद्वैतदर्शनद्वयं व्याख्यातम् । तयोरेकस्य बादरायणकृते ब्रह्मसूत्रे, शङ्कराचार्यकृते शारीरकभाष्ये, आनन्दगिरिवाचस्पतिमिश्रगोविन्दानन्दकृतासु तट्टीकासु च पत्यधिकरणे निरस्यमानेन शैवदर्शनेन सह तादात्म्यं संस्थापितम्, हरिभद्रसूरिराजशेखरकृती षड्दर्शनसमुच्चयनाम्न्यौ श्रीकण्ठकृतं श्रीकण्ठभाष्यं चाश्रित्य तस्य 'पाशुपतम्' इति नाम निर्धारितम् । तस्य च द्वैतपरतया द्वैताद्वैतलकुलीशपाशुपताद् भेदोऽप्यंशेन प्रदर्शितः ।

अस्मिन् व्याख्याने सेतिहासं प्राधान्येन यथासमयं द्वैताद्वैतपरं लकुलीशपाशुपतदर्शनं सविस्तरम्, अन्यानि द्वैताद्वैतदर्शनानि ससंक्षेपम्, लाकुलीशदर्शनस्य श्रीकण्ठीयविशिष्टाद्वैतोपरि प्रभावम्, श्रीकण्ठरामानुजयोर्विशिष्टाद्वैतप्रतिपादने शब्दश्रेणिमात्रकृतं भेदं च व्याचिख्यासुः समुपस्थितोऽहं भवतां पुरः ।

लकुलीशदर्शने धर्मदर्शनयोः पार्थक्यं न क्रियते । अत इदं न केवलं दार्शनिकतत्त्वनिरूपणपरमपि तु परमोपेयपरतत्त्वप्राप्त्यर्थमनुष्ठेयकर्मरूपधर्मप्रतिपादनपरमपि, दार्शनिकपदार्थेषु विधेरपि स्वीकरणात् ।

"अथातः पशुपतेः पाशुपतं योगविधिं व्याख्यास्यामः" इति प्रथमसूत्रानुसारं विधिप्रतिपादनस्योद्देश्यत्वादाधुनिकपाश्चात्यदर्शनप्रभावितदार्शनिकदृष्ट्या विधेरदार्शनिकत्वेऽपि तस्यापि सुसंक्षिप्तं विवरणं करिष्यतेऽस्य दर्शनस्य सर्वाङ्गीणताप्रतिपादनाय ।

लकुलीशपाशुपतदर्शनोद्भवकालः

लकुलीशपाशुपतदर्शनोद्भवकालविषये नास्ति कश्चनापि सन्देहः । यतो मथुरास्तम्भलेखम्, सोमनाथशिलालेखम्, वायुपुराण-लिङ्गपुराण-सूतसंहिता राजशेखरकृतषड्दर्शनसमुच्चयेषूपलब्धलकुलीशशिष्यपरम्परां चोपजीव्य ऐतिहासिकदृष्ट्या लकुलीश ईशवीयद्वितीयशतकभव इति मतं सुसमर्थ्यम् ।

(अ) मथुरास्तम्भलेखः किञ्चिन्नष्टोऽपि प्रमाणान्तरसहकृतैर्नष्टावशिष्टांशैः प्रमाणयति यल्लकुलीश ईशवीयद्वितीयशतके समभूदिति। 'अयं कदोत्कीर्णः?' अस्य प्रश्नस्योत्तरं तत्रैवेत्थमुपलभ्यते—

"एकषष्टे ६११ (प्र)थमे शुक्लदिवसे पञ्चम्याम्" इति।

यद्यप्युत्कीर्णलेखस्य सोंऽशो भग्नः, यस्मिन् संवत्सरनाम प्रदत्तमासीत्तथाऽपि प्रमाणान्तरैरिदं निश्चीयते यत् तत्रोत्कीर्णः 'एकषष्टि'शब्दः समुद्रगुप्तपुत्रविक्रमादित्योपाह्व-चन्द्रगुप्तसञ्चालित-गुप्तशतकपरः, यस्य प्रारम्भः फ्लीट्-सिल्वन्लेव्यादिपाश्चात्त्यविदुषां मते एकोनविंशत्यधिकद्विशत-तमे ईशवीयवर्षे सञ्जातः। इदं मतमेवं शक्यसमर्थनम्।

(आ) के०वी०पाठकमहोदयेन जैनग्रन्थप्रामाण्यमाश्रित्येदं साधितं यद् एकचत्वारिंश-दधिकद्विशतसंख्यया संयोज्य गुप्ताब्दसंख्या शकाब्दसंख्यायां परिणमयितुं शक्या। एवं कृते मथुरास्तम्भलेखोत्कीर्णा एकषष्टिसंख्या उपर्युक्तसंख्यया संयोजिता द्व्यधिकत्रिशततमशकाब्दपरा। तदनुसारञ्च अशीत्यधिकत्रिशततमाम्-ईशवीयशतकसंख्यां गमयति।

(इ) अपरञ्च स्तम्भलेखे 'प्रथमे' इति शब्दो विद्यते। स च द्योतयति यद् यस्मिन्नब्देऽयं लेख उत्कीर्णस्तस्मिन्नधिमास आसीत्। स्वामी कुन्नूपिल्लाइलिखितस्य—'इण्डियन क्रानोलोजी' इतिनाम्नः पुस्तकस्य दशमसूचिकायां द्विचत्वारिंशे पृष्ठे प्रदर्शितमिदं यदशीत्यधिकत्रिशततमे ईशवीये वर्षे आषाढद्वयमासीत्। उक्तप्रमाणद्वयमवलम्ब्यैतिहासिकदृष्ट्याऽसन्दिग्धमिदं यन्मथुरास्तम्भलेखः पूर्वोक्त ईशवीये वर्षे समुत्कीर्णः।

तत्र च माहेश्वरगुरुपरम्परा एवमुत्कीर्णा—

उदिताचार्यस्य गुरु-परमगुरु-परमेष्ठिगुरवः क्रमेणोपमिताचार्य-कपिल-पाराशराः समभूवन्। स चायमुदिताचार्यो गुरुपरम्परायां कौशिकाद्दशमो गुर्वायतने कपिलेश्वर-उपमितेश्वर-मूर्ती प्रत्यष्ठापयत्।

अत इदं प्रतिभाति यद् गुर्वायतनं तथाविधं स्थानमासीद्यत्र पूर्वगुरूणां समुत्कीर्णपूर्वगुरुमूर्तीनि स्मारकलिङ्गानि प्रतिष्ठाप्यन्ते स्म। इदञ्च गुरुनाम्न ईश्वरशब्देन सह समसनादनुमीयते। इदमनुमानमुत्कीर्णलकुलीशमूर्त्योर्लिङ्गयोः कारवनस्थयोर्नकुलेश्वर-राजराजेश्वरनाम्नोर्मन्दिरयोः समुपलम्भेन दृढीक्रियते। इदं स्थानं तेन स्थानेन सदृशं सम्भवत आसीद्यस्य चर्चा भासकृत-प्रतिमानाटकतृतीयाङ्के समुपलभ्यते, यत्र च रघुवंशीयानां गतराजानां मूर्तयो रक्ष्यन्ते स्म।

परन्तु स्तम्भलेख एकं महान्तं प्रश्नमुत्थापयति । यद्यप्यत्र पाराशरोदिताचार्ययोर्मध्यवर्तिनी गुरुद्वयनामनी समुत्कीर्णे, तथापि पराशरकौशिकयोर्मध्ये जातानां पञ्चगुरूणां नामानि न सन्ति । अतः 'कोऽयं कौशिकः' इति प्रश्नो जागर्ति ।

अस्य प्रश्नस्योत्तरं वायुपुराणलिङ्गपुराणाभ्यामुपलभ्यते, यत्रेदमुल्लिखितम्—(क) लकुली महेश्वरस्यान्तिमोऽवतारः । (ख) स च कायारोहणे कायावतारापरपर्य्याये समभूत् (इदं स्थानमद्यत्वे बड़ोदाराज्यान्तर्गतं 'कार्वन' इति नाम्ना ख्यातम् ।) (ग) तस्य चत्वारस्त्यागिनः शिष्याः कौशिक-गर्ग-मित्र-कौरुष्याभिधा आसन् इति ।

इदं पौराणिकं वचनं प्रथमं सोमनाथमन्दिरे समुपलब्धेन परमधुना पोर्चुगाले विद्यमानेन शिलालेखेन समर्थ्यते । अयं शिलालेखः डा०ब्यूलरमहोदयेन एपिग्राफिका-इण्डिया-प्रथमभागे एकसप्तत्यधिकद्विशतपृष्ठादारभ्य तत्समनन्तरवर्तिपृष्ठेषु प्रकाशितः । चत्वार्यपि पूर्वोपात्तानि लकुलीश-शिष्यनामानि सन्ति तत्रोत्कीर्णानि । यद्यप्यन्यानि नामानि कथञ्चिद्भिन्नानि, तथापि कौशिक-नाम तथैवोपलभ्यते यथा पूर्वोक्तपुराणयोः । अयं शिलालेखः चालुक्यवंशजस्य राज्ञः शार्ङ्ग-देवस्य काले समुत्कीर्णः ।

'कौशिक' इति नाम लकुलीशप्रथमशिष्यनामतया न केवलं पूर्वोक्तपुराणयोरुपलभ्यते, अपि तु सूतसंहितायां लकुलीशक्षेत्रप्रसङ्गे, राजशेखरकृते षड्दर्शनसमुच्चये, हरिभद्रसूरिकृत-षड्दर्शनसमुच्चयस्योपरि गुणरत्नसूरिकृतायां टीकायामपि । इदञ्च नाम कौण्डिन्यकृतायां पाशुपत-सूत्रटीकायां प्रथमसूत्रव्याख्यानावसरे 'कुशिक' इति किञ्चित्परिवर्तितरूपेणोपलभ्यते ।

एभिः प्रमाणैरिदं निश्चीयते—कौशिको लकुलीशस्य प्रथमः शिष्य आसीत् । उदिताचार्यः, यस्य नाम मथुरास्तम्भलेखे उत्कीर्णम्, कौशिकाद्दशमोऽभूत् । अयञ्च शिलालेखोऽशीत्यधिक-त्रिशततमे ईशवीयवर्षे समुत्कीर्णः । एवञ्च यदि प्रत्येकं गुरोः काल आधुनिकेतिहासज्ञमतानुसारं पञ्चविंशतिवर्षपरिमितः स्वीक्रियेत, तर्हि उदिताचार्यस्य पूर्वगुरुपरम्परायामेकादशो लकुलीश ईशवीयचतुर्थशतकान्त्यचतुर्थभागभवादुदिताचार्यात् पञ्चाशदधिकद्विशतवर्षात् प्राक् तथा च ईशवीयद्वितीयशतकप्रथमार्धेऽभूदिति नूनमभ्युपेयम् ।

अतो लकुलीशोत्थापितस्य शैवद्वैताद्वैतप्रतिपादकस्य लकुलीशपाशुपतदर्शनस्योद्गम ईश-वीयद्वितीयशतके सञ्जात इत्यत्र न विवादावसरः ।

लकुलीशपाशुपतदर्शनग्रन्थाः

लकुलीशपाशुपतदर्शनस्य संक्षिप्तं व्याख्यानं माधवकृते सर्वदर्शनसंग्रहे समुपलभ्यते, यत्र

व्याख्यायमानदर्शनस्य 'लकुलीशपाशुपतम्' इति नाम उपन्यस्यतो व्याख्याकर्तुर्मनसि पाशुपतलकुलीशपाशुपतयोर्भेदः सुस्पष्ट आसीदिति स्फुटं प्रतिभाति। एतद्दर्शनप्रतिपादका मुख्याः पूर्वोक्ता अष्टादश द्वैताद्वैतागमाः। अन्ये मुद्रिता अमुद्रिताः प्रमाणतयोपन्यासमात्रेण वा ज्ञाता इमे ग्रन्थाः—

१. **पाशुपतसूत्रं लकुलीशकृतम्**। लकुलीश ईशवीयद्वितीयशतके समभूदिति सविस्तरं निर्णीतमेव।

२. **पञ्चार्थभाष्यनाम्नी तट्टीका कौण्डिन्यविरचिता**। अस्य टीकाकर्तुर्नाम राशीकर इत्य—प्यासीदिति सर्वदर्शनसंग्रहकर्तुर्वचनादेव गम्यते। यथाह—

"पञ्चानां पदार्थानां प्रमाणतः पञ्चाभिधानं विस्तरः। स खलु राशीकरभाष्ये द्रष्टव्यः" (स० द० सं० पृ०१७१) इति।

अयं राशीकरो वायुलिङ्गादिपुराणेषु राजशेखरकृतषड्दर्शनसमुच्चये च लकुलीशपाशुपत-गुरुपरम्परागणनायां लकुलीशात् सप्तदश आसीदित्युल्लिखितम्। यथा—

तस्यावताराः सारा ये तेऽष्टादश तदर्चिताः।
राशीकरः सप्तदशो विद्यागुरुरथापरः ॥ इति। (ग० का० पृ० ३५)

लकुलीशो ईशवीयद्वितीयशतके जीवति स्मेति निर्धारिते तस्य षोडशः शिष्यस्तस्माच्चतुः-शतवर्षानन्तरं सञ्जात इत्याधुनिकैतिहासिकदृष्टिकोणान्निश्चिते स ईशवीयषष्ठशतके समभूदिति शक्यते वक्तुम्। अनेनान्येऽपि केचन ग्रन्था लिखिता इति गणकारिकाकर्तृवचनादेवावगम्यते। यथाह—

"श्रीमद्भाष्यकृतापि ज्ञापकमुक्तं तपोभिः" (ग० का० पृ० १३) इत्यादि।

इदं वाक्यं पाशुपतसूत्रभाष्ये नोपलभ्यते, अत इदं निश्चीयते यद् गणकारिकाटीकाकर्त्रा कश्चनान्यो ग्रन्थो दृष्टो यत्रेदं वाक्यमासीत्।

यद्यप्ययं बहूनि प्रमाणवाक्यान्युपन्यस्यति, तथापि प्रायस्तेषां ग्रन्थानां नामानि नोल्लि-खति, येभ्यस्तानि संगृहीतानि। परम्—

"इत्येवमहिंसा तन्त्रे प्रसिद्धा" (पा० सू० पृ० १९),

"इत्येवमसंव्यवहारस्तन्त्रे सिद्धः" (पा० सू० पृ० २३),

"वेदप्रामाण्यादुक्तम्" (पा० सू० पृ० ११५)

इत्यादिवाक्येभ्यः स्पष्टीभवति यत् स शैवागमानां वेदानाञ्च प्रामाण्यं स्वीचकार।

३-४ विशुद्धमुनिकृते यमप्रकरण-आत्मसमर्पणे । अयं विशुद्धमुनिः पाशुपतसूत्रटीकाकर्तुः कौण्डिन्यादपरभावीति निश्चीयते—

"भाष्यकृतोक्तं तद्वद्ये यमप्रकरणं तथा" (ग० का० पृ० २४)

इति तदीयवाक्यादेव । यतो मुद्रितपाशुपतसूत्रटीकायां भस्मप्रकरणानन्तरं पञ्चदशात् पृष्ठादारभ्य चतुस्त्रिंशत्पृष्ठान्तस्य टीकाग्रन्थभागस्य यमप्रकरण इति संज्ञा कौण्डिन्येन स्वयमेव कृतोपलभ्यते । कौण्डिन्यस्य समय ईशवीयषष्ठशतके निर्धारितः । अतः शक्यते इदं वक्तुं यद् विशुद्धमुनिरीशवीयसप्तमशतके तदनन्तरं वाऽभूत् ।

५. हरदत्ताचार्यलिखिता गणकारिका

६. तदुपरि भासर्वज्ञकृता टीका च । अत्र विद्यते मतभेदः । सी०डी०दलालमहोदयः सटीकगणकारिकाभूमिकायाम्—"गणकारिका भासर्वज्ञेन कृता परं टीकाकारस्य नाम नोपलभ्यते" इति लिखितवान् । परं यदि सर्वदर्शनसंग्रहस्थलकुलीशपाशुपतदर्शनविवरणं सावधानमवलोक्यते तर्हीदं स्पष्टं सञ्जायते यद् गणकारिकाकारस्य नाम हरदत्ताचार्य इत्यासीत् । यतः षष्ठकारिकाया द्वितीयभागम्—

"ज्ञानं तपोऽथ नित्यत्वं स्थितिः सिद्धिश्च पञ्चमी"

इत्युद्धरता माधवेन कारिकाकारस्य नाम "तदाह हरदत्ताचार्यः" इत्युल्लिखितम् । परन्तु गणकारिकाटीकायाः समाप्तावेवं मुद्रिता पङ्क्तिः समुपलभ्यते—

"आचार्यभासर्वज्ञविरचितायां गणकारिकायां रत्नटीका समाप्ता" इति । अतो गणकारिकाकर्तृविषये सन्देहो जायते हरदत्ताचार्येण भासर्वज्ञेन वेयं विरचितेति । नोपलब्धमद्यावधि किमपि प्रमाणं दूरीकर्तुमिमं संशयम् ।

भासर्वज्ञकृतौ द्वौ ग्रन्थौ यौ गणकारिकाटीकायां स्वीयत्वेनोल्लिखितौ तयोर्नामनी सप्रमाणमिमे—

७. सत्कार्यविचारः ।

सत्कार्यविचारे चायं विस्तारितो मया, तेनेह न प्रतन्यते (ग० का० पृ० १०) ।

८. टीकान्तरम् ।

अनयोर्भेदष्टीकान्तरे मया दर्शित इति नेह प्रदर्श्यते (ग० का० पृ० १०) ।

इमौ ग्रन्थौ भासर्वज्ञकृतत्वेन शक्यस्वीकारौ, यदि गणकारिकाटीका भासर्वज्ञकृतेति स्वीक्रियते ।

गणकारिकाटीकायां प्रमाणत्वेनोपन्यस्तानां ग्रन्थानां नामानि सप्रमाणमिमानि—

९. संस्कारकारिका ।

"तत्क्रमश्च संस्कारकारिकायां द्रष्टव्यः" (ग० का० पृ० ९) ।

१०. टीकाकाराः ।

"टीकाकारास्तु सर्वमापरितोषात् कर्तव्यमित्येवं प्रतिपन्नाः" (ग० का० पृ० १९) ।

अस्मादिदं स्पष्टीभवति यदुपलभ्यमानटीकायाः पूर्वं बह्वयोऽन्याष्टीका गणकारिकाया आसन् ।

भासर्वज्ञस्य समयः

डा०सर्वपल्लीराधाकृष्णन्महोदयास्तथा श्रीसी०डी०दलालमहोदया भासर्वज्ञ इति नाम न्यायभूषणेतिनाम्न्या न्यायसारटीकाया लेखकस्य भावसर्वज्ञस्यैवापरं संक्षिप्तं नाम इति स्वीकृतवन्तः, वेरावलप्रशस्तौ अचलगन्धशिलालेखे च भावबृहस्पति-भावज्ञ-भावशङ्कर इति पाशुपताचार्यनाम्नामुपलभ्यमानत्वात् , गणकारिकायास्तट्टीकाया वा कर्तुः पाशुपताचार्यत्वाच्च । न्यायभूषणे च प्रमाणवार्त्तिकालङ्कारकर्तुरीशवीयदशमशतकपूर्वार्धभवस्य प्रज्ञाकरगुप्तस्य मतं निरस्तम् । अथ च रत्नकीर्तिः, दशमशतकापरार्धभवस्य रत्नाकरशान्तेर्गुरुः, स्वीयायामपोहसिद्धौ न्यायभूषणकारमतमित्थं समालोचितवान्—

"यच्चात्र न्यायभूषणे सूर्यादिग्रहणे तदुपकार्याशेषवस्तुराशिग्रहणप्रसञ्जनमुक्तं तदभिप्रायानवगाहनफलम् , तथाहि तन्मते धर्मधर्मिणोरभेद उपकारलक्षणैव च प्रत्यासत्तिः" (अ० सि० ११) ।

अतो भासर्वज्ञो दशमशतकपूर्वार्धे समभूदिति तेषामभ्युपगमः ।

परन्तु न्यायसारस्यैकस्यां बङ्गाल-एशियाटिक-सोसाइटीभवनस्थायां हस्तलिखितप्रतिलिप्याम्—"भासर्वज्ञविरचिते न्यायसारे" इत्युपलभ्यते । अस्य प्रामाणिकत्वं स्वीकृत्य न्यायसारो भासर्वज्ञकृत इति शक्यते वक्तुमुपेक्ष्यापि भासर्वज्ञ इति भावसर्वज्ञस्यापरं संक्षिप्तं नाम इति मतम् । एवञ्च भासर्वज्ञो भावसर्वज्ञाद् भिन्न इत्यस्मिन्नपि मते स्वीकृते स ईशवीयदशमशतकात् पूर्वभावीत्यायाति, यतो न्यायभूषणकर्ता दशमशतकपूर्वार्धभव इत्यत्र नास्ति विवादः । न्यायसारकर्ता भासर्वज्ञो गणकारिकाटीकाकर्तुर्भासर्वज्ञादभिन्न इति तु लकुलीशपाशुपतप्रतिपादितप्रमाणत्रयस्वीकारात् , प्रमाणान्तराणामुपमानादीनां निरासात् , इन्द्रियप्रत्यक्ष आत्मप्रत्यक्ष इति प्रत्यक्षद्वैविध्यस्य अयोगिप्रत्यक्ष-योगि-

प्रत्यक्ष-नामान्तराभ्यामुपादानात्, अनुमानविषये दृष्टसामान्यतोदृष्टरूपद्विप्रकारकत्वानुगमनात् स्पष्टमिव प्रतिभाति ।

११. कारणपदार्थः ।

अयमज्ञातग्रन्थकर्तृनामा ग्रन्थः सायुज्याभिधमोक्षचर्चां करोति, एतद्ग्रन्थकर्ता कुशिकादीन् नमस्करोति, शिवस्य भवादिनामविवरणे पाशुपतसूत्रमनुसरतीत्यतो लकुलीशपाशुपतदर्शनांशप्रदर्शनपरत्वमस्य निश्चीयते ।

१२. पञ्चार्थभाष्यदीपिका ।

इयं कौण्डिन्यकृतस्य पाशुपतसूत्रभाष्यस्य पञ्चार्थभाष्यनामकस्योपरि टीका केनाप्यज्ञातनाम्ना कृता आसीत् । इयञ्च माधवेनैवं प्रमाणत्वेनोपन्यस्ता—"तत्प्रपञ्चस्तु पञ्चार्थभाष्यदीपिकादौ द्रष्टव्यः" इति ।

१३. आकरः ।

१४. आदर्शः ।

इमावपि ग्रन्थौ माधववचनाभ्यामेव ज्ञायेते । यथाह—

"शेषमाकर एवावगन्तव्यम्" इति,

"इत्यादर्शकारादिभिस्तीर्थकरैर्निरूपितम्" इति च ।

बहुभ्योऽन्येभ्योऽपि ग्रन्थेभ्यः पञ्चार्थभाष्ये, गणकारिकाटीकायाम्, सर्वदर्शनसंग्रहे च प्रमाणवाक्यानि ग्रन्थकर्तृनामान्यनुल्लिख्यैव दत्तानि, अतोऽनुमीयते यदन्येऽपि बहवो ग्रन्था एतद्दर्शनप्रतिपादका आसन् ।

एवञ्च ईशवीयद्वितीयशतकादारभ्य, यदा लकुलीशः समभूत्, चतुर्दशशतकपर्यन्तं यदाऽचलगन्धशिलालेखः समुत्कीर्णः, अस्य दर्शनस्य प्रचारो गुर्जरे मथुरायां दक्षिणभारते चाविच्छिन्न आसीदित्यत्र नास्ति सन्देहः । परं तदनन्तरमस्य दर्शनस्य बुद्धिमात्रवैभवानामुपेक्षिताध्यात्मविद्यांशानां हस्तेषु निपतनादेतद्दर्शनाश्रिता न्यायपरम्परैवावशिष्टा, याऽद्यापि प्रचलति, नष्टा चाध्यात्मविद्यानुसारिणी प्रतिपादनपरम्परा, यद्यपि सोमनाथमन्दिरमहत्त्वमधुनापि यथापूर्वमेवावतिष्ठते, भस्मस्नानादिचर्या च 'नागा' इति ख्यातैः साधुभिरद्याप्यनुष्ठीयते ।

लकुलीशपाशुपतदर्शनस्य वेदसंबन्धित्वम्

लकुलीशपाशुपतदर्शनस्य साधारणतः सर्वैर्वेदैर्विशेषतः कृष्णयजुर्वेदेन घनिष्ठः सम्बन्धः । तथ्यं त्विदं यत्सद्योजात-वामदेव-अघोर-तत्पुरुष-ईशाना ये शिवसायुज्यप्राप्तये पाशुपतसूत्रे

क्रमशो ध्येयत्वेनोपदिष्टास्ते शिवस्यैव तैत्तिरीयारण्यकान्तभागोल्लिखिताः पञ्चांशा रूपाणि वा, यथाग्रे प्रतिपादयिष्यन्ते ।

तैत्तिरीयारण्यकान्त्यप्रपाठकचतुष्टये एकोपनिषन्निबद्धा, यस्याः सांहिती वारुणी याज्ञिकीति त्रयो भागाः सन्ति । दशमप्रपाठकगतो याज्ञिकीति निर्दिष्टो भागो नारायणीयोपनिषन्नाम्ना सुप्रसिद्धः खिलकाण्डरूपश्च ।

अत्र प्रतिपादितानां दार्शनिकसिद्धान्तानां लकुलीशकृतपाशुपतसूत्रप्रतिपादितैः सिद्धान्तैस्तावत्साम्यम्, यस्मादिदं स्पष्टीभवति यल्लकुलीशो नारायणीयोपनिषन्निबद्धां दार्शनिकसिद्धान्तपरम्परामनुसरति स्म । यथा—उभयत्र ब्रह्मणः शक्तिस्ततोऽपृथग्भूता स्वीक्रियते । उभावपि ब्रह्म सगुणं कथयतः, एवञ्च द्वैताद्वैतं प्रतिपादयतः । तैत्तिरीयारण्यकस्य दशमः प्रपाठको नारायणीयोपनिषन्नाम्ना सुप्रसिद्धो द्वैताद्वैतं समर्थयतीति मतं विशिष्टाद्वैतसाधकैः शैवैः प्रमाणत्वेनोपगृहीतत्वाद्वैष्णवैश्चास्य विशिष्टाद्वैतपरतया व्याख्यातत्वाच्छक्यसमर्थनम् ।

लकुलीशपाशुपतदार्शनिकसिद्धान्तपरम्परा न केवलं तैत्तिरीयारण्यकखिलभागे समुपलभ्यते, अपि तु मूलपुस्तकेऽपि त्रिचत्वारिंशदनुवाकादारभ्य सप्तचत्वारिंशानुवाकपर्यन्तभागे । पञ्चमन्त्राः—

"सद्योजातं प्रपद्यामि"
"वामदेवाय नमः"
"अघोरेभ्योऽथ घोरेभ्यः"
"तत्पुरुषाय विद्महे"
"ईशानः सर्वविद्यानाम्"

इति प्रतीका ये लकुलीशेन किञ्चित्परिवर्त्य शिवसायुज्याभीप्सुभिः क्रमेण ध्येयत्वेनोपदिश्यमानानां शिवापरपर्य्यायस्य ब्रह्मणः पञ्चरूपाणां प्रतिपादनायोपात्तास्त उभयत्रोपलभ्यन्ते । इमे पञ्च मन्त्राः पाशुपतसूत्रस्य पञ्चस्वध्यायेषु विभजनस्याधारभूताः ।

गणकारिकाप्रतिपादिताष्टपञ्चकविचारधाराप्येतन्मन्त्रपञ्चकप्रभावितेति प्रतिभाति ।

सायणीयतैत्तिरीयारण्यकटीकाप्रतिपादितस्य ब्रह्मणो लकुलीशपाशुपतदर्शनप्रथमतत्त्वेन पत्या सह साम्यम् ।

लकुलीशपाशुपतदर्शनोत्थानसमये ब्रह्मशब्दः केवलमद्वैतवेदान्ताभ्युपगतपरतत्त्वस्यैव

वाचको नासीदिति पाशुपतसूत्रे तत्र तत्र तासु तासु भूमिकासु ध्येयतत्त्वार्थेऽस्य शब्दस्य प्रयुज्यमानत्वादवगम्यते।

"अत्रेदं ब्रह्म जपेत्"

इति सूत्रं पञ्चस्वप्यध्यायेषूपलभ्यते।

इदं स्मरन्तो वयं यदि नारायणीयोपनिषदः सायणकृतं भाष्यमवलोकयामस्तर्हीदं सुस्पष्टं भवति यत्सायणो ब्रह्मविषये वक्ति तत्तेन सहातीव साम्यं भजते यल्लकुलीशदर्शनप्रतिपादयितारः पतिनाम्नः प्रथमतत्त्वस्य विषये कथयन्ति। यथा—

(क) ब्रह्म जगत्कारणम्। इदमुपादानकारणम्, यतो मायाऽस्य शक्तिर्नास्मात् स्वातन्त्र्येण सत्तां भजत्यपि तु तस्यैव विशेषणरूपेण। अत इदं मायि मायाविशिष्टं चोच्यते—

"मायां तु प्रकृतिं विद्याद् मायिनन्तु महेश्वरम्"

(तै० आ० ५६४)

"योऽयमाकाशो मायाविशिष्टब्रह्मण उपादानकारणादुत्पन्नः"

(तै० आ० ५६६)

(ख) यथा ब्रह्मतत्त्वस्य सच्चिदानन्दैकरसत्वं स्वभावस्तथा मायाविशिष्टस्य सृष्टि-स्थिति-संहाराः। (तै० आ० ५७१)

(ग) न प्रभवन्ति कर्माणि स्वातन्त्र्येण कृतकर्मफलं दातुम्। ईश्वर एव कर्मफलदाता।

(घ) न कारणाद्बहिः कार्यसत्ता संभवतीत्यतो ब्रह्म सर्वव्यापकमनन्तञ्च।

(ङ) ब्रह्म सत्। इदं जगत्सृष्ट्वा तदनुप्रविशति। तदनुप्रविश्य सच्च त्यच्च, निरुक्तञ्चानिरुक्तञ्च, निलयञ्चानिलयञ्च, विज्ञानञ्चाविज्ञानञ्च सत्यञ्चानृतञ्च भवति।

(च) ब्रह्म सुकृतम्, सुशब्दोऽत्र स्वयंशब्दपर्यायः कृतशब्दश्च कर्तृशब्दपर्यायः। अतः स्वयं कर्तृ स्वतन्त्रं ब्रह्म।

(छ) मुक्तिर्जीवस्य ब्रह्मणि प्रतिष्ठा, स्वात्मबुद्धिदार्ढ्यम्, स्वात्मब्रह्मणोरभेदानुभवः।

(ज) जीवगतानन्दस्य ब्रह्मानन्देनाभेदं विद्वान् ब्रह्म उपसंक्रामति। संक्रमणं नाम दृढसंयोगरूपप्राप्तिः।

"जलूका तृणे संक्रामति" (तै० आ० ६५२) इत्यादौ तथा दृष्टत्वात्।

जलूकादृष्टान्तेनेदं ध्वन्यते—यथा जलूका स्वस्थानमपरित्यजन्त्येव तृणं संक्रामति, तथा पशुरपि पशुत्वं सर्वथाऽपरित्यजन्नेव ब्रह्मसायुज्यमेति। मुक्तिश्च जीवे ब्रह्मशक्तिप्रवेशः, यस्माद् ब्रह्मशक्तयस्तथैव पशुमनुप्रविशन्ति यथा संलग्नजलौकाद्यक्तिविशेषकायाज्जलौकाकाये रुधिरम्।

(झ) मुक्तिः सालोक्यसामीप्यादिक्रमेण सत्यज्ञानानन्तादिलक्षणब्रह्ममहत्त्वावाप्तिः।

(ञ) द्वैताद्वैतदर्शनं भेदाऽभेदापरपर्यायं परस्परविरुद्धभेदाभेदप्रतिपादकत्वादन्याय्यमिति न शक्यते वक्तुम्, ब्रह्माकारेणाद्वैतं भोक्तृ-भोग्याकारेण द्वैतमित्याकारभेदाद् व्यवस्थासिद्धिस्वीकृत्या बाधाभावस्य शक्यसमर्थनत्वात्।

(ट) सायणः 'सद्योजातम्' इत्यादिपञ्चतैत्तिरीयारण्यकमन्त्रान्न केवलं शैवदर्शनपरतया अपि तु शैवधर्मपरतयापि व्याचष्टे। स मनुते यत् ते मन्त्राः पञ्चवक्त्रशिवमूर्तिवर्णनपराः। सद्योजातनामकं पश्चिमवक्त्रम्, उत्तरवक्त्ररूपो वामदेवः, तस्यैव विग्रहविशेषा ज्येष्ठादिनामकाः, अघोरनामको दक्षिणवक्त्ररूपः, प्राग्वक्त्रदेवस्तत्पुरुषनामकः, योऽयमूर्ध्ववक्त्रो देवः सोऽयं सर्वविद्यानां वेदशास्त्रादीनां चतुःषष्टिकलाविद्यानामीशानो नियामकः। (तै० आ० ७३३-५५)

(ठ) पत्युः शक्तिस्ततोऽपृथग्भूता, पतिर्जगत्कारणं स्वतन्त्रश्च। योगश्च निष्ठा-सामीप्य-सायुज्य-भेदभिन्नः। सायुज्ये पतिशक्तयः पशौ संक्रामन्तीत्यादयो लकुलीशसिद्धान्ता अग्रे व्याख्यास्यन्ते। एवं द्वैताद्वैतपाशुपतदर्शनस्य वैदिकपरम्परागतत्वं सिध्यति।

लकुलीशपाशुपतदर्शनस्य दर्शनान्तरेभ्यो वैशिष्ट्यम्

पाशुपत-लकुलीशपाशुपतयोर्भेदः, पाशुपतदर्शनस्य च दर्शनान्तरेभ्यो भेदः, केषुचिदंशेषु प्राङ्निरूपितोऽपि श्रोतृस्मारणाय तदंशसंग्रहपूर्वकं लकुलीशपाशुपतदर्शनस्य दर्शनान्तरेभ्यो भेद इह यथासंभवं सविस्तरं निरूप्यते।

(१) मोक्ष एतन्नये न्यायमते इव न दुःखान्तमात्ररूपः, अपि तु सदुःखान्ता सर्वज्ञत्व-सर्वकर्तृत्वाधिगमरूपपारमैश्वर्यावाप्तिः।

(२) कार्यमेतन्नये कारणे सदेवोत्पद्यते, नाऽसद्यथा वैशेषिकनये। इदं वैशेषिकाभ्युपगताऽसत्कार्यवादाद्भिन्नं सत्कार्यवादमवलम्बते। एवञ्च विद्याकलापशुरूपं कार्यजातमस्मिन् दर्शने नित्यम्।

(३) ईश्वर एतन्नये सर्जने स्वतन्त्रो न तु न्यायवैशेषिकनय इव परमाणुकर्मपरतन्त्रः।

(४) अन्यत्र विधीयमानो विधिरनुष्ठातॄन् स्वर्गं नयति, यस्माद्विध्यनुष्ठानजन्ये पुण्ये क्षयं

गते सति भूयो मृत्युलोकं परावर्तते जीवः। परं लकुलीशपाशुपतविधिः शिवसामीप्यं नयति, यस्मान्न भूयः परिवर्तिसंसारागमनम्।

(५) इदं रामानुजानन्दतीर्थादिभिस्तत्पूर्वभाविभिराचार्यैश्च स्वीकृतं मोक्षस्य दासत्वरूपत्वं निराकरोति। यतः कस्यापि सर्वशक्तिमतोऽपि दास्यं न दुःखान्तरूपमपि तु दुःखरूपमेव। अत एवेदं पारमैश्वर्यावाप्तिरूपत्वमभ्युपगच्छति, मोक्षस्य।

(६) द्वैतपाशुपतदर्शनादिदं भिन्नम्, यतः पूर्वं सर्जने कर्मपरतन्त्रत्वं पत्युरुररीकरोति, इदं तु ततोऽपि स्वातन्त्र्यम्।

(७) एतन्नये सर्वज्ञत्वसर्वकर्तृत्वशक्ती पत्युः पशुं संक्रामतः। ते न स्वाभाविक्यौ पशौ, परन्तु द्वैतपाशुपतदर्शनानुसारमिमे पशौ स्वाभाविक्यौ। एवञ्च मलतिरोहिते ते मलापगमेऽभिव्यक्ते भवतः।

(८) पाशुपतदर्शने कर्मसापेक्षः पतिर्जगत्कारणम्, इह तु—

कर्मादिनिरपेक्षस्तु स्वेच्छाचारी यतो ह्ययम्।
ततः कारणतः शास्त्रे सर्वकारणकारणम्॥

इति मतमवलम्ब्यते।

लकुलीशपाशुपतदर्शनस्य युक्तिवादसहकृतः स्वातन्त्र्यवादः

लकुलीशपाशुपतदर्शने पतिः स्वतन्त्रः। स जगत्सर्जने न कमपि परमाश्रित्य प्रवर्तते। उपादानकारणं न तस्मात् स्वातन्त्र्येण बहिरास्ते। तदपि तस्मिन्नेव शक्तिरूपेण वर्तते। नापि सृष्टिक्रियायां स कर्मपरतन्त्रः। यतः कर्मफलं तदधीनमेव। तत्प्रदत्तान्येव कर्मफलानि जीवा भुञ्जन्ति। यथोक्तम्—

स्वतन्त्रस्यायोज्यत्वं करणादिप्रयोक्तृता।
कर्तुः स्वातन्त्र्यमेतद्धि न कर्माद्यनपेक्षणम्॥ इति।

इयं विचारधारा—

"ईश्वरः कारणं पुरुषकर्माफल्यदर्शनात्"

इति नैयायिकविचारधारासमैव। परन्तु पत्युः सर्जनव्यापारः सदा कार्यकारणभावानुसार्येव स कस्यापि वस्तुनः स्वरूपलक्षणं नापि, कार्यकारणभावक्रममन्यथा करोति।

"मुक्तानां पुनर्दुःखैरसंयोजनम्"

इत्येतां कारणमर्यादां नातिवर्तते। लकुलीशपाशुपताभ्युपगतस्य स्वातन्त्र्यवादस्य युक्तिसहकृतत्वं पत्युः कारणापरपर्यायत्वस्वीकरणेनैव द्योत्यते।

अयं स्वातन्त्र्यवादोऽद्वैतकाश्मीरशैवाभ्युपगतस्वातन्त्र्यवादाद् भिन्नः। अयं कार्यकारणभावमनुल्लङ्घ्यमव्यभिचारिणञ्च मनुते। अत एवायं विद्याकलापशुरूपाणां कार्याणामङ्कुरस्येव बीजे पत्यौ सद्भावमङ्गीकरोति।

लकुलीशपाशुपतदर्शनं नाध्यात्मवादः (Idealism)। इदं जगदुपादानकारणस्यात्मरूपत्वं चेतनाऽचेतनयोर्वा पारमार्थिकमैक्यं ब्रह्मरूपत्वं चिद्रूपत्वं वा न स्वीकरोति। एतन्मते आत्मानात्मनोः, कार्यकारणयोः, जडचेतनयोर्भेदस्तात्त्विकः। तथाप्यनात्मनः पत्यौ, कार्यस्य कारणे, अचेतनस्य परिमितप्रमातुः पशोश्च 'कार्यस्य' पत्यभिन्नायां शक्तौ सद्भावाभ्युपगमान्नेदमभेदवादि, अपि तु भेदाभेदवादि; यत इदं कार्यकारणादीनां पारस्परिकं तात्त्विकं भेदं स्वीकुर्वदपि कार्यस्य पत्युर्बहिः स्वातन्त्र्येणावस्थानं नाभ्युपगच्छति, अपि तु तदन्तर्गतत्वं हार्य धार्य-कार्यत्वेन पत्यपेक्षया गौणताञ्च प्रतिपादयति। इदं सगुणब्रह्मवादि।

लकुलीशदर्शनं निर्गुणब्रह्माभ्युपगमोन्मुखमिव प्रतीयते। "वाग्विशुद्धः" (पा० सू० १२७) इति सूत्रस्य व्याख्यां कुर्वाणः कौण्डिन्यो यद्यपि "हित्वा वाणीं मनसा सह रूपरसगन्धविद्यापुरुषादिपरो निष्कलो ध्येयः" इति कथयन् 'वाग्विशुद्धः' इत्यस्य विद्याकलापशुरूपावान्तरतत्त्वोत्तीर्णः शिवो ध्येय इत्येवार्थं प्रतिपादयति, तथापि गणकारिकायाम्—

"यतो वाचो निवर्तन्ते अप्राप्य मनसा सह"

इत्यौपनिषदवाक्यप्रभावित इव टीकाकारः 'वाग्विशुद्धः' इत्येवं व्याचख्यौ—

"गुणधर्मद्वारेण वाचः प्रवर्तन्ते यस्मादतस्तद्व्यतिरिक्तस्तदविशेषितश्च भगवान् विशुद्ध इत्युच्यते। यथाह—

नित्यानागन्तुकैश्वर्ययुक्ते परमकारणे।
यत्र वाचो निवर्तन्ते वाग्विशुद्धः स कीर्तितः।
क्षणैकमपि यस्तत्र प्राप्नोत्येकाग्रतां यतिः।
स दग्ध्वा सर्वकर्माणि शिवसायुज्यमाप्नुयात्॥ इति।

(ग० का० ११)

तथा—

तद्वद्वागाद्यसंसृष्टं शिवं ध्यायेदनालसः॥

विवक्षोर्वाग्विशुद्धः प्राग् यद्वच्चेतसि भासते।
तद्वत्तं प्रणिधानेन दिवा रात्रौ च चिन्तयेत् ॥

(ग० का० २१)

एवं गुणधर्मव्यतिरिक्ते तदविशेषिते च पत्यौ प्रणिधानोपदेशाज्जगत्कारणत्वेन सगुणत्वे स्वीकृतेऽपि प्रणिधेयत्वेन ब्रह्मपराभिधस्य पत्युर्निर्गुणत्वमपि स्वीकृतमिति स्पष्टीभवति। अतीव गहनोऽयं विषयः समधिकमन्वेषणं विवेचनं चापेक्षते।

लकुलीशपाशुपतदर्शनस्वीकृताः पञ्च पदार्थाः

यद्यपि द्वैताद्वैतलकुलीशपाशुपतदर्शनस्वीकृताः पञ्च पदार्था द्वैतपाशुपतोपात्तैरेव नामभिः परिगणिताः, तथापि तद्वाच्येषु महान् भेदः।

(१) पतिः कारणं वा।

पतिः कारणापरपर्यायः, असद्भिन्नसत्स्वरूपः, आद्यः, अनन्तः, नित्यश्च। परमस्य नित्यत्वं मोक्षसंबन्धिनित्यत्वाद् भिन्नम्; यतोऽस्मिन्नये नित्यत्वं द्विविधम्—(क) अनाद्यनन्तम्, (ख) साद्यनन्तञ्च। पत्युर्नित्यत्वं प्रथमप्रकारकम्। मोक्षस्य नित्यत्वं द्वितीयप्रकारकम्। अयमकारणकं कारणम्, असंसारी, तैत्तिरीयारण्यकोपलब्धसद्योजातादिशब्दवाच्यः, त्रिविधस्यापि कार्यस्य व्याख्यास्यमानविद्याकलापशुरूपस्य कारणम्, समस्तस्यापि भुवनजातस्य समवायिकारणं निमित्तकारणं च। सर्वोऽपि भवस्तस्माद्बीजादङ्कुर इवोद्भवतीति भवोद्भवः। स्थितिध्वंसानुग्रहरूपक्रीडाकर्तृत्वात् क्रीडाशीलो देवः, सिद्ध-साधक-पशुभ्यः परत्वाज्ज्येष्ठः। अकृतकैश्वर्यवत्त्वाच्छ्रेष्ठः। यथोक्तम्—

दृक्क्रियालक्षणा शक्तिस्तत्त्वधर्मोऽस्य नित्यता।
श्रेष्ठोऽतः सर्वभूतेषु तस्मादेष परः स्मृतः॥ इति।

पशुष्वधर्मभयोत्पादकत्वात् कृतकर्मफलदातृत्वाद् रुद्रः। यथोक्तम्—

नानाविधैः कृतैर्यस्माद् भयैश्च विविधैस्तथा।
संयोजयति भूतानि तस्माद् रुद्र इति स्मृतः॥ इति॥

सर्वस्यापि चराचरस्य जगतः कलनात् कालः। यथोक्तम्—

ब्रह्मादिभूर्जपर्यन्तं जगदेतच्चराचरम्।
यतः कलयते रुद्रः कालरूपो ततः स्मृतः॥ इति।

उदधिमन्थने साधारण्यास्तरङ्गाकाराया वृत्तेर्निरोधवद् धर्मज्ञानैश्वर्यादिबलवृत्तिनिरोधकत्वाद् बलप्रमथनः। सिद्धेश्वरवर्जं सर्वभूतानां स्थानशरीरेन्द्रियविषयादिषु रत्याधिक्यजनकत्वात् सर्वभूतदमनः। कलाकार्येभ्योऽन्तःकरणबहिष्करणेभ्यः सूक्ष्म-स्थूल-भूतेभ्यश्च मनःशब्दगृहीतेभ्यो रहितत्वान्निष्कलोऽमन इत्यादिशब्दैः सद्योजातादिमन्त्रेषु तदनुसारिषु पाशुपतसूत्रेषु निरूपितरूपः प्रथमः पदार्थः पतिशब्दवाच्यः।

पतिरेकोऽप्यनेकगुणत्वाद् विविधकृत्यकारित्वाद् घोर-अघोर-घोरतरादिपरस्परविरुद्धरूपत्वाच्च अनेकोऽपि। एवञ्च एकानेकाश्रयायाः क्रियायाः, बहुद्रव्यसंयोगिनः पानकरसस्य वैकत्ववदेकत्वमस्याभ्युपगम्यते।

(२) कार्यं पशुर्वा

द्वितीयो मुख्यपदार्थः कार्यं पशुर्वा कथ्यते। कार्यशब्दार्थो लकुलीशपाशुपतदर्शने दर्शनान्तरस्वीकृतेभ्य एतच्छन्दार्थेभ्योऽतीव भिन्नः। कार्यं न प्रकृतिविरुद्धविकृतिस्वरूपं सांख्यनय इव। यत एतन्नये न केवलं तत्सर्वं यत्सांख्यैर्विकृतिरूपमभ्युपगम्यते, अपि तु प्रकृतिविकृत्युभयविलक्षणः सांख्यसम्मतः पुरुषोऽपि कार्यान्तर्गत एव। इदं प्रकृतेर्महान् महतोऽहंकार इत्यादिस्वरूपसांख्यपरिणामवादाद्भिन्नं स्थूलीभवनवादं प्रतिपादयति, यदनुसारं सूक्ष्मतया पतिशक्तौ विद्यमानानि महदादीनि स्थूलीभवन्ति, संयोज्यन्ते च तैस्तैर्वस्तुरूपैरीश्वरेच्छया।

नापीदं बाह्यपदार्थानां परमात्मनः प्रत्ययमात्ररूपत्वं (Mere idea) प्रत्ययवादिकाश्मीरिकस्वातन्त्र्यवादवत् (Idealistic Voluntarism) समभ्युपगच्छति। लकुलीशपाशुपतदर्शनं जडचेतनयोः पतिशक्तौ सूक्ष्मरूपेण सतोरपि पारस्परिकं भेदं मनुते। नापि कार्यजातं सर्वं भ्रान्तिस्वरूपं यथाऽद्वैतवेदान्तिनये, यतो लाकुलीशं दर्शनं नाद्वयवादोऽपि तु द्वैताद्वैतवादः। इदं परतत्त्वं नैकरूपम्, अपि त्वेकानेकरूपं प्रतिपादयति। एवं चैतन्नये बहुत्वमेकस्मिन् परतत्त्वेऽन्तर्गतं नभसीव ताराः। नापि कार्यमुत्पत्तेः प्रागसद्रूपमेवं चानित्यं यथा न्यायवैशेषिकसिद्धान्ते। एतन्नये पदार्थरूपं कार्यं नित्यं सद्रूपञ्च।

लकुलीशदर्शनं पशुस्वरूपाभ्युपगमे पतिस्वरूपप्रभावितमिव, पत्युः कारणापरपर्यायत्वस्वीकारे चोत्थानानन्तरभावि-दार्शनिकविचारधारापरिवर्धनप्रभावितमिव च भाति। अस्य मतस्य परिपोषः पाशुपतसूत्रप्रथमसूत्रे पति-पशुशब्दमात्रप्रयोगेण, कारणकार्यशब्दाऽप्रयोगेण च समर्थ्यते। प्रथमं पशुशब्दार्थः पाशनात् पशुरित्येवोपलभ्यते। अतश्च कार्यशब्दस्य द्वितीयमुख्यतत्त्ववाचकस्य वाच्योऽर्थो नायम् —

"यज्जन्यते, उत्पाद्यते, यस्य चोत्पत्तेः प्राग् अभावः" इति,

अपि तु—

"यदीश्वरेच्छापरतन्त्रं अस्वतन्त्रमेवञ्च स्वतन्त्रात् पत्युस्तच्छक्तिस्थितत्वान्न सर्वथा भिन्नम्" इति ।

पशुः पतिं सार्थकयति । पतिः पालकः । न चासति पाल्ये पतिशब्दस्य पालकापरपर्यायस्य संभवति सार्थक्यम् । कार्यशब्दवाच्यद्वितीयमुख्यपदार्थान्तर्गतास्त्रयोऽवान्तरपदार्थाः–(क) पशुगुणस्वरूपा विद्या, (ख) जडतत्त्व(Matter)रूपा कला, (ग) परिमितप्रमातृस्वरूपः पशुरिति ।

कारणकार्ययोः सम्बन्धः

लकुलीशमते कार्यं विद्याकलापशुत्रिकं नित्यं पत्यावतिष्ठते, तत एव चोद्भवतीति पतिर्भवोद्भवः । सृष्टिरपि भवे विद्यमानानामेव वस्तूनां वृत्तिलाभमात्ररूपा । कार्यत्रयं पत्युः कारणस्य प्रधानगुणरूपायां धर्मरूपायां वा शक्तौ निलीनमास्ते । न चेत्थं कार्यकारणयोर्वृत्तिसंकरदोषो गोजाविमहिषीक्षीरवद् दीपादित्यप्रकाशनयनरश्मिवच्चाऽसाङ्कर्यस्य समर्थनात् । पतिः सर्वव्यापकः, परं कार्याणि परिच्छिन्नव्यापकत्वानि । एवञ्च पशुः पुरुषो वा चतुर्विंशतितत्त्वानि कलादिपृथिव्यन्तानि व्याप्नोति । कला, येह सांख्यसम्मतप्रधानापरपर्यात्वेनेव स्वीकृता प्रतिभाति, महदारभ्य तत्त्वत्रयोविंशतिकम्, एवमेव चाहङ्कारादि तदनन्तरपरिगणितं तत्त्वजातं व्याप्नोति । अतोऽस्मिन्दर्शने भिन्नानि कार्याणि माक्षिककीटद्रव्यवन्न पृथक्सत्ताकानि, अपि तूक्तप्रकारेणोत्तरोत्तरं तत्त्वं क्रमशोऽधराधरं व्याप्नोति । व्याप्यव्यापकौ पारस्परिकवैविक्त्येन प्रतीयेते, हरिद्रोदकवत् । यथा हरिद्रारञ्जिते जले शीतस्पर्शसांसिद्धिकद्रवत्वप्रतीतिरूपतया जलस्य प्रतीतिस्तथा गन्धवर्णघनक्षारत्वादिभिर्हरिद्रायाः ।

अतः कार्यकारणे सहैव वर्तेते, परं परस्परतः पृथक्सत्तां भजेते, स्वरूपभेदात् ; यद्यप्युभे अप्युक्तप्रकारेण व्यापके । यतः कार्याभावे कारणं कारणमिति वक्तुं न युक्तिवादसंगतम्, नापि पाल्याभावे पतिः पतिरिति । कारणे कार्यं भूमाविव बीजं पृथक्स्थिति । कारणं स्वतन्त्रं कार्यं चास्वतन्त्रम् । पूर्वः पतिरपरः पशुः । पूर्वश्चिद्रूपोऽपरश्चिदचिदुभयरूपः ।

(क) विद्या

त्रिषु कार्यावान्तरतत्त्वेषु विद्या प्रथमा । इयं पशुगुणरूपा । लाकुलीशानां ज्ञानमीमांसा प्रमाणमीमांसा कर्तव्यमीमांसा चैनामेवाश्रित्य प्रवर्तन्ते । इयं चेतना, स्वप्रकाशा, बाह्यविषयप्रकाशयित्री, पुरुषगुणतया पुरुषं जडरूपायाः कलाया विभेदयति ।

इयं विध्यनुष्ठानजन्यः प्रथमो लाभ इत्यप्यभ्युपगता।

प्रथमलाभरूपा चेयं ज्ञानमित्युच्यते।

आगमरहस्यार्थद्योतिका मलानां तदपनयनोपायानाञ्च तात्त्विकस्वरूपाणि वेदयति, नयति च लाभान्तरं प्रति सति मलापगमे।

पत्यादिपञ्चपदार्थविषयकं समासविस्तरविभागविशेषोपसंहारनिगमनतस्तत्त्वज्ञानमस्याः स्वरूपम्, अतश्चेयं प्रमाणाभासजमिथ्याज्ञानविरोधिनी। (ग० का० पृ० ९)

एष विद्याशब्दः प्रकरणानुसारम्—(१) पशुगुणार्थे, (२) तद्द्वारेणोपात्तज्ञानार्थे, (३) गुरूपदेशजनितोपादेयतत्त्वज्ञानार्थे, (४) प्रथमलाभार्थे च प्रयुज्यते।

इयं विद्या पशोरुपाधित्वेन गुणत्वेन विशेषणत्वेन च वर्ण्यते। इयं प्राधान्येन (१) बोधस्वभावा, (२) अबोधस्वभावा चेति द्विविधा। बोधस्वभावा (१) विवेकप्रवृत्ति (२) सामान्यप्रवृत्त्यपरपर्यायाऽविवेकप्रवृत्तिरूपाभ्यां द्विधा। अबोधस्वभावा तु (१) धर्म (२) अधर्म- (३) संस्काररूपैस्त्रिधा। इमे विद्याविभागा विभिन्नासु परिस्थितिषु प्रतिक्षिप्तस्य पशोर्विभिन्नानि विद्यारूपगुणकर्माणि द्योतयन्ति। धार्मिकपरिस्थितौ गुरूपदेशं भक्तिश्रद्धाध्यानपूर्वकं शृण्वतो गुरूपदिष्टपरतत्त्वज्ञानरूपेण परिस्फुरन्ती बोधस्वभावविद्यान्तर्गता विवेकप्रवृत्तिरित्युच्यते।

चित्स्वरूपा विद्या सर्वदा स्वप्रकाशा। परप्रकाशकत्वं चास्याः कादाचित्कम्। यदेयं विषयं प्रकाशयति तदा बोधस्वभावेत्युच्यते। विषयमप्रकाशयन्ती स्वप्रकाशमात्रा चेयमबोध- स्वभावा। कृतकर्मफलरूपौ धर्माधर्मौ स्वान्तर्भावयन्त्यबोधस्वभावा विद्या लाकुलीशकर्तव्य- मीमांसाया आधारभूता। धर्माधर्मयोरबोधस्वभावविद्यान्तर्भावनं द्योतयति यद्धर्माधर्मौ स्वप्रकाशौ, पुरुषस्तौ प्रकाशान्तरनिरपेक्षं स्वात्मानमिव वेत्ति, न च शक्नोत्यात्मानं चिन्तयितुं स्वगुणभूताभ्यां ताभ्यां विना।

अबोधस्वभावविद्यायास्तृतीयो विभागः संस्कारशब्दवाच्यः। अयं न कृतकर्मणां फल- स्वरूपोऽपि तु ज्ञातानां विषयाणाम्। लाकुलीशज्ञानमीमांसेममेवाश्रित्य प्रवर्तते। अयं स्मरणकार- त्वात् सविकल्पज्ञानकारणेष्वेकः, यतः स्मर्यमाणाऽभिधानसम्बन्ध एवाऽविकल्पं सविकल्पीकरोति।

बोधस्वभावविद्याया विवेकप्रवृत्तिरूपो विभागः प्राग् विवेचितः। सामान्यप्रवृत्त्यपरपर्याया- विवेकप्रवृत्तिरूपो द्वितीयो विभागो लाकुलीशदर्शने प्रत्यक्षज्ञानस्य साधनं चित्तमित्युच्यते। (ग० का० पृ० १०)

परन्तु चित्तं नान्तःकरणेष्वेकं यथा वेदान्तनये। इदं पुरुषगुणभूताया बोधस्वरूपविद्याया व्यापाररूपम्।

व्यापारश्च स्वप्रकाशायाः परप्रकाशिकायाश्च विद्यायाः परप्रकाशनाय प्रकाशप्रसररूपः। अयं विषयं प्रदीपवत् प्रकाशयति। एवं विषये प्रकाशितेऽन्तःकरणबहिष्करणेषु यथायथं व्यापृतेषु प्रत्यक्षज्ञानं जायते।

प्रत्यक्षं निर्विकल्पसविकल्पभेदाद् द्विविधम्।

त्रीणि प्रमाणानि

इह प्रत्यक्षानुमानागमाख्यानि त्रीण्येव प्रमाणानि। अर्थापत्ति-सम्भव-ऐतिह्याभावादीनि दर्शनान्तरस्वीकृतानि त्रिष्वेवान्तर्भवन्ति।

१. प्रत्यक्षं द्विविधम्—(क) इन्द्रियप्रत्यक्षम्, (ख) आत्मप्रत्यक्षम्। पूर्वमिन्द्रियार्थ-सम्बन्धव्यञ्जकसामग्र्यं धर्माधर्मप्रकाशदेशकालचोदनाद्यनुगृहीतं सत् प्रमाणम्। अपरन्तु चित्तान्तःकरणसम्बन्धसामग्र्यम्। (पा० सू० पृ० ७)

२. प्रत्यक्षपूर्वकमनुमानं द्विविधम्—(क) दृष्टम्, (ख) सामान्यतो दृष्टम्। पूर्वं द्विविधम्—(अ) पूर्ववत्, (आ) शेषवत्। पूर्वदृष्टोऽयं षडङ्गुलीयकः स एव, विषाणमात्र-दर्शनाद् गौरिति च क्रमशस्तयोरुदाहरणे। अपरं त्वेकप्रकारकमेव, येन गतिपूर्विकां मनुष्यपश्वादीनां देशान्तरप्राप्तिं प्रत्यक्षतोऽनुभूयाऽप्रत्यक्षाण्यादित्यगतिरनुमीयते।

आगमश्चाऽऽमहेश्वराद् गुरुपारम्पर्यागतं शास्त्रम्।

(ख) कला

कला कार्याख्यप्रधानतत्त्वान्तर्गतं द्वितीयं तत्त्वम्। इयं जडा। अस्याः सांख्याभ्युपगत-प्रधानापरपर्यायेण प्रकृतितत्त्वेन महत्साम्यम्। एतदन्तर्गतानि महदादिपृथिव्यन्तानि त्रयोविंशति-तत्त्वानि सांख्यसाधारणानि। द्वैतपाशुपतदर्शने चेयं कला प्रधानापरपर्यायत्वेन सम्मताऽऽसीदिति

"कार्यं प्राधानिकं महदादि"

इत्यादिवाक्यानां शाङ्करशारीरकभाष्ये तट्टीकासु चोपलभ्यमानत्वात् प्रतिभाति। इयं परिमितप्रमातुर्मानसशरीरोपाधिः (Psychophysical limitation) स्वयमचेतनापि चेतनाश्रिता। अस्याश्चेतनपारतन्त्र्यं सन्नद्धाश्वस्य रथस्य वाहकपारतन्त्र्यमिव।

इयं (क) कार्य-(ख) करणरूपाभ्यां द्विविधा। कार्यरूपायां कलायां पृथिव्यादिपञ्च-भूतानि, गन्धादयश्च पञ्च भूतगुणा अन्तर्भवन्ति। करणे च पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि त्रीण्यन्तःकरणानि चान्तर्भवन्ति।

(ग) पशुः

चेतनः प्रमाता पशुः कार्यान्तर्गतस्तृतीयोऽवान्तरपदार्थः। अयं कार्यान्तः परिगण्यते, यतोऽस्य विशिष्टा सत्तेश्वरकृता। परमिदं न विस्मरणीयं यद्यत्र तत्र मुख्यतत्त्वपञ्चकान्तर्गतकार्य-रूपद्वितीयतत्त्वार्थमपि पशुशब्दः प्रयुज्यते। तत्रार्थभेदः प्रागेव निर्दिष्टः। सिद्धेश्वरवर्जं सर्वोऽपि चेतनः प्रमाता पशुः पाशितत्वादस्वातन्त्र्यात् कारणशक्तिनिरोधात् (पा० सू० पृ० ५)बाह्यविषया-श्रितत्वात्, व्यापकत्वेऽपि पाञ्चभौतिकशरीरेण स्वतादाम्यीकरणात्, प्रलये शरीरसम्बन्धे विगते नवसृष्टौ शरीरग्रहणस्वातन्त्र्याभावात्, प्रवृत्तिनिवृत्तिस्थितीष्टानिष्टस्थानशरीरेन्द्रियविषयादिप्राप्ता-वीश्वरच्छन्दःपरत्वाच्च। अनादिपाशबद्धोऽयं कला-तदन्तर्गतत्रयोविंशतितत्त्वावच्छिन्नत्वात् परिमितः।

परिमितः प्रमाताऽचेतनकलासम्बन्धजनितावच्छेदव्यपगमेऽपि पारिमित्यं न जहाति, प्रलये स्थूलशरीरसंबन्धाऽभावे जातेऽपि नवसृष्टौ तस्य भूयोऽभिजननात्। अयं शरीरेन्द्रियादि-संघातरूपस्य क्षेत्रस्य ज्ञातेति क्षेत्रज्ञः। इच्छाद्वेषप्रयत्नसुखदुःखज्ञानैरनुमीयमानत्वादनुमेयः, बाह्यविषयान् स्वप्रकाशेन प्रकाश्य गृह्णाति।

पशुः पतिवत् सर्वव्यापकत्वेऽपि किञ्चिज्ज्ञत्वात् किञ्चित्कर्तृत्वाच्च सर्वज्ञात् सर्वशक्तिमतः पत्युर्भिन्नः। परमयं भेदः पशोः सांसारिकावस्थायामेव, सायुज्यरूपमोक्षस्य माहैश्वर्यावाप्तिरूप-त्वान्मुक्तः सदाशिव एवेति किञ्चिज्ज्ञत्वकिञ्चित्कर्तृत्वनिष्ठो भेदो मोक्षे व्यपगच्छत्येव।

पशुः प्राधान्येन द्विविधः—(१) साञ्जनः शरीरेन्द्रियादिसम्बन्धी। स च चतुर्दशविधः। यथोक्तम्—

दैवमष्टविधं प्रोक्तं तैर्यग्योनं च पञ्चधा।
पर्वमेकं तु मानुष्यमेतत्संसारमण्डलम्॥ इति।

२. निरञ्जनः शरीरेन्द्रियादिसम्बन्धरहितः। स च त्रिविधः—(क) संहृतः प्रलयकालभावी पशुः, (ख) कैवल्यगतः पुरुषप्रकृत्योः पारस्परिकविविक्तत्वानुभवात् प्रकृतिवियुक्तः पशुः, (ग) निष्ठायोगयुक्तः शिवसायुज्यप्राप्त्या संक्रान्तसर्वज्ञत्वसर्वकर्तृत्वशक्तिः।

पञ्च मलाः

मिथ्याज्ञानमधर्मश्च सक्तिहेतुश्च्युतिस्तथा ।
पशुत्वमूलं पञ्चैते तन्त्रे हेयाधिकारतः ॥ (ग० का० २२)

इति वचनानुसारं पञ्च मलाः ।

१. संशयविपर्ययादिभेदभिन्नं प्रमाणाभासजं ज्ञानं स्वबीजेन सह मिथ्याज्ञानमित्युच्यते । व्याख्यास्यमानपञ्चावस्थान्तर्गताऽव्यक्तावस्थाऽऽगमे प्रत्यनीकरूपत्वान्मनःकालुष्यरूपाणां कामक्रोधलोभमदमात्सर्यादीनां तुच्छभावानामज्ञानरूपत्वान्मिथ्याज्ञानान्तर्गतत्वमेव ।

२. वर्ज्यकर्मानुष्ठानं स्वविकारेण तत्फलसञ्चयरूपेण सहितमधर्मः ।

३. शास्त्रान्तरविहितकर्मानुष्ठानजन्येन सङ्करेण धर्मेण सहिता विषयासक्तिः सक्तिहेतुः ।

अयं परिमितप्रमातारं शरीरप्राणबुद्ध्यादिभिः स्वतादात्म्यं कर्तुं प्रवर्तयति ।

४. ध्यातृचित्तस्य ध्यानविषयाद् रुद्रतत्त्वादीषच्च्यवनस्य विषयं प्रति किञ्चिदौन्मुख्यमात्रस्य न तु विषयप्राप्तेः कारणं च्युतिः ।

इदमिहावधार्यम्—यथा मिथ्याज्ञानस्य प्रमाणाभासेन स्वबीजेन सह मलत्वम्, अधर्मसङ्करयोः स्वस्वविकाराभ्यां क्रमशः पापसञ्चय-सङ्गाभ्यां सह मलत्वम्, तथा च्युतेरप्यधर्माख्येन स्वबीजेनैव सह मलत्वम्, इमे मिथ्याज्ञानादयो न पुरुषस्य चित्तविद्ययोर्वा भावाः, अपि त्वधर्मविकारा एव । परं ज्ञानेच्छाभ्यां संमिश्रणात् क्षीरसंमिश्रितोदकवत्तदभिन्ना इव गृह्यन्ते ।

५. येन मलेन युक्तः पशुः पत्युर्विभिन्नः, यः कैवल्यगतानामन्यमलाभावेऽपि पुनः संसारापत्तिकारणम्, संसारस्य चानादिकारणम्, सर्वेषु च मलेषु मुख्यतमः स पशुत्वमूलमित्युच्यते । व्याख्यास्यमानचतुर्दशलक्षणोपेतश्चायम् । तानि च लक्षणानि अनात्मन्यात्मभावपरित्यागपूर्वकं महेश्वरैकात्म्यं भावयत्सु ये गुणा उदयन्ति, ये च पाशुपतसूत्रप्रथमाध्याये "सर्वज्ञता" इति द्वाविंशतिसूत्रादारभ्य "सर्वत्र चाप्रतिहतगतिर्भवति" इति सप्तत्रिंशसूत्रपर्यन्तं परिगणिताः, तद्विपरीता असर्वज्ञत्वादयः ।

(१-२) असर्वज्ञत्वम् असर्वकर्तृत्वं च

इमौ गुणौ लाकुलीशाभ्युपगतं परिमितप्रमातारं सांख्यीयाद् विभेदयतः । सांख्यनये मुक्तिः कैवल्यस्वरूपा चेतनपुरुषस्य प्रकृतेः पृथक्स्थितिरेव । लाकुलीशदर्शने कैवल्यं न तात्त्विको मोक्षः ।

कैवल्येऽप्यसर्वज्ञत्वासर्वकर्तृत्वलक्षणस्य पशुत्वमलस्य संसृतिमूलकारणस्य सत्त्वात्, कैवल्यगतानामन्यमलाभावेऽपि पशुत्वादेव पुनः संसारापत्तेश्च। परमो मोक्षस्तावन्न भवति यावन्न जायते शिवसायुज्यम्, यस्मिन् सर्वज्ञत्वसर्वकर्तृत्वे शिवात् पशुं संक्रामतः।

(३-१४) कृतसंहरणासामर्थ्यम्, करणकार्याभ्यां विना ज्ञानकर्माक्षमत्वरूपं सकरणत्वम्, अपतित्वम्, सर्वावेशाऽसामर्थ्यम्, सर्वावेश्यत्वम्, सर्वज्ञत्वाभावः, वध्यत्वम्, भीतत्वम्, क्षयित्वम्, जरित्वम्, मरणधर्मित्वम्, प्रतिहतगतित्वं चेति चतुर्दशपशुत्वगुणाः।

पशुमलक्षपणोपाया लाभोपायाश्च

वासश्चर्या जपध्यानं सदारुद्रस्मृतिस्तथा।
प्रसादश्चैव लाभानामुपायाः पञ्च निश्चिताः॥ (ग०का०पृ० ७)

इति गणकारिकानुसारं यद्यपि [१]वास-[२]चर्या-[३]जपध्यान-[४]सदारुद्रस्मृति-[५]प्रसादरूपाः वक्ष्यमाणस्वरूपपञ्चलाभोपाया एव, तथापि टीकाकारस्तान् उक्तपञ्चप्रकारमलक्षपणोपायत्वेनापि मनुते। (ग० का० पृ० २२)

१. वासः

वासशब्दोऽस्मिन् दर्शनेऽतीव पारिभाषिकः। अयं गुरुणा सकृदुच्चारितस्य वाक्यस्य सम्पूर्णार्थग्रहणसामर्थ्यम्, गृहीतस्यार्थस्य चिरकालव्यवधानेऽपि स्मरणसामर्थ्यम्, प्रतिपाद्यविषयैकभागश्रवणात् सम्पूर्णविषयप्रतिपत्तिसामर्थ्यम्, आचार्यदेशीयैरुक्तानामर्थानां युक्तायुक्तप्रविभागेन यथायथं स्वीकारत्यागसामर्थ्यम्, श्रुतस्यार्थस्य प्रतिपादने तदनुकूलाचरणे च सामर्थ्यम्, मिथ्याज्ञाननिवृत्तिपूर्वकविद्याभिव्यक्तिकरेण पूर्वापरव्याघातपौनरुक्त्यादिदोषरहितप्रवचनेन गुरुसन्तोषणसामर्थ्यम्, गुरुपरिचर्यायां गुरुवचनानुपालनेऽतियत्नञ्च अभिधत्ते।

२. चर्या

"धर्मस्योपायश्चर्या" इति।

जीवन-देवार्चनप्रकारावस्यां संगृहीतौ। इयं पाशुपतसूत्रे प्रथमाध्यायद्वितीयसूत्रादारभ्य द्वितीयाध्यायाष्टमसूत्रपर्यन्तं व्याख्याता, यद्यपि मध्ये विषयान्तरप्रवेशोऽपि विद्यत एव। इदमिह सम्यगवधेयम्। चर्याशब्दो गणकारिकाटीकायामतीव विस्तृतार्थे प्रयुक्तः। भस्मस्नानादारभ्य समाधिपर्यन्तः सर्वोऽपि कायिकमानसिकाध्यात्मिकक्रियाकलापश्चर्यायामन्तर्भावितः।

चर्याया दान-याग-तापरूपाणि त्रीण्यङ्गानि। (क) दशभिर्नमस्कारैः परमेश्वरायात्मसमर्पणं दानम्, (ख) यथाशासनं भस्मस्नानादिक्रियाणां करणं यागः। (ग) विध्यनुष्ठानपरस्य अप्रतीकारपुरःसरमाध्यात्मिकाधिभौतिकाधिदैविकत्रिविधदुःखसहिष्णुत्वं तापः। इमान्यपुनरावृत्तिफलकत्वादतिदानातियागातितापशब्दैरुच्यन्ते पुनरावृत्तिफलकदर्शनान्तराभ्युपगतदानादिभ्यो विशेषयितुम्। त्र्यङ्गापि चर्या द्विविधा—वृत्तम्, द्वाराणि चेति। (अ) दैनन्दिनचर्यारूपं वृत्तं पञ्चप्रकारकम्—[1]भस्मस्नानम्, [2]भस्मशयनम्, [3]मन्दिरेऽभिनयद्वारा शिवतादात्म्यापत्तिरूप उपहारः, [4]चित्तैकाग्र्यरूपो जपः, [5]देवस्थानस्थितमूर्तिप्रदक्षिणा इति पञ्चभेदभिन्नत्वात्। (आ) द्वाराणि तु क्राथन-स्पन्दन-मण्टन-शृङ्गारण-अपितत्करण-अपितद्भाषणरूपाण्यनेकविधानि।

३. जपध्यानम्

चर्याया जपध्यानाभ्यामतीव घनिष्ठः सम्बन्धः, चर्यायाः शारीरिकक्रियात्वाद् जपध्यानयोश्च मानसिकक्रियारूपत्वात्। मन्त्रावर्तनं जपः। स द्विविधः—(अ) प्रत्याहारफलः, (आ) समाधिफलश्च। प्रत्याहारोऽपि द्विविधः—(क) अपरः, (ख) परश्च। तत्रेच्छयाऽन्तःकरणस्य बाह्यविषयेभ्यः प्रत्याहरणपूर्वकं ध्येये क्षणं निश्चलीकारोऽपरः प्रत्याहारः। यदा तु बाह्यविषयेभ्यो मनः प्रत्याहृत्य ध्येयेऽवस्थापयितुं सततोद्युक्तस्य साधकस्य सप्रत्याहारजपवशान्निर्मलं चेतः प्रयत्ननिरपेक्षमेव ब्रह्मण्यलातचक्रवदवतिष्ठते तदा परः प्रत्याहारः। अयमनेकजन्मोपार्जितं कर्म क्षणेनैव दहति। ध्येयतत्त्वे च चित्तं स्तम्भनिक्षितायःकीलकवन्निश्चलीकरोति। (ग० का० टी० पृ० २०)

रुद्रतत्त्वे सदृशचिन्ताप्रवाहो ध्यानम्। तद् द्विविधम्—(क) जपपूर्वकम्, (ख) धारणापूर्वकञ्च। जपपूर्वकं ध्यानं परप्रत्याहारकारणम्, "परः प्रत्याहारो जपपूर्वक एवायमित्युक्तः" इति वचनात्। सप्रत्याहारजपस्वरूपञ्च निर्दिष्टमेव किञ्चिद् अपरप्रत्याहारवर्णनावसर इति न पुनरुच्यते। जपपूर्वकं ध्यानं सविषयं भवति, अतो धारणापूर्वकादस्य भेदः। संहारावस्थायां मूर्च्छावस्थायां वाऽपतितस्य प्रमातुश्चित्तस्य निरालम्बना विषयसंसर्गशून्याऽवस्था धारणेत्युच्यते, "निरालम्बनं चितममूढस्य धारणम्" इति वचनात्। धारणायां स विषयो यस्मिंश्चित्तं संयोज्यते विषयतया बाह्यतया च न भाति, अपि तु चित्तैक्येन तद्वृत्तिरूपत्वेन।

पूर्वं जपः प्रत्याहारफलसमाधिफलरूपाभ्यां द्विविधः कथितः । प्रत्याहारफलश्च व्याख्यातः । समाधिफलश्चान्तिमस्थितिरूपः ।

४. सदारुद्रस्मृतिः

अविच्छेदेन रुद्रस्मरणं देवनित्यत्वाऽपराभिधं सदा रुद्रे चेतःसमाधानस्य मुख्योपायभूतम् । इदं चेतो विषयान्तरगमनाद्रुणद्धि ।

५. प्रसादः

प्रसादः पत्युः साधकाय सर्वज्ञत्वसर्वकर्तृत्वादीन् स्वगुणान् दातुमिच्छा । अयं पशुत्वान्मोक्षस्य सिद्धिप्राप्तेश्च मुख्य उपायः ।

पञ्च देशाः

यत्र मुमुक्षुणा क्रमभाविनीषु भिन्नासु पञ्चसु स्थितिषु क्रमशो वस्तव्यं ते देशा अपि पञ्च—१. शिवमन्दिरम्, २. शिवभक्ताकीर्णं स्थानम्, ३. गुहा, ४. श्मशानम्, ५. रुद्रश्च ।

पञ्चावस्थाः

यासु पूर्वोक्तदेशेषु मुमुक्षुणा क्रमेण भाव्यं ता अवस्था अपि पञ्च—

१. व्यक्ता—अस्यां मुमुक्षुणा भस्मनिर्माल्यादिपाशुपतचिह्नधारिणा भवितव्यम्, येन पाशुपतोऽयमिति लोका जानीयुः ।

२. अव्यक्ता—अस्यां बाह्यपाशुपतलिङ्गानि परित्याज्यानि ।

३. जयः—साऽवस्था यस्यां मुमुक्षुरिन्द्रियजयार्थं सततमुद्युज्यते ।

४. छेदः—पूर्णा संसारविरक्तताऽवस्था । इयं दानशब्देनाप्युच्यते, यतोऽस्यां मुमुक्षुणा सर्वस्वं त्यज्यते ।

५. निष्ठा—सर्वस्य साधकव्यापारस्यात्यन्तोपरमः ।

एवमन्येऽपि पञ्चका लाभ-विशुद्धि-दीक्षाकारि-बलाख्या गणकारिकादौ वर्णितास्तत्रैवालोकनीयाः ।

३. योगः—तृतीयं मुख्यं तत्त्वम्

लाकुलीशदर्शने योगशब्दः पातञ्जलदर्शन इव न चित्तवृत्तिनिरोधार्थ एव प्रयुज्यते, अपि तु प्राधान्येन आत्मेश्वरसंयोगार्थे;

"आत्मेश्वरसंयोगो योगः" (पा० सू० टी० २४),

"चित्तद्वारेणेश्वरसम्बन्धः पुरुषस्य योगः" (ग० का० टी० १४)

इति वचनप्रामाण्यात्। तृतीयमुख्यतत्त्वार्थे प्रयुज्यमानस्य योगशब्दस्यायमेवार्थः। एवञ्च पातञ्जलदर्शने योग उपायमात्रम्, इह तु योग उपेयः। परन्तु स्मरणीयमिदं यदयं शब्दः क्वचनोपायार्थेऽपि प्रयुज्यतेऽस्मिन् दर्शनेऽपि।

आत्मेश्वरसंयोगरूपो योगः परिच्छिन्नप्रमातृक्रियामात्रेण न जायते, यथा श्येनस्य स्थाणुना। अयं तु उभयकर्मजः, यथा युद्धप्रवृत्तयोर्मेषयोः। अतो योग ईश्वरानुग्रहं विना न शक्यते लब्धुमिति लाकुलीशसिद्धान्तः।

जीवात्मा विभुः, एवञ्च सर्वदैवास्येश्वरसंयोगः स्वतः सिद्धः; तथाप्यनादिपशुत्वमलजनिताज्ञानक्रियाशक्त्योः परिच्छेदादस्य वियोग ईश्वरात्। अतो योगो मलध्वंसमपेक्षते। स च पाशुपतशास्त्रोक्तविध्यनुष्ठानजन्यः। स च विधिः पाशुपतसूत्रे सविस्तरं वर्णितः प्रथमसूत्रकृतप्रतिज्ञानुसारम्—

"अथातः पशुपतेः पाशुपतं योगविधिं व्याख्यास्यामः" इति।

द्विविधो योगः

क्रियालक्षणः क्रियोपरमलक्षणश्चेति द्विविधो योगः। प्रथमो योगः शारीरिकक्रियाप्रधानया मानसक्रियया प्राप्योऽत एव क्रियालक्षण इत्युच्यते। लकुलीशपाशुपतदर्शनम् आङ्गिक-वाचिक-आहार्य-सात्त्विकरूपांश्चतुरोऽभिनयान् नृत्यं गीतञ्च शिवसायुज्योपायत्वेन स्वीकरोति, एवञ्च नाटकीयकार्यस्य आरम्भ-यत्न-प्राप्त्याशा नियताप्ति-फलागमरूपपञ्चावस्थावद्योगस्यापि पञ्चावस्था मनुते।

प्रारम्भिकी प्रथमावस्था शिवे आत्मभावप्रवृत्तिरूपा (पा० सू० टी० ४१)। सा च प्रथमाध्यायद्वितीयसूत्रादारभ्यैकोनविंशतिसूत्रपर्य्यन्तं व्याख्यातस्य विधेरनुष्ठानाल्लभ्यते। इदं सर्वं चर्याविवेचनावसरे पूर्वमेवोक्तमिति पिष्टपेषणमनावश्यकम्।

यदा प्रथमावस्थानुष्ठितविधिप्रभावात् कामक्रोधलोभमोहमदमात्सर्येर्ष्यारूपकालुष्यविमुक्ते साधके तत्त्वज्ञानमुदेति, तदा स्वीयकालुष्यविमुक्तत्वं परीक्ष्य "अनेन विधिना रुद्रसमीपं गत्वा" (पा० सू० १०६) इति सूत्रोक्तामवस्थां प्राप्तुं दरिद्रपुरुषस्नातमलदिग्धाङ्गो रूढनखश्मश्रुरोमधारी सर्वसंस्कारवर्जितो व्युच्छिन्नवर्णाश्रमचिह्नो नगरं प्रविश्य यत्र लौकिकानां समूहस्तत्र हस्त्य-

श्वरथपदातीनां स्थानं वर्जयित्वा तस्मिन् स्थाने उपविश्य, यस्मिञ्जनदृष्टिनिपातो भवेत्, सौषुताभिनयरूपं क्राथनम्, वायुसंसृष्टत्वाभिनयनरूपं स्पन्दनम्, उपहतपादेन्द्रियत्वाभिनयरूपं मण्टनम्, रूपयौवनसंपन्नां स्त्रियं वीक्ष्य कामित्वाभिनयरूपं शृङ्गारणम्, शुच्यशुच्योः कार्याकार्ययोश्च विभागानभिज्ञत्वाभिनयनरूपमपितत्करणम्, पुनरुक्तव्याहतादिभाषणेन असम्यग्वाद्यभिनयनरूपमपितद्भाषणं तथा कुर्याद्येनायं परिभवं गच्छेत्। अयं विधिर्न केवलं सत्यपि परिभवे मनःकालुष्याभावपरीक्षणार्थम्, अपि तु परिभवितॄणामिष्टापूर्तजन्यं सकलमपि सुकृतफलमादातुम्। एतत् समर्थयितुं लकुलीशः पाशुपतसूत्रे परम्परागतां गाथां समुल्लिखति स्म यदिन्द्रोऽसुराणां पुण्यफलमादातुं स्वदुष्कृतफलञ्च तेभ्यो दातुं क्राथनस्पन्दनादिरूपं पूर्वोक्तं पाशुपतमाचरत्। यथाह—

इन्द्रो वा अग्रे असुरेषु पाशुपतमचरत्।

स तेषामिष्टापूर्तमादत्त।

मायया सुकृतया समविन्दत्। (पा० सू० १०१-१०३) इति।

एवं शास्त्रोक्तपञ्चपदार्थस्वरूपवेत्ता लाभमलोपायाभिज्ञः साधकः क्राथनाद्यभिनयेनात्मानं परिभवपात्रीकृत्य परिभावकानां पुण्यमादाय कृत्स्नतपा भवति, आत्मसाक्षात्कारं विन्दते च। यथाह—

"परिभूयमानो हिं विद्वान् कृत्स्नतपा भवति" (पा० सू० ८८)।

अस्यां द्वितीयावस्थायां साधकेन "वामदेवाय नमः" इति मन्त्रो जपनीयः। अस्यामवस्थायां साधकः पत्या सह समीपाभिधं योगं प्राप्नोति। केषाञ्चन दार्शनिकानां सामीप्यमोक्षाभ्युपगम एतन्मूलक एव भाति।

"अनेन विधिना रुद्रसमीपं गत्वा" (पा० सू० १०६)।

एवं पूर्वोक्तशारीरिकक्रियासहकृतमानसक्रियाप्राप्यः प्रथमो योगः क्रियालक्षण इति परिभाष्यते।

क्रियोपरमलक्षणो योगः

क्रियोपरमलक्षणो द्वितीयो योगो नापेक्षते कामपि शारीरिकीं क्रियाम्। अयं केवलमनोनियोगसाध्यः। अन्यास्तिस्रोऽवस्था एतदन्तर्गताः स्वीक्रियन्ते।

तृतीयावस्था सांसारिक-सर्वपदार्थविरक्तस्य साधकस्य गुहां गत्वा "अघोरेभ्यः" इति मन्त्रोक्तशिवरूपध्यानादारभते। लाकुलीशदर्शने जपध्यानयोरतीव घनिष्ठः सम्बन्धः। अत एव

गणकारिकायां पञ्चसु पाशापरपर्यायमलक्षपणोपायेषु जपध्याने समस्य जप-ध्यान-रूप एक एवोपायो निर्दिष्टः।

"तृतीयचतुर्थकस्य मन्त्रस्यावर्तनं जपः" (ग० का० टी० १९)

"रुद्रे सदृशचिन्ताप्रवाहो ध्यानम्" (ग० का० टी० २०)

इति चोक्तम्। अस्यामवस्थायां ध्यानदौर्बल्याद् ध्येयं गतमपि साधकचेतस्ततः प्रत्यावर्तते, परन्तु विषयान्तरमगत्वा ध्येयमेव प्रत्यागच्छति। अतो विषयान्तरसम्पर्करहित-ध्येयमात्रविषयक-गमनप्रत्यागमनकारिसाधकचेतोऽविच्छेदेन ब्रह्मावस्थितं भाति, यथा—अलाते अतित्वरया भ्रामितेऽविच्छिन्नमग्निचक्रं भाति। यथाह—

"ब्रह्मण्येवालातचक्रवदवतिष्ठते" (ग० का० पृ० २०)

इयमिच्छाशक्तिप्रेरितध्यानजन्या।

चतुर्थ्यवस्था श्मशाने वसतः साधकस्य धारणापूर्वकं 'तत्पुरुष'मन्त्रोपलक्षित-ब्रह्मध्यानाज्जायते। अस्यां ध्यानविषयो ध्यातृबाह्यतया न भाति, अपि तु ध्यात्रैक्येन। यतः संहारावस्थायां मूर्च्छावस्थायां वाऽपतितस्य प्रमातुश्चित्तस्य निरालम्बना विषयसंसर्गशून्या दशा धारणेत्युच्यते। यथाह—

"निरालम्बनं चित्तममूढस्य धारणम्" (ग० का० पृ० २०) इति।

अयं 'निष्ठायोगः' 'देवनित्यता' इति च परिभाष्यते (पा० सू० ११६-११७)। अस्यामवस्थायां यती पात्रागतं महिषवराहादीनां मांसमपि भुङ्क्ते, "मांसमदुष्यम्" (पा० सू० पृ० ११९) इति वचनात्। पञ्चम्यन्त्या चावस्था "ईशानः सर्वविद्यानाम्" इति मन्त्रोपलक्षिते ब्रह्मणि समाधिना जन्यते। अयं योगः सायुज्याभिधः,

"लभते रुद्रसायुज्यम्" (पा० सू० १३७)

इति वचनात्। सायुज्ययोगे सर्वज्ञत्वादिपतिशक्तयः पशुं संक्रामन्ति। एवञ्च पशुः सदा नित्यं सततमव्युच्छिन्नं शिवो भवति,

"सदाशिवः" (पा० सू० १४६)

इति वचनात्। इयमवस्था शरीरत्यागानन्तरं जायते।

परन्तु योगशब्दः सायुज्यप्राप्त्युपायार्थेऽपि प्रयुज्यत इति प्रागुक्तम्। अत उपायापर-पर्यायो योगो यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधिरूपाष्टाङ्गः। यमाश्च पञ्चार्थ-

भाष्ये (पृ० १६-३४), तथा तदनुसारं विशुद्धमुनिकृतयमप्रकरणे दशसंख्याकाः प्रोक्ताः। तदुक्तम्—

अहिंसा ब्रह्मचर्यं च सत्यासंव्यवहारकौ।
अस्तेयं गुरुशुश्रूषा शौचमाहारलाघवम् ॥
अक्रोधोऽप्रमाद उक्ताः पाल्यन्त इति शम्भुना।
दशैवादेहपतनात् पञ्चार्थे योगिनां यमाः ॥ इति।

(य० प्र० का० ३-४)

नियमादयश्च चर्याव्याख्यानावसरेंऽशेन व्याख्याताः। विधिव्याख्याने च नातिदूरेऽवशिष्टांशा व्याख्यास्यन्त इति।

४. विधिः

विधिश्चतुर्थो मुख्यः पदार्थः। स च धर्मार्थः साधकव्यापारः। विधिर्द्विविधः—प्रधानभूतो गुणभूतश्च। अव्यवधानेन धर्महेतुर्यो विधिः स प्रधानभूतश्चर्येत्युच्यते।

स च मलक्षपणोपायप्रदर्शनावसरे पूर्वं व्याख्यात इति नेह प्रतन्यते। चर्यानुग्राहको विधिर्गुणभूतो भस्मस्नाननिर्माल्यधारणादिः। आयतनवासित्वं तथा कलुषक्षपणार्थमनुष्ठितम् उपस्पर्शन-प्राणायाम-जपरूपं त्रिकं चर्यानुग्राहकत्वाद् गुणभूतविध्यन्तर्गतमेव। दशाऽहिंसादयो यमा यदा चर्यानुग्राहकास्तदा विध्यन्तर्भूताः, यदा तु योगक्रियानुग्राहकास्तदा योगान्तर्भूताः (पा० सू० ८-४१, ग० का० टी० १२-४)।

आगमाऽविरोधिन्योऽन्नार्जनोपायरूपा भैक्ष-उत्सृष्ट-यथालब्धसंज्ञकास्तिस्रो वृत्तयोऽप्यत्रैवान्तर्भवन्ति। तत्र प्रथमावस्थस्य भैक्षमेव वृत्तिः। देवाद्युद्देशेन परित्यक्तं कारुण्यकौतूहलाभ्यां केनाप्यदुष्टजातिनाऽशुचित्वादिदोषरहितं दत्तं वान्नपानाद्युत्सृष्टमित्युच्यते। द्वितीयावस्थस्य तदेव वृत्तिः। तृतीयावस्थस्यापि भैक्षमेव वृत्तिः। परमेतावानत्र विशेषः। तृतीयावस्थः परमयोगित्वाद् भैक्षं भुञ्जन् प्रायश्चित्तनिवेदनपञ्चब्रह्मजपानुस्नानादिकं न करोति। चतुर्थावस्थस्य यथालब्धं वृत्तिः। पञ्चमावस्थस्य शरीराभावाद् वृत्त्यनुपपत्तिः। इमास्तिस्रो वृत्तयः।

५. दुःखान्तः

सर्वेषामाधिदैविकाधिभौतिकाध्यात्मिकानां दुःखानामात्यन्तिकः प्रध्वंसः पञ्चमोऽन्तिमः पदार्थः।

नायं ज्ञानवैराग्यलभ्यः, अपि त्वीश्वरानुग्रहेणैव । स च द्विविधः—अनात्मकः सात्मकश्च । अनात्मकः केवलं दुःखान्तस्वरूपः । अयमेव न्यायवैशेषिकाभ्युपगतो मोक्षः, "दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः" इति सूत्रनिर्दिष्टान्मोक्षान्निरात्मकस्वरूपदुःखान्तस्यांशेनापि भेदाभावात् ।

सात्मको दुःखान्तो न केवलमाधिभौतिकादिदुःखानामात्यन्तिको विनाशः, अपि तु सर्वज्ञत्व-सर्वकर्तृत्वप्राप्तिरपि । सर्वज्ञत्वसर्वकर्तृत्वे सिद्धं पशोर्विशेषयतः । ते च सायुज्यरूपयोगे संजाते शिवात् पशुं संक्रामतः ।

सिद्धः

सिद्धः सर्वज्ञः सर्वकर्त्ता च । ज्ञातृत्वशक्तिः परमार्थत एकाऽपि विभिन्नविषयसम्बन्धाद् भिन्नैर्दूरदर्शनादिनामभिरुच्यते । कर्तृत्वशक्तिश्च सर्जने मनोजवित्वरूपा । अस्य सर्जनविचारोदय-सर्जनक्रिययोर्मध्ये न भवति किमप्यन्तरालं प्रजापतेरिव । प्रजापतिना हि सर्जनविचारोद्गमानन्तरं तपस्तप्तव्यं भवति सर्जनक्रियाप्रारम्भात् प्राक् । सिद्धः स्वतन्त्रयेच्छयैव सर्वं सृजतीति कामरूपी । सर्वेषां सृष्टानां संहरणे शक्तो न तु विश्वामित्रवदशक्त इति विकरणः ।

लाकुलीशदर्शने न केवलं बन्धमोक्ष एव मोक्षः, अपि तु पतिसायुज्यमपि । सायुज्यस्यास्मिन् दर्शनेऽतीव महत्त्वम् , यत इदं सांख्य-योग-बौद्ध-वेदान्तादिदर्शनाभ्युपगतमोक्षस्वरूपेभ्यो लाकुलीशं मोक्षस्वरूपं विभेदयति । प्राप्तसायुज्य आत्मा युक्त इत्युच्यते । पतिवद्विभुरप्यात्मा मनसा सह स्वतादात्म्यीकरणात् परिच्छिन्नो भवति, विषयं प्रति धावति, तं चावाप्य तत्र वृक्षे शकुनिवदवतिष्ठते । अततीत्यात्मा, आपूर्य कार्यकरणं विषयांश्चेतयतीत्यात्मा । यथोक्तम्—

यदाप्नोति यदादत्ते यच्चात्ति विषयान् पुमान् ।
यच्चास्य सततं भावस्तस्मादात्मेति संज्ञितः ॥ इति ।

(पा० सू० टी० पृ० १११)

एवंविधः परिच्छिन्न आत्मा संसारीत्युच्यते । परन्तु विषयविमुखः, व्यपगतपरिच्छेदः, निर्गतदोषः, विषयवासनारहितः, असङ्गः, इच्छाद्वेषनिवृत्तः, अप्रवृत्तिमान्

"शङ्खदुन्दुभिनिर्घोषैर्विविधैर्गीतवादितैः"

ईश्वरयोगादच्याव्य आत्मा शरीरेन्द्रियसम्बन्धेऽपि युक्त इत्युच्यते ।

लकुलीशपाशुपतभेदाभेदवादस्यापरभेदाभेदवादेभ्यो वैलक्षण्यम्

भेदाभेदवादो न केवलं शैवागमपरम्परायामपि तु वैदिकपरम्परायामप्युपलभ्यते। वैदिक-भेदाभेदवादिनोः 'आश्मरथ्य'-'औडुलोमि'-मतयोर्बादरायणेन स्वीयब्रह्मसूत्रे कृत एवोपन्यासः। इमौ भेदाभेदवादौ ब्रह्मसूत्रटीकाकारोल्लेखैरेव ज्ञायेते। अतस्तयोर्विस्तृतं विवरणमशक्यम्। एतावन्मात्रं तु स्पष्टं यदुभावपि जीवस्य ब्रह्मणः पृथक्सत्तामेकस्यामवस्थायामपरस्याञ्च तयोरैक्यं स्वीकृतवन्तौ। आश्मरथ्यमते कारणरूपेण तयो रैक्यं कार्यरूपेण च भेदः। यथोक्तं शाङ्करभाष्ये— "आश्मरथ्यस्य तु यद्यपि जीवस्य परस्मादनन्यत्वमभिप्रेतम्, तथापि "प्रतिज्ञासिद्धेः" इति सापेक्षत्वाभिधानात् कार्यकारणभावः कियानप्यभिप्रेत इति गम्यते" (ब्र० सू० शा० भा० पृ० ३३३)।

यथा चोक्तं वाचस्पतिमिश्रेण "प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः" इति सूत्रटीकायाम्— "यथा हि वह्नेर्विकारा व्युच्चरन्तो विस्फुलिङ्गा न वह्नेरत्यन्तं भिद्यन्ते, तद्रूपनिरूपणात्; नापि ततोऽत्यन्तमभिन्नाः, वह्नेरिव परस्परव्यावृत्त्यभावप्रसङ्गात्; तथा जीवात्मानोऽपि ब्रह्मविकारा न ब्रह्मणोऽत्यन्तं भिद्यन्ते, चिद्रूपत्वाभावप्रसङ्गात्; नापि ततोऽत्यन्तमभिन्नाः, वह्नेरिव परस्पर-व्यावृत्त्यभावप्रसङ्गात्; सर्वज्ञं प्रत्युपदेशवैयर्थ्याच्च। तस्मात् कथञ्चिद् भेदो जीवात्मनामभेदश्च" इति।

सुदर्शनसूरिकृतश्रीभाष्यटीका-श्रुतप्रकाशिकावचनाच्चेदं प्रतीयते यदाश्मरथ्यस्य भेदाभेद-वादो रामानुजगुरुणा यादवप्रकाशेन स्वीकृतः पोषितश्च।

औडुलोमिस्तु संसारदशायामनेके जीवाः एकात्मकाद् ब्रह्मणो नितान्तं भिन्नाः, परं मुक्तिदशायां जीवब्रह्मणोरभेद इति प्रतिपादितवान्। यथोक्तं शाङ्करभाष्ये—"औडुलोमिपक्षे पुनः स्पष्टमेवावस्थान्तरापेक्षौ भेदाभेदौ गम्येते" (ब्र० सू० शां० भा० पृ० ३३३)। एवमौडुलोमि-र्नदीनां समुद्रादिव, संसारदशायां जीवानां ब्रह्मणः पृथक् सत्तां स्वीकृत्य भेदम्, तथा समुद्रपति-तानां तासां समुद्रैक्यमिव मुक्तौ जीवब्रह्मैक्यमभ्युपगत्य भेदाभेदमतं समर्थितवान्।

काशकृत्स्नो भेदाभेदवाद्यभेदवादी वाऽऽसीदित्यत्र मतभेदः। शङ्कराचार्यानुसारं सोऽभेदवादी। परन्तु निम्बार्कशिष्यः श्रीनिवासाचार्यः स्वीयवेदान्तकौस्तुभे "अवस्थितेरिति काशकृत्स्नः" इति सूत्रव्याख्यायां काशकृत्स्नमपि भेदाभेदवादिनं मनुते। यथाह—

"तदेवं मुनित्रयमतद्वारा प्रसङ्गाद् भेदाभेदप्रकारो भगवता दर्शितः" इति ।

शङ्कराचार्यात् पूर्वभाविना भर्तृप्रपञ्चेनापि भेदाभेदवादः कार्यकारणरूपावस्थाभेदमाश्रित्य समुद्रतरङ्गन्यायेन समर्थितः । इदञ्च बृहदारण्यकोपनिषट्टीकायां शङ्करकृताद् भर्तृप्रपञ्चमतखण्ड-नादवगम्यते ।

भर्तृप्रपञ्चमते कार्यकारणरूपतया भेदाभेदरूपं ब्रह्म । कारणब्रह्म कार्यब्रह्मणो भिन्नं समुद्रा-दिव वीचयः, (यद्यपि परस्य पूर्वभावापत्तौ तयोरैक्यम्) । समुद्रस्य हि समुद्ररूपतयैकता, परं तरङ्गबुद्बुदादिरूपतयाऽनेकता नानात्वं वा । एवं ब्रह्मपरिणामवादी भर्तृप्रपञ्चो जीवजगतोः सत्ता न काल्पनिकी, अपि तु वास्तविकी, तथा जीवब्रह्मणोरंशांशिभाव इति मन्यमानो भेदाभेद-वादमवलम्बते ।

शङ्कराचार्यात् परभाविना (९०० ईशवीये) भास्करेणापि स्वीयायां भास्करभाष्यनाम्न्यां ब्रह्मसूत्रटीकायां भेदाभेदवाद एवाश्रितः । अयमपि कार्यकारणरूपावस्थाभेदमवलम्ब्य ब्रह्मणो भेदा-भेदरूपत्वं समर्थयति, समुद्रतरङ्गन्यायेन सुवर्णकुण्डलादिन्यायेन च । यथाह—

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाऽभेदः कुण्डलाद्यात्मना भिदा ॥ इति ।

ब्रह्मणः सर्वज्ञत्वं सर्वशक्तिमत्त्वं च साधारणतया स्वीकुर्वन्नपि चेतनाचेतनतया द्विधा विभक्तस्य जगतः कारणरूपस्य तस्य भोग्यभोक्तृरूपं शक्तिद्वयं प्रतिपादयति । ब्रह्म सगुणं सत्यं ज्ञानमनन्तञ्च स्वभावतः परिणमते, सूर्यो रश्मीनिव प्रसारयति, विक्षिपति, स्वशक्तीः ।

"ब्रह्म स्वत एव परिणमते तत्स्वाभाव्यात्" (भा० भा० पृ० २४),
"अप्रच्युतस्वरूपस्य शक्तिविक्षेपलक्षणः परिणामः" (भा० भा० पृ० ९९)

इति हि तत्सिद्धान्तः । एवञ्च भोगशक्तिराकाशाद्यचेतनरूपतया परिणमते, भोक्तृ-शक्तिश्च चेतनजीवरूपेण । जीवो ह्यग्नेर्विस्फुलिङ्गवद् ब्रह्मणोंऽशभूतो भिन्नोऽभिन्नश्च । भेद उपाधिजन्यः, अभेदस्तु स्वाभाविकः । उपाधिषु निवृत्तेषु भेदो व्यपगच्छति, परमात्माऽभेदरूपो मोक्षश्च भवति ।

रामानुजगुरुर्यादवोऽपि ब्रह्मसूत्रटीकायां भगवद्गीताटीकायाञ्च भेदाभेदमेव साधितवान् । रामानुजेन वेदार्थसंग्रहे, वेदान्तदेशिकेन परमतभङ्गे, व्यासतीर्थेन च तात्पर्यचन्द्रिकायां समुल्लिखित-

मेतन्मतम्। अयं निर्गुणब्रह्मवादं मायावादं च निरस्य सगुणब्रह्मवादं भेदाभेदवादञ्च द्रढयति। यादवप्रकाशो भास्कराचार्यवद् ब्रह्मपरिणामवादं प्रतिपादयति। स मनुते यद् ब्रह्म चिदचिदीश्वर-रूपेण परिणमते। ईश्वरश्चेच्चिदन्तर्गतः स्वीक्रियेत तर्हि चिदचितौ उभे अप्येकस्यावस्थाभेदमात्रे, न स्वरूपेण स्वतन्त्रद्रव्यस्वरूपे। अयं भेदाभेदवादी। एतन्नये भेदाभेदावुभावपि सत्यावेककालविनौ च। ब्रह्म परिवर्तमानमपि न जहाति स्वस्वरूपभूतं शुद्धत्वं रश्मीन् विक्षिपन्निव सूर्यः। नास्ति विरोध एकस्यैव वस्तुनः समकालिकभेदाभेदाभ्युपगमे। सर्वमपि वस्तु एकानेकरूपं भेदाभेदरूपं वा, कारणांशे जात्यंशे चाभिन्नत्वात्; कार्यांशे व्यक्त्यंशे च भिन्नत्वात् (सर्वार्थसिद्धिः ३,२७)।

जीवन्ति भेदाभेदमतानि

यद्यप्युपरिलिखितानि सर्वाण्यपि भेदाभेदमतानि लुप्तप्रायाण्युल्लेखमात्रोपलभ्यानि च, तथाप्यद्यापि केषुचन शैववैष्णवदर्शनेषु जीवति भेदाभेदवादः।

१. भेदाभेदवादिवीरशैवमतम्

ईशवीयद्वादशशतकसमुद्भूतं वीरशैवमतं "द्वैताद्वैतम्, सेश्वराद्वैतम्, शिवाद्वैतम्, सर्व-श्रुतिसामरस्यमतम्" इत्यादिभिर्भिन्नैर्नामभिः सुप्रसिद्धम्। इमानि नामानि मुख्यं दार्शनिकसिद्धान्तं भिन्नदृष्टिकोणेभ्योऽवलोकयद्भिर्दत्तानि। इदं द्वैताद्वैतमित्युच्यते। यतोऽस्मिन् सिद्धान्ते भक्तिर्मुख्यो मुक्त्युपायः, सा च भक्तभज्यमानयोर्द्वैतमपेक्षते। परन्तु मुक्तौ जीवो ब्रह्म सञ्जायते, भ्रमरकीट-न्यायेन। अतो जीवेश्वरयोरनादिभेदस्वीकारेऽपि मुक्तौ तदैक्यस्वीकाराद् बद्धावस्थायां भेदो मुक्तावस्थायामभेद इत्यवस्थाभेदेन भेदाभेदयोरुभयोरप्यभ्युपगमाद् द्वैताद्वैतमिदं मतम्। अस्या-स्मिन्नंश औडुलोमिप्रतिपादितद्वैताद्वैतसिद्धान्तेनैक्यं सुस्पष्टम्।

२. निम्बार्कमते भेदाभेदवादः

भेदाभेदवाद ईशवीयैकादशशतकभवेन निम्बार्केण प्रचालिते कृष्णोपासकसम्प्रदायेऽपि सजीवः, सादरमनुस्रियते चाद्यापि।

निम्बार्को रामानुजीयं चिदचिदीश्वररूपं पदार्थत्रयं स्वीकरोति। चिद्रूपो जीवो ज्ञान-स्वरूपः, ज्ञानमयः, प्रज्ञानघनः, स्वयंज्योतिः। ज्ञानमयोऽपि ज्ञानाश्रयो ज्ञाता, यथा प्रकाश-स्वरूपोऽपि सूर्यः प्रकाशाश्रयः। जीवस्य स्वरूपभूतगुणभूतज्ञाने ज्ञानरूपेण परस्पराभिन्नेऽपि धर्म-धर्मिभावेन परस्परतो भिन्ने। भोगस्य मोक्षस्य च प्राप्तौ जीव ईश्वरपरतन्त्रो न तु स्वतन्त्रः। एवञ्च ज्ञानमयत्वेन जीवस्येश्वराभेदेऽपि नियम्यतया ईश्वराद् भेद इति निम्बार्को जीवस्वरूपप्रति-

पादने भेदाभेदमवलम्बते। बद्धावस्थायां सर्वव्यापकादप्रच्युतस्वभावात् सर्वज्ञाद्-ब्रह्मणोऽणुरल्पज्ञो जीवो भिन्नोऽपि वृक्षात् पत्रमिव दीपात् प्रभेव प्राणादिन्द्रियशक्तिरिव न पृथक्स्थितिरित्यभिन्नः। एवं मोक्षेऽपि भगवत्प्रसादान्मायाकृतधर्मभूतज्ञानसङ्कोचापगमात् स्वस्वरूपलाभेऽपि व्यक्तित्वानपगमादीश्वराद्भिन्नोऽभिन्नश्च जीव इति भोगमोक्षावुभावपि भेदाभेदवादाश्रितौ।

३. चैतन्यमतेऽचिन्त्यभेदाभेदवादः

अपरो भेदाभेदवादो योऽधुनापि जागर्ति, स चैतन्यस्थापितोऽचिन्त्यभेदाभेदवाद इति प्रसिद्धः। चैतन्यदेव ईशवीयपञ्चादशशतके समभूत्। एतन्नये विज्ञानानन्दविग्रहो भगवान् सत्यकामत्व-सत्यसंकल्पत्व-सर्वज्ञत्वाद्यनन्तापरिमितगुणवान्। गुणगुणिनोर्न वास्तवो भेदोऽत एव सत्यकामत्वादिगुणा न भगवतो भिन्नाः। विग्रहोऽपि भगवतोऽभिन्नो नित्योऽप्राकृतश्च। एवञ्च विग्रहो गुणाश्च भगवदभिन्नाः। अयं भगवानेव ब्रह्मेत्युच्यते। रामानुजमत इवास्मिन् मते ब्रह्मणि स्वगतभेदो नाभ्युपगम्यते, अपि तु शाङ्करवेदान्त इव स्वगतस्यापि भेदस्याभावः स्थाप्यते, तथाप्यचिन्त्यापरिमेयशक्त्या, या 'विशेष' इति परिभाष्यते, नानात्मकतया भासमानोऽप्येकात्मक एवावतिष्ठते।

अचिन्त्याकारानन्तशक्तिमतोऽपि भगवतस्तिस्रः शक्तयो मुख्याः। स्वरूपशक्तिर्याऽन्तरङ्गेत्यप्युच्यते, तटस्था या जीवशक्त्यपरपर्याया, मायाशक्तिश्च। तटस्था शक्तिः परिच्छिन्नस्वभावाणुत्वविशिष्टजीवाविर्भावकारणम्। मायाशक्तिश्च प्राकृतजगतः। स्वरूपशक्त्या भगवान् जगतो निमित्तकारणम्। मायाजीवशक्तिभ्यां चोपादानकारणम्। अतो भगवानभिन्ननिमित्तोपादानकारणम्। केषुचित्स्थलेषु भगवतो मुख्या एकैव शक्तिः स्वीक्रियते, सा च स्वरूपशक्तिरित्यभिधीयते। सा च भगवता विभिन्नरूपत्रयेणोपयुज्यमाना चिच्छक्तिर्जीवशक्तिर्मायाशक्तिरिति नामत्रयेणोच्यते।

सत्यसङ्कल्पस्य भगवतो बहिरङ्गमायाजीवशक्तिविलासस्वरूपत्वाज्जगत् सत्यम्। प्रलयेऽपि जगत् सूक्ष्मरूपेण भगवत्यवतिष्ठते। अचिन्त्यशक्त्या जगन्नैकान्ततो भगवतोऽभिन्नं नापि भिन्नं प्रतीयते। अतश्चैतन्यमतमचिन्त्यभेदाभेदवादः।

लकुलीशापरभाविनां भेदाभेदवादानामुपरि लाकुलीशभेदाभेदप्रभावः

यद्यप्याश्मरथ्य औडुलोमिस्वीकृतयोर्भेदाभेदवादयोरुल्लेखो बादरायणीयब्रह्मसूत्रे समुपलभ्यते, तथाप्येकः कारणरूपेणाभेदं कार्यरूपेण भेदमपरश्च मुक्तावस्थायामभेदं संसारावस्थायां च

भेदं स्वीकृत्य भेदाभेदमतं प्रतिपादितवानित्येतावन्मात्रमेव तद्विषये ज्ञायते। एते मते बादरायणात् पूर्वभावित्वादतीव प्राचीने। परन्तु तयोः स्पष्टं विस्तृतं रूपं नोपलभ्यते। अतो नेदं शक्यते वक्तुं यत्कियांस्तयोः प्रभावो भर्तृप्रपञ्चादिप्रतिपादितभेदाभेदवादेष्वापतितः।

ईशवीयद्वितीयशतकभाविनो लकुलीशस्य भेदाभेदवादः सविस्तरमुपलभ्यते। ततश्चेदं स्पष्टीभवति यत्तदपरभाविनो भेदाभेदवादा विशिष्टाद्वैतवादाश्च तत्प्रभाविताः। एतच्च पूर्वोपपादितानां लकुलीशपाशुपतसिद्धान्तांशानां स्मारणेन विशदीक्रियते।

(क) लकुलीशपाशुपतदर्शनं सत्कार्यवादमवलम्बते। एतन्नये कार्यं विद्या-कला पशुरूपं नित्यम्।

(ख) सर्जनक्रियायामीश्वरः स्वतन्त्रः स्वबाह्यपरमाणुकर्मादिनिरपेक्षः।

(ग) आत्मानात्मनोः, कार्यकारणयोः, जडचेतनयोर्भेदस्तात्त्विकः।

(घ) पत्युस्तत्त्वतो भिन्नस्यापि कार्यजातस्य विद्याकलारूपस्य न स्वतन्त्रा पत्युर्बहिः सत्ता, नापि तस्य पत्या सह समप्राधान्यम्; अपि तु हार्य-धार्य-कार्यत्वेन पत्यधीनत्वमस्वातन्त्र्यञ्च। अत इदं भेदाभेदवादि, यतः कार्यकारणयोस्तात्त्विकं भेदं स्वीकुर्वदपि कार्यं कारणान्तर्गतमेव व्यक्ताऽव्यक्तावस्थाद्वयेऽपि मनुते।

(ङ) पतिरभिन्ननिमित्तोपादानकारणं जगतः, स हि भवोद्भवः।

(च) परतत्त्वं नैकरूपम्, अपि त्वेकानेकरूपम्। बहुत्वमेकस्मिन् परतत्त्वेऽन्तर्गतं नभसीव ताराः।

(छ) अस्वतन्त्रं सर्वं कार्यम्। न तु यज्जन्यत उत्पाद्यते यस्य चोत्पत्तेः प्रागभावः।

(ज) सृष्टिरपि भवे विद्यमानानां वस्तूनां वृत्तिलाभमात्ररूपा।

(झ) जीवात्मा विभुः। तथाप्यनाद्याणवापरपर्यायपशुत्वमलजनिताज्ञानक्रियाशक्त्योः परिच्छेदात् परिच्छिन्नः, तद्व्यपगमे तु सदाशिवः।

(ञ) परतत्त्वं सगुणम्, पत्युः शक्तिर्गुणो धर्म इति वोच्यते।

(ट) विद्या-कला-पशुसंज्ञकार्यत्रयविषयकोत्पादनतिरोभावनानुग्रहाः पत्युर्देवस्य क्रीडामात्रम्।

इमान् लाकुलीशसिद्धान्तांशान् स्मरन्तो वयं यदि भिन्नानां पूर्वप्रतिपादितानां भेदाभेदवादानामुपरि दृष्टिं क्षिपामस्तर्हीदं स्पष्टीभवति यद् ब्रह्मणः सगुणत्वस्वीकारे, ब्रह्मपरिणामवादाभ्युपगमे तस्याभिन्ननिमित्तोपादनत्व-सर्जनस्वतन्त्रत्व-क्रीडाशीलदेवत्वप्रतिपादने, चिदचितोस्तात्त्विकं भेद-

मभ्युपगत्यापि तयोः परमकारणेश्वराऽपृथग्भूतत्वादभेदस्वीकारपुरःसरं भेदाभेदस्थापने, अन्येषु चांशेषु भिन्ना भेदाभेदप्रतिपादका लाकुलीशभेदाभेदप्रभाविताः ।

शैवविशिष्टाद्वैतसाधकस्य श्रीकण्ठस्योपरि लाकुलीशभेदाभेदप्रभावः

श्रीकण्ठो (ईशवीयैकादशशताब्द्यां) भेदाभेदवादं सम्यग् जानाति स्मेत्यत्र न विवादावसरः । यतः स स्वकण्ठेन भेदाभेदखण्डनं कृतवान् । यथाह—

"भेदाभेदकल्पनं विशिष्टाद्वैतं साधयामः" इति,

"न च भेदाभेदवादिनः, वस्तुविरोधात् । किन्तु शरीरशरीरिणोरिव गुणगुणिनोरिव च विशिष्टाद्वैतवादिनः" (श्रीकण्ठ० २-२-२१) इति च ।

भेदाभेदवादिनये ब्रह्माकारेणाद्वैतं भोक्तृभोग्याकारेण द्वैतमित्याकारभेदेन विरोधाभाव इति प्रागेवावेदितम् । इदमेव मतम् आश्मरथ्येन, भर्तृप्रपञ्चेन, भास्करेण च कारणरूपतयाऽभेदः कार्यरूपतया भेद इति भिन्नशब्दश्रेण्या स्वीकृतम् ।

श्रीकण्ठस्य लकुलीशपाशुपतभेदाभेदसाधारणा अभ्युपगमाः

(क) पत्यपरपर्यायं ब्रह्म सगुणम् । शक्तिस्तस्य गुणो धर्मो वा । यदाह राशीकरः—

"यदेतत्पत्युः पतित्वं शक्तिः सामर्थ्यमैश्वर्यं स्वगुणः सद्भावः सतत्त्वं तत्त्वधर्मः तत् आसनम् ……अतोऽव्ययोऽमृतो भगवान् कामतः स्वशक्तिस्थं कार्यं स्वशक्त्याध्यास्ते" (पा० सू० पृ० ५८) इति ।

(ख) सत्कार्यवादः । श्रीकण्ठोऽष्टाविंशत्यागमप्रामाण्यं पति-पशु-पाशरूपतत्त्वत्रयञ्च सिद्धान्तशैववत् स्वीकरोति । परन्तु चेतनाचेतनरूपस्य चिदचिदपरपर्यायस्य लकुलीशमते कार्यान्तर्गणितस्य जीवजगद्द्वयस्य पत्युर्बहिः स्वतन्त्रां सत्तां न स्वीकरोति, अपि तु लाकुलीशभेदाभेदवत् पतिशक्तिस्थत्वम् । एवञ्च हार्य-धार्य-कार्यतया पत्या सह समप्राधान्यं निरस्य चिदचितोः पशुपाशयोः पतिं प्रति गौण्यं स्वीकरोति । शरीरस्येव शरीरिणं प्रति । यदाह राशीकरः—

"कार्यस्य रुद्रे-हार्य-धार्य-कार्यख्यापनार्थम्" (पा० सू० पृ० ६४) इति ।

(ग) कार्यकारणयोरपृथक्सिद्धत्वम् । श्रीकण्ठमते कार्यकारणयोर्न पृथक्सिद्धिः ।

एवञ्च ब्रह्मणोऽपृथक्सिद्धजन्मस्थितिप्रवृत्तिकत्वादस्य जगतस्तद्व्यतिरिक्तता नास्ति । इदं लकुलीशमतानुसार्येव ।यथाह राशीकरः—

पालको नित्यः पालकनित्यत्वाच्च पाल्यमपि नित्यम्। कस्मात्? नह्यसति पाल्ये पालक इत्येव। सति नित्यत्वे तान्येव पश्वादीनि संयोजयति, मृल्लोहमयप्राकारादिवत्, दृष्टान्तात्। वृत्तिलाभश्चोत्पत्तिरित्युच्यते। (पा० सू० पृ० ६०)

(घ) अन्तर्गणिकभेदः। गणः—समूहः, अन्तर्विद्यमानो गणः अन्तर्गणः, अन्तर्गणे विद्यते इत्यन्तर्गणिकः। अन्तर्गणिकश्चासौ भेदोऽन्तर्गणिकभेदः। अन्तःपूर्वकाद्गणशब्दाद् "अत इनिठनौ" इति सूत्रानुसारं ठन्प्रत्यये अन्तर्गणिक इति निष्पद्यते। एवं चान्तर्गणिको भेदः शिवान्तर्गतपशुपाशरूपगणनिष्ठः। स च श्रीकण्ठेन स्वीक्रियत इत्यप्पय्यदीक्षितकृतश्रीकण्ठ-भाष्यटीकाद्वयानुसारं प्रतिभाति। यतस्तथाविधो भेदोऽपृथग्भावेनाऽनन्यत्वरूपविशिष्टाद्वैतमतस्य न विरोधी। यथाह—

"भेदाभेदपक्षस्य पृथग्भावरूपात्यन्तभेदपक्षस्य मुख्याभेदरूपात्यन्ताभेदपक्षस्याऽन्यतराऽनिर्धार्यत्वपक्षस्य च प्रमाणविरुद्धत्वाल्लौकिकवैदिकसकलप्रमाणसिद्धान्तर्गणिकभेदाऽप्रतिक्षेपक-मपृथग्भावेनानन्यरूपं विशिष्टाद्वैतमभेदश्रुतीनामर्थ इत्येव सूत्रकारस्याभिप्रायः" (श्रीकण्ठभा० टी० ३१) इति।

इममन्तर्गणिकं भेदं रामानुजाचार्यः स्वगतभेदनाम्ना स्वीकरोति।

द्वैतशैवसिद्धान्तप्रभावः

व्याख्यातांशेषु लाकुलीशदर्शनप्रभावितोऽपि श्रीकण्ठो न सर्वथा द्वैतशैवसिद्धान्तप्रभाव-शून्यः। न केवलं ततः पति-पशु-पाशसंज्ञकं पदार्थत्रयमादत्तेऽपि तु जीवस्याणुत्वं मोक्षस्य शिव-साम्यरूपत्वं मोक्षे सर्वज्ञत्वसर्वकर्तृत्वयोरभिव्यक्तिवादञ्च।

अत इदं स्पष्टीभवति यत्सृष्टौ स्थूलरूपतया प्रलये च सूक्ष्मरूपतया पत्यन्तर्गतयोर्हार्य-धार्य-कार्यतयाऽस्वतन्त्रयोरत एव गौणयोः पत्यविनाभूतयोः पत्यपृथक्सिद्धयोः परस्परभिन्नयो-र्जडचेतनयोः पत्यविनाभूतायाः शक्तेश्च विशेषणत्वमात्रकथनं लकुलीशभेदाभेदवादात् श्रीकण्ठविशिष्टाद्वैतं विशेषयति। रामानुजीयविशिष्टाद्वैतमप्येवमेव।

रामानुजीयविशिष्टाद्वैतमुख्यांशाः

रामानुजः स्वगुरुयादवप्रकाशाभ्युपगतं चिदचिदीश्वरकारणं ब्रह्म न मनुते, यद्यपि चिदचिदीश्वररूपं त्रिकं स्वीकरोति। एतत्सिद्धान्ते ब्रह्म नेश्वरात् पृथक्। ईश्वर एव परमकारणं परमद्रव्यं च। सत्कार्यवादानुसारं सर्वं कार्यं कारणे सूक्ष्मरूपेण सत्, परिणामश्चावस्थान्तरा-

पत्तिरेव, अवस्थान्तरापत्तिरेव च कार्यता। स्वगतभेदः, अपृथक्सिद्धिसम्बन्धः, विशेषणलक्षणमिति शिलात्रयाश्रितो रामानुजविशिष्टाद्वैतवादः।

(१) ईश्वरः

सर्वोऽप्यनुभवः सगुणसविशेषवस्तुविषयकः, सर्वाण्यपि प्रमाणानि सविशेषबिषयकाणि। निर्विशेषवस्तुनि न किमपि प्रमाणं समस्ति। निर्विकल्पकप्रत्यक्षे सविशेषमेव वस्तु प्रतीयते। यथोक्तमुत्पलदेवपादैः—

साक्षात्कारक्षणेऽप्यस्ति विमर्शः कथमन्यथा।
धावनाद्युपपद्येत अनुसन्धानवर्जितम्॥ इति।

अतो निर्गुणब्रह्मकल्पनामनुभवविरुद्धां प्रमाणासाध्यां च मन्यमानो रामानुजो ब्रह्म सगुणमीश्वरापरपर्यायञ्च मनुते।

एवञ्चेश्वरः प्राकृतगुणरहितः, निखिलहेयप्रत्यनीकः, कल्याणगुणाकरः, अनन्तज्ञानानन्दस्वरूपः, कल्याणगुणविभूषितः, स्वेच्छया सकलजगत्सृष्टिसंहारकर्ता, सकल-सजातीय-विजातीय-भेदशून्योऽपि स्वगतभेदवान्; अपृथक्सिद्धिसम्बन्धसम्बद्धयोरत एव स्वशरीरभूतयोश्चिदचितोः परस्परतः सर्वथा भिन्नत्वात्।

(२) अपृथक्सिद्धिसम्बन्धः

रामानुजीया अपृथक्सिद्धिसम्बन्धकल्पनैव तदीयविशिष्टाद्वैतसिद्धान्तस्याधारभूता। अतो विवरणमपेक्षते। रामानुजसिद्धान्ते शरीरिरूपा चित् कदाचिदपि शरीरात् पृथङ् न भवति, संसारावस्थायां स्थूलशरीरेणेव प्रलये सूक्ष्मशरीरेण तथा मोक्षेऽपि शुद्धसत्त्वशरीरेण चितः सम्बन्धस्य स्वीकारात्। शरीरं शरीरिणा धार्यते, नियम्यते, स्वोपभोगार्थं कार्ये प्रवर्त्यते च। अतः शरीरस्य शरीरिणेव चिदचितोरीश्वरेण सहाभ्युपगम्यते सम्बन्धः। यत ईश्वरः शरीरीव शरीरं चिदचितौ धारयति नियमयति प्रेरयति च। अयं च सम्बन्धः अपृथक्सिद्धिरित्युच्यते। नास्ति पृथक्सिद्धिर्ययोर्येषां वा तयोस्तेषां वा सम्बन्धोऽपृथक्सिद्धिसम्बन्धः। ईश्वरः कदाचिदपि चिदचिद्भ्यां पृथग् न भवति, नापि चिदचितावीश्वरात्। अयं सम्बन्धो न्यायवैशेषिकाभ्युगतात् समवायसम्बन्धाद् भिन्नः। समवायो नित्यसम्बन्धोऽयुतसिद्धवृत्तिः, यथा गुणगुणिनोः। यतो गुणः सर्वदा गुणिसम्बद्ध एव भवति। गुणी च गुणसम्बन्धं विना गुणी एव न वक्तुं शक्यते। परन्तु न्यायवैशेषिकसिद्धान्त उत्पद्यमानं द्रव्यं प्रथमक्षणे निर्गुणं निष्क्रियञ्च भवती-

त्यतः कथञ्चित् कदाचिदीश्वरस्यापि निर्गुणत्वं संभाव्येत। अत ईश्वरस्य चिदचिद्भ्यां सह न समवायसम्बन्धः स्वीक्रियते। तथा चैकस्यापि गुणस्य भिन्नैर्गुणिभिः सम्बन्धो भवति, नीलाख्यो गुणो न केवलमुत्पल एव भवति, अपि तु वस्त्वन्तरे घटादावपि। अतो गुणिन ईश्वरस्य चिदचिद्भ्यां न भवति कदाचिदपि विच्छेदः, नापि चिदचितावीश्वराद्बहिस्थेन केनाप्यपरेण कदाचिदपि सम्बद्धे भवतः, बाह्यस्य कस्याप्यभावादिति साधयितुमपृथक्सिद्धिसम्बन्धः स्वीक्रियते।

३. विशेषणस्वरूपम्

अपृथक्सिद्धिसम्बन्धसम्बद्धेषु यन्नियमेनाधेयं नियम्यं नियोज्यं च भवति, तद्गौणं भवतीति विशेषणमित्युच्यते। आधारो नियामको नियोजकश्च मुख्यो भवतीति विशेष्यमित्युच्यते। चिदचिदीश्वरेष्वीश्वरस्य नियामकत्वात् प्राधान्यं विशेष्यत्वञ्च, चिदचितोस्तु नियम्यत्वाद्गौणत्वं विशेषणत्वञ्च। एवं विशेष्यभूतस्येश्वरस्य चिदचितौ विशेषणभूते।

(४) अद्वैतम्

"एकत्वं चापृथक्सिद्धिः" इति रामानुजाभ्युपगमः। अतश्चिदचिदीश्वराणामपृथक्सिद्धिसम्बन्धसम्बद्धत्वाद् विशिष्टस्येश्वरस्याद्वैततामेकत्वमभेदं वा रामानुजस्तथैव मनुते, यथा विज्ञानवादिनः सहोपलम्भनियमान्नीलनीलधियोरभेदं मन्वते, "सहोपलम्भनियमादभेदो नीलतद्धियोः" इति हि तेषां सिद्धान्तः। अतः शरीरस्य शरीरिणेव, विशेषणस्य विशेष्येणेव, अंशानामंशिनेव चिदचितोरीश्वरेण सह अपृथक्सिद्धिसम्बन्धस्वीकाराद् अपृथक्सिद्ध्योश्चैकत्वस्वीकाराद्रामानुजसिद्धान्तो विशिष्टाद्वैतमित्युच्यते।

(५) स्वगतभेदः

चिदचितौ जगज्जीवौ नित्यौ परस्परतो भिन्नौ च। परन्तु तयोर्भेदस्तयोः साधारणाधारभूतेश्वरान्तरान्तर्गत एव। तयोर्न स्वतन्त्रेश्वराद् बहिः सत्ता। ईश्वर एव ते परस्परतो भिन्नतयाऽवतिष्ठेते। अतो भेदोऽपीश्वरान्तर्गत एव। अयमेव भेदः स्वगतभेद इत्युच्यते। एवमीश्वरः सजातीयविजातीयभेदरहितोऽपि न स्वगतभेदरहितः।

इमौ जगज्जीवावीश्वरेऽवस्थाद्वयेनावतिष्ठेते, स्थूलावस्थया सूक्ष्मावस्थया च। सृष्टौ तयोः स्थूलावस्थया स्थितिः, अतः स्थूलचिदचिच्छरीरस्तद्विशिष्टो वेश्वरः कार्यावस्थं ब्रह्म, प्रलये तयोः

सूक्ष्मतया स्थितिः, अतः सूक्ष्मचिदचिद्विशिष्ट ईश्वरः कारणावस्थं ब्रह्मेत्यभिधीयते। एवं चेश्वरः कदाचिदपि न विशेषशून्यः। अतः परमतत्त्वस्य सर्वदा सविशेषत्वस्वीकाराद् रामानुजीयदर्शनं विशिष्टाद्वैतमित्युच्यते।

स्वगतभेदस्वीकारस्य महत्त्वम्

न्यायवैशेषिकनये पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोरूपाणां सप्तद्रव्याणां परस्परतः सर्वथा पृथक्स्थितिर्भेदश्च स्वीक्रियते, न च तेषां कश्चन एक आधारः स्वीक्रियते। अतस्तन्नये सर्वस्यापि संयोगस्य संयुज्यमानयोरेकाधारत्वे सत्येव संभवात्। न च पृथक्परिक्षीणस्रोतोद्वयोह्यमानानां तृणोपलादीनां संभवति कश्चन संयोगः, अतो जडचेतनयोरेकाधारस्यास्वीकरणाद् न संभवति जडचेतनयोः संयोगसम्बन्धाश्रितं प्रत्यक्षज्ञानमपि। परन्तु रामानुजमत एकाश्रयस्वीकारादस्य सम्भव इति स्वगतभेदस्वीकारो विशिष्टाद्वैतदर्शनं द्वैतदर्शनेभ्य उत्कर्षयति।

प्रमाणप्रमेये

प्रत्यक्षानुमानशब्दरूपं त्रिविधं प्रमाणम्। प्रमेयञ्च द्विविधं द्रव्याद्रव्यभेदात्। द्रव्यम् उपादानम्। अवस्थाश्रयं चोपादानम्। तच्च षड्विधम्, प्रकृतिकालशुद्धसत्त्वधर्मभूतज्ञानजीवेश्वरभेदात्। अद्रव्याणि दश।

श्रीकण्ठरामानुजविशिष्टाद्वैतयोः साम्यम्

लकुलीशपाशुपतसूत्रतट्टीकाभ्यां ग्रन्थांशान् समुद्धृत्य प्रदर्शितमिदं यच्छ्रीकण्ठो लाकुलीशद्वैताद्वैतवादानुसारं ब्रह्मणः सगुणत्वम्, सत्कार्यवादम्, कार्यकारणयोरपृथक्सिद्धत्वम्, अन्तर्गणिकभेदम्, पशुपत्योः कार्यकारणयोर्वा गुणप्रधानभावं स्वीकृत्य गौणयोः पत्यविनाभूतयोः पत्यपृथक्सिद्धयोः परस्परभिन्नयोर्जडचेतनयोः पशुपाशनाम्नोः पत्यविनाभूतायाश्च शक्तेर्गुणरूपत्वमनुक्त्वा गुणं विशेषणं भवतीति मत्वा विशेषणरूपत्वमभ्युपगत्य शैवविशिष्टाद्वैतं स्थापितवान्। अतो लाकुलीशद्वैताद्वैताचिदचितोः पशुपाशयोरीश्वरापरपर्यायेण पत्या सह सम्बन्धविषये नास्ति कश्चन भेदः।

रामानुजविशिष्टाद्वैतविषय इदमेव तथ्यम्। यतो रामानुजोऽपि श्रीकण्ठवत् सत्कार्यवादम्, कार्यरूपयोश्चिदचितोरीश्वरेणापृथक्सिद्धिसम्बन्धस्वीकृत्याऽपृथक्सिद्धत्वम्, ईश्वरे 'स्वगतभेद' इति नामान्तरेणान्तर्गणिकभेदम्, चिदचितोरीश्वरापेक्षया गौण्यात्तयोरीश्वरविशेषणत्वं च स्वीकरोति।

उपसंहारः

द्वैतमते परस्परतः स्वरूपेण भिन्नयोरनेकाश्रययोश्चिदचितोः सम्बन्धस्यासंभाव्यमानत्वात् सम्बन्धनिर्भरस्य सर्वव्यवहाराधारभूतस्य प्रत्यक्षस्य, नास्ति संभवः। तयोरेकाश्रयस्वीकृत्या सम्बन्धोपपादने प्रत्यक्षं सम्भावयति भेदाभेदवादो विशिष्टाद्वैतवादश्चेति भेदवादादुत्कृष्टौ भेदाभेदवाद-विशिष्टाद्वैतवादौ। परन्तु चिदचितोस्तात्त्विकं भेदं स्वीकृत्याऽचितश्चिदन्तःस्थितत्वाभ्युपगमोऽनुभवविरुद्धः। नहि चित्स्वरूप आत्मन्यचित्स्वरूपस्य स्थाणोः स्थितिरनुभूयते। यतोऽनुभूयमानश्चित्स्वरूप एव, विज्ञान(Idea)रूपत्वात्। अतश्चिदचितोस्तात्त्विकं भेदं निराकुर्वाणोऽद्वैतवादः साधीयान्।

अयं चाग्रिमे व्याख्याने प्रतिपादयिष्यते।

॥ ओऽम् शान्तिः शान्तिः शान्तिः ॥

शैवाद्वैतदर्शनम्

मान्याः सभापतिमहोदयाः समुपस्थिताश्च विद्वद्वरेण्याः !

शैवद्वैताद्वैतविषयकद्वितीयव्याख्यानोपसंहारे द्वैताद्वैतवादस्य द्वैतवादादुत्कर्षः साधितः, द्वैतवादे परस्परतः सर्वथा भिन्नयोः पृथक्सत्ताकयोरेकाश्रयरहितयोर्जडचेतनयोः समानान्तररेखयोरिव प्रत्यक्षज्ञानापेक्षितस्य संयोगस्याऽसम्भवात्; भेदाभेदवादे च चिदचितोरेकाश्रयस्वीकृत्या तत्सम्भवात्। परन्तु पत्यपरपर्याये ईश्वरे चित्स्वरूपे सगुणे ब्रह्मण्यचित्सत्ताभ्युपगमोऽनुभवविरुद्धः, नहि कश्चनापि चिद्रूपे स्वात्मनि जडघटपटाद्यनुभवकालेऽपि जडविषयमात्मप्रविष्टतयाऽनुभवति, अपि तु प्रकाशरूपज्ञानाकारतया। इदञ्च नातिदूरे स्पष्टीकरिष्यते। अपरञ्च चित्स्वरूपे पत्यामचितो जडस्य स्थितिर्जीवति शरीरे शूलस्येवारुन्तुदत्वान्नावर्जयति सद्दार्शनिकमनांसि। ज्ञानमीमांसायां क्रियमाणायां चेतनस्य परिमितात्मनो दीपप्रभाया घटेनेव कथञ्चन संभवत्यपि द्वैतनयेऽचेतनेन, द्वैताद्वैतनये चाप्रकाशरूपेण विषयेण सम्बन्धे, कथमप्रकाशरूपो विषयः स्वीयमप्रकाशस्वभावं परित्यज्य प्रकाशरूपज्ञानाकारीभवतीति न शक्यते समाधातुम्, स्वभावभूतस्याप्रकाशत्वस्य त्यक्तुमशक्यत्वात्। नहि स्वभावः शक्यते परित्यक्तुम्। नह्यग्निर्जहात्युष्णत्वम्। अतो न युक्तियुक्तश्चिदचितोस्तात्त्विकभेदस्वीकार इति चिदद्वैतमाश्रित्यैव प्रत्यक्षज्ञानस्यापि सम्भवादद्वैतदर्शनमेव सर्वदर्शनमूर्धन्यमित्यागमिकानामद्वैतवादिनां मतम्।

एकमद्वितीयं परं तत्त्वं शून्यवादिभिर्विज्ञानवादिभिश्च बौद्धैः, गौडपाद-शङ्करप्रभृतिभिर्वेदानुयायिभिः, भर्तृहरि-पुण्यराज-हेलाराज-नागेशभट्टादिभिर्वैयाकरणैः, वल्लभाचार्येण वैष्णवेन, माहेश्वरसूत्रदार्शनिकव्याख्याकर्त्रा नन्दिकेश्वरेण, शक्त्यद्वयवादिभिः काश्मीरशाक्तैः, शैवागमानुयायिस्वातन्त्र्यवादिभिः काश्मीरशैवैश्च स्वीकृतं समर्थितं च विभिन्नाभिर्युक्तिभिर्विभिन्नेभ्यो दृष्टिकोणेभ्यः। अस्मिंस्तु व्याख्याने शैवाद्वैतमेव प्रतिपादनीयम्।

चत्वारि शैवाद्वैतदर्शनानि

शैवागमाश्रितानि चत्वारि दर्शनान्युपलभ्यन्ते—(१) नन्दिकेश्वरदर्शनम्, (२) प्रत्यभिज्ञादर्शनम्, (३) क्रमदर्शनम्, (४) कुलदर्शनं च। इमानि सर्वाण्यप्यद्वैतं प्रतिपादयन्ति। प्रत्येक-

मितिहासो भिन्नः, अवतारकः प्रचारको वापि भिन्नः, तथा च दार्शनिकं साहित्यमपि पृथक्। अतः पारस्परिकभेदप्रदर्शनाय प्रत्येकं दर्शनं सेतिहासं दार्शनिकसाहित्योपन्यासपुरःसरं व्याख्यानमपेक्षते ।

नन्दिकेश्वरदर्शनम्

अद्वैतशैवदर्शनेतिहासे नन्दिकेश्वरकृतं माहेश्वरसूत्रदार्शनिकव्याख्यारूपं नन्दिकेश्वरदर्शनं प्रथमं स्थानमलङ्करोति । नन्दिकेश्वरविषये परम्परागतमिदं वृत्तमुपमन्युकृतायां नन्दिकेश्वरकाशिकाटीकायां समुपलभ्यते ।

नन्दिकेश्वरव्याघ्रपादादीनुद्धर्तुकामः शिवो डमरुनिनादव्याजेन पाणिन्यष्टाध्यायिप्रारम्भोपलभ्यमानं चतुर्दशसूत्रात्मकं तत्त्वमुपदिदेश । सूत्रजातस्य तत्त्वार्थं बोद्धुमसमर्था व्याघ्रपादादयो नन्दिकेश्वरं तत्त्वार्थं विवरीतुं प्रार्थयामासुः । स च सूत्रनिक्षिप्तं रहस्यार्थं षड्विंशतिकारिकाभिरुपदिदेश ।

नन्दिकेश्वरेण माहेश्वराणां चतुर्दशसूत्राणां व्याख्यानं शैवाद्वैतस्थापनार्थं धातुमूलकशब्दशास्त्रप्रवृत्त्यर्थं चेति प्रकारद्वयेन कृतम् । तत्र चैकैव कारिका पाणिन्यादिवैयाकरणानां कृते । यथाह—

अत्र सर्वत्र सूत्रेषु अन्त्यवर्णचतुर्दशम् ।
धात्वर्थं समुपादिष्टं पाणिन्यादीष्टसिद्धये ॥ इति ।

शेषास्तु शैवाद्वैतप्रतिपादनपराः ।

नन्दिकेश्वरकारिकायाः प्रामाण्यं समयश्च

नागेशभट्टः स्वीयोद्योते 'ऋ ऌ क्'-सूत्रभाष्यव्याख्यानावसरे—

"चतुर्दशसूत्री अनेकर्षीणां नानाविधार्थजिज्ञासानिवृत्तये शिवेन प्रकाशिता, तस्याश्च पाणिन्याद्युद्देश्यकमपि फलम्, अन्त्यवर्णचतुर्दशं पाणिन्याद्युद्देशेनैवोपदिष्टम्, इदञ्च तत्रैव स्पष्टम् ।"

इत्यादि वदन् नन्दीश्वरापरनामनन्दिकेश्वरकृतकाशिकाप्रामाण्यं स्वीकरोति, मनुते च नन्दिकेश्वरं पाणिन्युपदेष्टारम् । पतञ्जलिरपि स्वीयमहाभाष्ये चतुर्दशसूत्र्या अद्वैतशैवदर्शनानुसारिणीं नन्दिकेश्वरकृतां व्याख्यां प्रामाणिकीं मन्वानः—"सोऽयमक्षरसमाम्नायो ब्रह्मराशिः" इत्युक्तवान् ।

समर्थ्यते चेदं मतम् 'ब्रह्मराशिः' इत्यस्य—

"ब्रह्मतत्त्वमेव शब्दरूपतया प्रतिभातीति"

इति कैयटकृतेन व्याख्यानेन। स्पष्टीक्रियते चैतन्नागेशभट्टेनैतदंशव्याख्याने—

"अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः"

इति नन्दिकेश्वरकारिकामुद्धरता। एवञ्च नन्दिकेश्वरः पाणिनिगुरुरासीदिति सिध्यति।

नन्दिकेश्वरशैवाद्वैते मुख्या दार्शनिकविचारधाराः

(क) स्वातन्त्र्यवादः

प्रत्येकं दर्शनम्—किमस्य जगतस्तात्त्विकं स्वरूपम्? कुत इदम्? किन्निमित्तमिदम्? इति प्रश्नान् समाधातुं यतते तांश्चाद्वैतिनः—

"तत्त्वतः परतत्त्वैकस्वरूपं सर्वमिदम्, परतत्त्वादेवोद्भवति, परस्य क्रीडाशीलत्वात्"

इति प्रायः साधारणतया समादधते। परन्तु परतत्त्वस्वरूपे एवञ्च प्रतीयमानस्य वस्तुजातस्य सत्यत्वविषये तेषां महान् विवादः।

नन्दिकेश्वरनये 'अ इ उ ण्' इति सूत्रे प्रथमो वर्णः 'अ' इति निर्गुणब्रह्मवाचकः, इकारः स्वातन्त्र्यापरपर्यायचित्कलावाचकः, उकार ईश्वरवाचकः, णकारश्च 'आसीत्' इति क्रियावाचकः। एवञ्च परमयोगिनाम् अव्यतिरेकतुरीयातीतसमाधौ निर्गुणतया प्रकाशमानो ब्रह्मापरपर्यायः शिवः प्रकाशविमर्शरूपोऽपि विश्वोत्तीर्णस्वरूपे न्यग्भावितविमर्शतया प्रकाशैकघनः 'अ' इति निर्दिष्टः। स एव न्यग्भावितप्रकाशतया चिति-सत्ता-विमर्श-स्वातन्त्र्यादिपर्यायस्वशक्तिप्राधान्येन पश्यन्त्याद्या वाचः सकलजडाजडात्मकं वाच्यं चाभासयन् विश्वरूप ईश्वर इत्युच्यते। एवं जगत्सृष्टिप्रसङ्गे स्वातन्त्र्यशक्तिप्रधानस्य शिवस्य स्रष्टृत्वाभ्युपगमात् स्वातन्त्र्यवादी नन्दिकेश्वर इति सुस्पष्टम्।

काश्मीरिकाद्वैतशैवैर्नन्दिकेश्वरस्वातन्त्र्यवादानुसरणम्

नन्दिकेश्वरप्रतिपादितः स्वातन्त्र्यवादः काश्मीरिकाद्वैतशैवैः स्वीकृत इति स्पष्टीभवति—"स्वेच्छया स्वस्य चिद्भित्तौ विश्वमुन्मीलयत्यसौ" इति नन्दिकेश्वरवाक्यस्य "स्वेच्छया स्वभित्तौ विश्वमुन्मीलयति" इति प्रत्यभिज्ञाहृदयस्थक्षेमराजवाक्येन सह तुलनायां क्रियमाणायाम्। यत इह न केवलं विचारसाम्यमपि तु शब्दसाम्यमपि।

(ख) अद्वैतवादः

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु ।
चित्कलामिं समाश्रित्य जगद्रूप उदीरितः ॥

इति कारिकायां ब्रह्मणश्चित्कलाश्रयणप्रतिपादनात्, ब्रह्मचित्कलयोराश्रयाश्रयिभावसंबन्धस्वीकारात्, संबन्धस्य च द्विष्ठत्वात्, नन्दिकेश्वरनयेऽद्वैतवादो दुःसमर्थ्य इत्याक्षेपस्य समाधानम् 'ऋ ऌ क्' इति सूत्रव्याख्यायामित्थमुपलभ्यते—

ऋ ऌ क् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत् ।
तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥ इति ।

अत्र 'माया'-मनोवृत्ति'-शब्दयोरर्थो निर्णेतव्यः । यतो नन्दिकेश्वरेण माया तत्त्वेषु न गणिता । नापि वेदान्तिसम्मतः—

"मिथ्याज्ञानकारणं सदसद्भ्यामनिर्वचनीया माया"

इत्यर्थस्तत्र संघटते, एवंविधस्यार्थस्य स्वातन्त्र्यवादविरुद्धतयाऽस्वीकार्यत्वात् । न च मनःशब्दस्यान्तरिन्द्रियापरपर्यायत्वं शक्यते स्वीकर्तुम्, मनसस्तद्वृत्तेश्च परिमितप्रमातर्येव सम्भवात् । ऋवाच्यः परमेश्वरः परमशिवो वा—

"मनोवृत्तिमदर्शयत्"

इति कथनस्यायुक्तत्वापत्तेः ।

इह मनोमायाशब्दौ चित्कलापर्यायावित्युपमन्युकृतनन्दिकेश्वरकाशिकाटीकाया उपरि दृष्टिपाते क्रियमाणे स्पष्टीभवति । उपमन्युर्हि 'अ इ उ ण्' सूत्रे इवर्णनिर्दिष्टां चित्कलां 'मायाम्' इति व्याचख्यौ । यथाह—

"इं मायामाश्रित्य" इति ।

मनश्चित्योश्चैकार्थवाचकत्वं महाभारतीयवचनात् स्पष्टीभवति—

मनो महान् मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः ।
प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यते ॥ इति ।

नन्दिकेश्वरवचांस्यपि मायाशब्दश्चित्कलापरपर्याय इति मतं समर्थयन्ति । तन्नये ह्यकारो ब्रह्मवाचकः, ब्रह्म च प्रकाशरूपमिकारवाच्यायाश्चित्कलायाः स्थूलदृष्ट्या भिन्नमपि तयाऽभेदसम्बन्धसंबद्धम् ।

चित्कला हि शक्तिरूपा, वाच्यवाचकात्मनो जगतः कारणं परं ब्रह्म सन्निधीकृत्यैव इच्छा-स्वातन्त्र्यविमर्शादिभिः शब्दैरप्यभिधीयते । एवञ्च इच्छाया एष्टुरिव, स्वातन्त्र्यस्य कर्तुरिव, विमर्शस्य विम्रष्टुरिव, चन्द्रिकायाश्चन्द्रमस इव, वाचोऽर्थादिव न चित्कलायाः प्रकाशरूपाद् ब्रह्मणः पार्थक्यं भेदो वा वास्तविकः । यथाह—

वृत्तिवृत्तिमतोरत्र भेदलेशो न विद्यते ।
चन्द्रचन्द्रिकयोर्यद्वद्यथा वागर्थयोरिव ॥ इति ।

(ग) प्रत्ययवादः

नन्दिकेश्वरो जगतः प्रत्ययमात्रत्वं प्रतिपादयति, स्वीकरोति च परां ब्रह्मस्वरूपां पश्यन्त्यादिवाक्त्रयोर्ध्ववर्तिनीं पश्यन्त्यादिक्रमेण च सकलवाच्यवाचकात्मकजगत्स्वरूपेण विशेषेण वर्तमानाम् । यथाह—

सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् । इति,
ऐ औ च् ब्रह्मस्वरूपः सन् जगत् स्वान्तर्गतं ततः ।
इच्छया विस्तरं कर्तुमाविरासीन्महामुनिः ॥ इति च ।

अतः स्वाप्नपदार्थानां संस्कारोद्बोधजनितत्वाद् विषयतयाऽवभासमानानामपि विषय्येक-रूपत्वमिव, कवेः स्वतन्त्रोल्लेखानां प्रतिभोद्भूतत्वाद् वैविध्येन भासमानानां कविशक्त्येकरूपत्व-मिव, योगिसृष्टेर्योगिशक्त्युद्भावितत्वात् सर्वैः साधारण्येनानुभूयमानाया अत एव च स्वाप्न-पदार्थवदसत्येति वक्तुमशक्याया योगिशक्त्यैकत्वमिव ज्ञप्तिरूपया परयाऽवभासमानं सर्वमिदं जगद् ज्ञप्तिमात्रं प्रत्ययमात्रं वेति स्पष्टम् । एवञ्च भिन्नतयाऽवभासमानानां घटपटाद्यर्थानां ज्ञप्ति-मात्ररूपत्वात् परमार्थत ऐक्यमेवेत्यद्वैतवादिनो नन्दिकेश्वरस्य सिद्धान्तः ।

(घ) निर्गुणसगुणयोर्ब्रह्मेश्वरयोरैक्यम्

ब्रह्मचित्कलयोरभेदः प्राक् साधितः । ईश्वरस्वरूपप्रतिपादने चोक्तम्—अकाररूपं शिवा-परपर्यायं निर्गुणं ब्रह्मेकाररूपां चित्कलां समाश्रित्य ईश्वरो बभूव । ईश्वरश्च सर्वैर्वादिभिः सगुणः स्वीक्रियते । इहापि च चित्कलारूपगुणसमाश्रयणात् सगुण एव प्रतिपाद्यते ।

सगुणनिर्गुणयोः परस्परविरुद्धत्वादैक्यासम्भवाद् नन्दिकेश्वरमते द्वैतापत्तिः स्पष्टा । अस्या निवारणं ब्रह्मचित्कलयोश्चाभेदसाधकमभ्युच्चययुक्तिप्रदर्शनम् 'ए ओ ङ्' इति सूत्र-व्याख्यायामुपलभ्यते ।

यथा वैयाकरणनयेऽकारेकारसंयोगजस्य एकारस्य कण्ठतालुरूपस्थानद्वयजन्यत्वाद् विश्लेषणदृष्ट्या सत्यपि द्व्यक्षरत्वेऽनुभवदृष्ट्यैकाक्षरत्वम्, तथैव ब्रह्मचित्कलयोर्दार्शनिकविश्लेषण-दृष्ट्याऽभ्युपगम्यमानेऽपि भेदे तत्त्वतोऽनुभवदृष्ट्यैकत्वमेव। यथा वाऽकारोकारसंयोगजस्य ओकारस्यैकाक्षरत्वं न केवलं वैयाकरणैरपि तु—

"ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन्"

इति गीतावाक्यम्।

"तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्"

इति कठोपनिषद्वाक्यं चानुसरद्भिर्वेदान्तिभिरपि मन्यते, तथैव शैवैरप्यकारोकारवाच्ययो-र्निर्गुणसगुणब्रह्मणोरेकत्वं प्रतिपाद्यते।

(ङ) षट्त्रिंशत्तत्त्वानि

षट्त्रिंशत्तत्त्वानि द्वैत-द्वैताद्वैत-अद्वैतप्रतिपादकैर्बहुभिः शैवदर्शनैः स्वीक्रियन्ते, तथापि तानि विभिन्नैर्नामभिर्विभिन्नपदार्थाख्यायिभिर्निर्दिष्टानि। नन्दिकेश्वरनये तानीमानि—

(१) शिवः, (२) शक्तिः, चित्कला माया वा, (३) ईश्वरः, (४-८) पञ्चतन्मात्राः, (९-१३) पञ्चभूतानि, (१४-१८) पञ्चज्ञानेन्द्रियाणि, (१९-२३) पञ्चकर्मेन्द्रियाणि (२४-२८), पञ्चप्राणाः (२९-३०), प्रकृतिपुरुषौ (३१-३३), त्रयो गुणाः (३४-३६), अन्तः-करणत्रयं चेति।

(च) तत्त्वोत्तीर्णः परः शिवः

परं तत्त्वं परमशिवपरब्रह्मापरपर्यायं षट्त्रिंशत्तत्त्वोत्तीर्णमिति 'हल्' इति चतुर्दशसूत्र-व्याख्यायामुक्तम्। इदमेवाभिनवगुप्तपादानां मते प्रत्यभिज्ञादर्शने सप्तत्रिंशं तत्त्वं यथाग्रे व्याख्यास्यते।

स्वातन्त्र्यवादी पाणिनिः

पाणिनिः स्वातन्त्र्यवादं मनुते स्म इति स्पष्टीभवति 'कारके' इति, 'स्वतन्त्रः कर्ता' इति च सूत्रयोः पतञ्जलिकृतभाष्यस्योपरि दृष्टिदानेन। तत्रत्या च विचारधारा संक्षिप्तरूपेणैवम्—

उभावपि कर्तृकारकशब्दावेकस्मादेव करणार्थाद् डुकृञ्‌वादिञान्तात् 'कृ'धातोः 'ण्वुल्तृचौ' इति सूत्रेण क्रमशः कृततृज्ण्वुलप्रत्ययान्तान्निष्पन्नावेकार्थावेव। अतः—

"अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः"

इत्युद्घोषयन्तो व्याकरणशास्त्रविदः, 'कर्तृकारकम्' इति वदन्तः कथं न व्यर्थपुनरुक्तिदोषभाजः। इमं प्रश्नं समाधातुं कर्तृकारकशब्दयोर्वैयाकरणस्वीकृतः पारस्परिकोऽर्थभेदः सर्वतः प्रथमं निर्णयमपेक्षते।

कारकशब्दार्थः

उपर्युक्तः प्रश्नः 'कारके' इत्यस्य 'स्वतन्त्रः कर्ता' इत्यस्य च सूत्रस्य व्याख्याने एवमुत्थापितः, समाहितश्च महाभाष्ये, तस्य च कैयटकृते प्रदीपे—

करोतीति कारकमित्यन्वर्थसंज्ञा चेत् तदा स्वतन्त्रस्यैव कर्तृसंज्ञावत् कारकसंज्ञापि प्राप्नोति, न तु करणाधिकरणादीनामस्वतन्त्राणाम्। मैवम्। यद्यपि समूहरूपा क्रिया प्रतिकारकं न भिन्ना, तथापि स्वव्यापारे सर्वेषां कारकाणां स्वातन्त्र्यात्, तदनुष्ठानेन प्रधानक्रियायामुपयोगित्वात्, कर्तृसन्निधावपि स्वव्यापारस्याऽनिवर्तनात्, पारतन्त्र्यावस्थायामप्यनिवृत्तं कारकत्वं करणाऽधिकरणादीनाम्। एवञ्च स्वव्यापारे स्वातन्त्र्यात् कारकत्वम्, पच्यादिवाच्यसमूहं प्रति पारतन्त्र्यात् करणत्वञ्च। यद्यपि—

"देवदत्तः काष्ठैः स्थाल्यामोदनं पचति"

इत्यादौ करणाधिकरणाद्यनुष्ठेयानां क्रियाणां पचिधात्वर्थत्वं नास्ति, तथापि कृधात्वर्थत्वाक्षतेः करणादीनामपि कारकत्वं सूपपादमेव।

अयं हि भगवतो पतञ्जलेरभ्युपगमः—सर्वेषां कर्तृभिन्नानां कारकाणां स्वातन्त्र्यं पारतन्त्र्यं च पर्यायेण। उद्भूतस्वातन्त्र्यविवक्षायां कर्तृसंज्ञा, यथा 'स्थाली पचति' इति। उद्भूतपारतन्त्र्यविवक्षायां तु न्यग्भावात् सदपि स्वातन्त्र्यं स्वकार्ये न प्रयुङ्क्ते यथा—

'स्थाल्यां पचति' इत्यत्र।

प्रधानेन समवाये स्थाली परतन्त्रा, व्यवाये तु स्वतन्त्रा। यथा अमात्यानां राज्ञा सह समवाये पारतन्त्र्यम्, व्यवाये तु स्वातन्त्र्यम्। समवाये च कर्ता प्रधानम्, सर्वेषु साधनेषु सन्निहितेषु कर्तुरेव प्रवर्तयितृत्वात्। यथाह—"कथं पुनर्ज्ञायते कर्ता प्रधानम्? इति यत्सर्वेषु साधनेषु कर्ता प्रवर्तयिता भवति" (म० भा० भाग २ पृ० २४५ नि० स०)।

एवञ्च पतञ्जलिव्याख्यानुसारं पाणिनिनये कारकचक्रप्रयोक्तृत्वं कर्तुः स्वातन्त्र्यमित्यायाति।

इदञ्च महाभाष्यकारमतं कर्तृविषये भर्तृहरिमतपोषणार्थं समुद्धृतं वाक्यपदीयटीकायाम् "प्रागन्यतः शक्तिलाभात्" इत्यादि कारिकाद्वयव्याख्याने हेलाराजेन । एतच्चाग्रे विवरीष्यते ।

पतञ्जलिनये एकस्यैव कारकत्वमधिकरणत्वादि च

पतञ्जलिरेकस्यैव कारकत्वमधिकरणत्वादि च प्रकारद्वयेन साधयति—

(१) प्रधानव्यवायकालिकं स्वातन्त्र्यमादाय कारकत्वव्यवहारः, प्रधानसमवायकालिकं च पारतन्त्र्यमादायाधिकरणत्वादिव्यवहारः ।

(२) वाक्योपात्तसर्वकारकसाधारण्यैका क्रिया । यथा—

"देवदत्तः काष्ठैः स्थाल्यामोदनं पचति"

इत्यत्र सर्वसाध्या पचिरूपा क्रिया, पचनस्य सर्वव्यापारजन्यत्वात् । ततश्च सर्वेषां तस्यां कर्तृत्वम्, अतश्च कारकत्वम् । अवान्तरव्यापारविवक्षायान्तु करणादिरूपत्वम् । यथा मातापित्रोरपत्योत्पादने कर्तृत्वम् । भेदविवक्षायान्तु 'अयमस्यां जनयति', 'इयमस्माज्जनयति' इत्यादौ मातुरधिकरणत्वं पितुश्चोपादानत्वं व्यवतिष्ठते । कर्तृसंज्ञा तु करणत्वाद्यवस्थायां न भवति ।

"स्वतन्त्रः कर्ता"

इत्यत्र हि कारकत्वादेव स्वातन्त्र्ये लब्धे पुनः स्वातन्त्र्यश्रुतिर्नियमार्था । तस्माद् यस्य स्वातन्त्र्यमेव तस्यैव कर्तृसंज्ञा, न तु पारतन्त्र्यसहितस्वातन्त्र्ययुक्तस्य ।

कारकसंज्ञा तु वस्तुस्थित्या विद्यमानमुद्भूतत्वेनाविवक्षितमपि स्वातन्त्र्यमाश्रित्य करणादीनां विधानसामर्थ्यात् प्रवर्तते । यत्र च शक्तीनां निमित्तनिमित्तिभावेन युगपद् विवक्षा, त्रत संज्ञानां विप्रतिषेधो भवति । यथा—

"धनुषा विध्यति"

इत्यत्र विनापायविवक्षया धनुषः साधकतमत्वाभावात् संज्ञाद्वयप्रसङ्गे परत्वात् करणसंज्ञैव ।

स्वतन्त्रशब्दार्थः

"स्वतन्त्रः कर्ता" इति सूत्रं व्याचक्षाणेन पतञ्जलिना "तन्त्रशब्दः प्राधान्ये वर्तते" इत्युक्तम्। स्वशब्द आत्मवाची। एवञ्च स्वः आत्मा तन्त्रं प्रधानं यस्येति विग्रहानुसारं स्वप्रधानापरपर्यायः स्वतन्त्रशब्दः।

कर्तृकारकशब्दयोरर्थभेदः

कारकशब्दार्थात् कर्तृशब्दार्थस्यायं भेदः। उक्तमेव प्राक् प्रत्येकं क्रिया क्रियासमूहरूपा। यथा पचतिक्रिया इन्धननिष्ठज्वलिति-स्थालीनिष्ठधृति-दर्वीनिष्ठघट्टिति-तण्डुलनिष्ठविक्लित्ति-देवदत्तनिष्ठप्रयुक्त्यादिक्रियासमूहरूपा। समूहरूपा क्रिया प्रतिकारकं न भिन्ना, परन्तु काष्ठादेः स्वव्यापारे ज्वलित्यादिरूपे स्वातन्त्र्यम्, अतश्च कारकत्वम्। परं पच्यादिसमूहं प्रति कर्तृदेवदत्तपारतन्त्र्यम्, अतश्च करणत्वम्। एवञ्च कर्तृभिन्नं सर्वमपि कारकं प्रधानसमवाये परतन्त्रं तद्व्यवाये च स्वतन्त्रम्। अतः कर्तृसंज्ञा करणाद्यवस्थायां न भवति।

परन्तु "स्वतन्त्रः कर्ता" इति सूत्रे कारकत्वादेवोपर्युक्तप्रकारेण स्वातन्त्र्ये लब्धे पुनः स्वतन्त्रश्रुतिर्नियमार्था। अतो यस्य स्वतः स्वातन्त्र्यमेव, न तु पारतन्त्र्यसहितं स्वातन्त्र्यम्, तस्यैव कर्तृसंज्ञा।

कर्तृप्राधान्यविवरणम्

कर्तुर्वाक्योपात्तसर्वकारकेषु प्राधान्यं स्वीक्रियते, सन्निहितेषु सर्वेष्वपि साधनेषु तस्य प्रवर्तयितृत्वात्, कारकान्तरं विनापि सर्वक्रियासु प्रधानानामसिवृत्त्यादिक्रियाणां कर्तृत्वाच्च। एवञ्च पतञ्जलि-कैयटकृतव्याख्यानुसारं पाणिनिरनवच्छिन्नस्वातन्त्र्यः कर्तेत्यभ्युपगच्छति स्म। अतः स्वातन्त्र्यवादी पाणिनिः। यतोऽद्वैतवादिभिः काश्मीरिकशैवैः स्वातन्त्र्यशक्तिः स्फुरत्ता-महासत्ताद्यपरपर्याया स्वीक्रियते। सत्ता च भवनकर्तृता भवने स्वातन्त्र्यमिति व्याख्यायते। तथा च शिव एव तथा तथा भवतीति स्वातन्त्र्यवादः स्थाप्यते। यथाह—

चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः॥

सा स्फुरत्ता महासत्ता देशकालविशेषिणी ।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥ इति ।

(भा० भाग १ पृ० २५०-५५.)

कैयटोपरि भर्तृहरिप्रभावः

इदन्तु सुप्रसिद्धं यद् भर्तृहरिः पातञ्जलमहाभाष्यस्य त्रिपदीत्याख्यां व्याख्यामलिखत्, यद्यपि तस्याः प्रारम्भिकः सप्तपञ्चाशत्सूत्रपर्यन्त एव भागोऽद्यावधि समुपलब्धः । जैयटात्मजः कैयटो भर्तृहरिकृतां महाभाष्यटीकां वाक्यपदीयं तद्वृत्तिञ्च परिशील्य महाभाष्यप्रदीपं लिखितवान् । यथाह—

तथापि हरिबद्धेन सारेण ग्रन्थसेतुना ।
क्रममाणः शनैः पारं तस्य प्राप्तास्मि पङ्गुवत् ॥ इति ।

प्रकृतस्य "स्वतन्त्रः कर्ता" इति सूत्रस्य व्याख्याया उपरि क्रियते चेद् दृष्टिपातस्तदा नावशिष्यते सन्देहकणिकापि कैयटोपरि भर्तृहरिप्रभावविषये । यतस्तत्र तत्र कैयटो भर्तृहरिपदसरणिमेवानुसरति । अवलोक्यतां साम्यं भर्तृहरिकारिकाद्वयस्य कैयटवाक्यैः सह । यथा भर्तृहरिराह—

प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ॥
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते ॥

(वा० प० का० ३ पृ० २४३)

तथैवाह कैयटोऽपि—

"तदधीनप्रवृत्तिनिवृत्तित्वात् करणादीनाम्, तस्य च प्रागन्यतः शक्तिलाभात् प्रतिनिध्यदर्शनात् करणाद्यभावेऽपि 'आस्ते शेते' इत्यादौ केवलस्य कर्तुर्दर्शनात् कर्तृरहितानां करणानामदर्शनात् प्राधान्यं कर्तुः" (म० भा० प्र० भा० २; नि० पृ० २४५) इति ।

एवञ्च कर्ता स्वतन्त्रः । स ह्यन्यतः शक्तिलाभात् प्रागेवाऽर्थितादिवशेन साधनाद्युपार्जने

प्रवर्तते। करणानि कुठारादीनि तु तदैव क्रियासु प्रवर्तन्ते यदा तेषु कर्ता शक्तिमादधाति, तथा च तानि स्वाधीनीकरोति। अतः कर्त्रायत्तव्यापारत्वात् करणादीन्यस्वतन्त्राणि।

देवदत्तः काष्ठैः स्थाल्यामोदनं पचन् काष्ठान्यधिकं प्रज्वलन्ति पश्यन् तानि निवर्तयति। स च काष्ठैः पत्रैस्तृणैर्विद्युता वा पचतीति करणादीनां वर्तते प्रतिनिधिः। न तु वर्तत एवंभूतः प्रतिनिधिः कर्तुः। यद्यपि साधारणासु पच्यादिक्रियास्वपेक्षते कर्ता साधनानि, तथापि भवनवर्तनादिक्रियासु साधननिरपेक्ष एव। अतो भवनक्रियायां वर्तनक्रियायाञ्च सर्वथा स्वतन्त्रः कर्तेति पाणिनि-पतञ्जलि-भर्तृहरीणां सामान्योऽभ्युपगमः। स्पष्टीकृतं चैतत् तत्रभवता हेलाराजेनोपर्युक्तकारिकाव्याख्यायाम्—

"यत्सर्वेषु साधनेषु कर्ता प्रवर्तयिता भवति"

(म० भा० भाग २ नि०; पृ० २४५)

इति महाभाष्यवाक्यमुद्धृत्य,

"एतच्च भाष्यं गर्भीकृतनान्तरीयकार्थसहं संक्षिप्योक्तम्"

इति वदता। उपर्युक्तकारकादिविवरणैरिदं सुस्पष्टं यत् 'कर्तृकारकम्' इति कथयन्तो वैयाकरणा न व्यर्थपुनरुक्तिदोषभाजः, कर्तुः पारतन्त्र्यरहितस्वातन्त्र्याभ्युपगमात्, कारकान्तराणाञ्च पारतन्त्र्यमिश्रितस्वातन्त्र्यस्वीकरणात्।

कर्ता च शक्तिमान् स्वतन्त्रः। शक्तिशक्तिमतोश्चैक्यम्। सांसारिकस्य कर्तुरापेक्षिकमवच्छिन्नञ्च स्वातन्त्र्यम्, परिमितत्वात्। अपरिच्छिन्नस्य शिवादिशब्दनिर्दिष्टस्य तु कर्तुरवच्छेदशून्यं स्वातन्त्र्यं यत्कालशक्तीति नाम्नोपात्तं भर्तृहरिणा स्वीये वाक्यपदीये, यथा प्रतिपादितं मयैवैतद्विश्वविद्यालयीयैषमस्त्यदर्शनपरिषदधिवेशने "स्वातन्त्र्यवादी भर्तृहरिः" इतिशीर्षकं स्वलेखं पठता। अतः पिष्टपेषणं परिहरता मया नोपपाद्यते भर्तृहरेः स्वातन्त्र्यवादित्वम्, विदुषस्तत एवावगमिष्यन्तीति मन्यमानेन।

अतो भगवता शिवेन चतुर्दशसूत्रैरुपदिष्टः, नन्दिकेश्वरेण तद्व्याख्यारूपायां स्वकाशिकायां विवृतः, पाणिनिना स्वाष्टाध्याय्यां स्वप्रयोजनानुसारं 'स्वतन्त्रः कर्ता' इति सूत्रे परिगृहीतः, पतञ्जलिना स्वभाष्ये ससंक्षेपं प्रतिपादितः, भर्तृहरिणा स्वीये वाक्यपदीये विशदीकृतः, तट्टीकाकारेणाभिनवगुप्तगुरुणा हेलाराजेन सविस्तरं व्याख्यातः स्वातन्त्र्यवादः सोमानन्दादिभिः काश्मीरिकाद्वैतशैवैः स्वतन्त्रसिद्धान्ततया प्रतिष्ठापित इति मामकीनं मतम्।

एवञ्च भर्तृहरेर्वाक्यपदीयं न वेदान्तप्रक्रियानुसारं व्याख्यां सहते, तस्य स्वातन्त्र्यवादित्वात्। विवर्तशब्दस्य भर्तृहरिव्याख्यात्रनुसारं न वेदान्तिस्वीकृतो रूढोऽर्थः, अपि तु यौगिक एव 'विशेषेण विलक्षणतया वा वर्तनम्' इत्यादि यथापूर्वोक्तभर्तृहरिस्वातन्त्र्यवादविषयकपत्रे स्पष्टीकृतम्।

यत्तु भर्तृहरेः स्वीयायां वाक्यपदीयटीकायाम्—

"एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणासत्यविभक्तान्यरूपोपग्राहिता विवर्तः, स्वप्नविषयप्रतिभासवत्।"

इति विवर्तलक्षणम्। तत्र 'असत्य'पदोपादानादेव स्वातन्त्र्यवादिस्वीकृतं मिथ्याज्ञानस्वरूपमजानानां वेदान्तिनां यो 'भर्तृहरिर्वेदान्तानुयायी' इति भ्रमः, स स्वातन्त्र्यवादिनां नयेऽसत्यस्य भ्रमस्य च स्वरूपे निरूप्य नातिदूरे दूरीकरिष्यते।

प्रत्यभिज्ञादर्शनेतिहासः साहित्यञ्च

सर्वाण्यप्यद्वैतशैवदर्शनानि चतुःषष्ट्यागमाश्रितानि। धार्मिकशैवदृष्ट्या शैवागमाः शिवात् परम्परायाता एवं चानाद्या ईश्वरोक्तवेदवत्। तथापि कालेन सा परम्परा विच्छिद्यतेऽनुग्रहकारिणा शिवेन भूयः प्रचाल्यते च। अतो भाषामूलमागमानां वेदेभ्योऽर्वाक्त्वप्रतिपादनं निर्मूलम्। शैवागमाध्येतृपरम्परायां सत्ययुगादारभ्य कलियुगप्रारम्भिकांशपर्यन्तं स्वच्छन्द-लाकुल-अणुराज्-अब्जज-बलि-वामन-विभीषण-रावण-राम-लक्ष्मण-सिद्ध-ऋषि-योगिप्रभृतयो निर्दिष्टाः। कलिप्रभावे विस्तृते शैवागमविद ऋषयो दुर्गमस्थानं गताः। एवञ्च शिवशासनपरम्परा व्युच्छिन्ना। इयं शैवागमाध्येतृपरम्परा अभिनवगुप्तपादैः स्वीयतन्त्रालोके षट्त्रिंशाह्निके सिद्धागमाश्रयेण वर्णिता।

सोमानन्दोऽभिनवगुप्तपादस्य परमेष्ठिगुरुरासीत्। अभिनवगुप्तश्च—

इति नवतितमेऽस्मिन् वत्सरेऽन्त्ये युगांशे
तिथिशशिजलधिस्थे मार्गशीर्षावसाने।
जगति विहितबोधामीश्वरप्रत्यभिज्ञां
व्यवृणुत परिपूर्णां प्रेरितः शम्भुपादैः॥

इति स्वकथनानुसारं पञ्चदशाधिकदशशततमे ईशवीयवर्षे ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनीं समापितवान्। एवं चेशवीयदशमशतकमध्यजन्मनामभिनवगुप्तपादानां परमेष्ठिगुरुः सोमानन्द ईश-

वीयनवमशताब्द्यां समभूदिति निश्चीयते। अयं सोमानन्दः कलावद्वैतचतुःषष्टिशैवागमपरम्पराप्रथम-प्रचालकात् त्र्यम्बकादेकोनविंश इत्यैतिहासिकदृष्ट्याऽद्वैतशैवागमप्रचार ईशवीयचतुर्थशतकान्त्य-भागे समभूदिति सिध्यति स्थूलदृष्ट्या, तथापि शैवागमप्रचार ईशवीयशतकप्रारम्भात् पूर्वमासी-दिति युक्तिभिः संस्थापितमेव प्रथमव्याख्याने। इमांश्चतुःषष्ट्यागमान् शङ्कराचार्यो जानातिस्मानु-सरतिस्म चेति—

"चतुःषष्ट्या तन्त्रैः सकलमभिसन्धाय भुवनम्"

इति तदीयसौन्दर्यलहरीश्लोकादवगम्यते। सोमानन्दोऽस्याः शैवागमिकविचारधाराया आणव-शाक्त-शाम्भव-प्रत्यभिज्ञाख्येषु चतुर्षूपायेषूर्ध्वतममन्तिममनुपायापरपर्यायं प्रत्यभिज्ञेतिविश्रुतं स्वसमकालभाव्यद्वैतशैवप्रतिपादकवसुगुप्ताचार्याऽविदितं मोक्षोपायं प्रत्यभिज्ञेयमहेश्वरस्वरूपं च युक्तिभिः संसाध्य शिवदृष्ट्या प्रकटीचकार ईशवीयनवमशतके। अत एव शिवदृष्टौ प्रतिपादितं दर्शनं प्रत्यभिज्ञादर्शनमित्युच्यते।

शिवदृष्टिप्रतिबिम्बभूतामीश्वरप्रत्यभिज्ञाकारिकां तस्याश्चोपरि वृत्तिनाम्नीं टीकां तस्या अप्युपरि विवृत्याख्यां टीकां सोमानन्दशिष्य उत्पलाचार्यो व्यलिखत्। अभिनवगुप्ताचार्यश्चोत्पला-चार्यकृत्योरीश्वरप्रत्यभिज्ञाकारिकातद्विवृत्योरुपरि क्रमशो विमर्शिनी-विवृतिविमर्शिनीति प्रसिद्धे द्वे टीके कृतवान्। इदमेव ग्रन्थपञ्चकं शिवदृष्ट्याख्यप्रकरणसहितं मुख्यतया प्रत्यभिज्ञा-दर्शनोपपादकमिति सर्वदर्शनसंग्रहे मधुराजयोगिकृतशास्त्रपरामर्शश्लोकमुद्धरता माधवेन स्वीकृतम्। यथाह—

सूत्रं वृत्तिर्विवृतिर्लघ्वी बृहतीत्युभे विमर्शिन्यौ।
प्रकरणविवरणपञ्चकमिति शास्त्रं प्रत्यभिज्ञायाः॥ इति।

अभिनवगुप्तानन्तरं न कश्चन मौलिको ग्रन्थः प्रत्यभिज्ञाप्रतिपादकः समुपलभ्यते। अभिनव-गुप्तकृतस्तन्त्रालोकस्तु त्रयाणामप्यद्वैतशैवदर्शनानां क्रम-कुल-प्रत्यभिज्ञेतिविख्यातानां प्रतिपा-दनपरः।

तच्छिष्य-प्रशिष्यादिभिर्विरचिताः प्रत्यभिज्ञाविषयका ग्रन्था इमे—

तच्छिष्यक्षेमराजकृतः प्रत्यभिज्ञाहृदयेतिप्रसिद्धः प्रत्यभिज्ञादर्शनस्य संक्षिप्तो ग्रन्थः, योग-राजकृता (१०६० ई०) परमार्थसारटीका, जयरथलिखिता (११८० ई०) तन्त्रालोकटीका, भास्करकण्ठकृता (१७८० ई०) ईश्वरप्रत्यभिज्ञाटीका भास्करीतिप्रसिद्धा, अन्या चाज्ञातनाम्ना केनापि कृता, यस्या मुद्रापणमस्माभिर्भास्कर्या द्वितीये संस्करणे चिकीर्ष्यते।

इदमत्रावधेयम्—

महादेवगिरौ शिलोत्कीर्णानि सोमानन्दपूर्वभाविना वसुगुप्तेन (८२५ई०) लब्धानि प्रकाशितानि च शिवसूत्राणि न प्रत्यभिज्ञादर्शनप्रतिपादकानि। तेषु प्रत्यभिज्ञाख्योपायस्य नाममात्रेणाप्यनुपलम्भात्, शाम्भव-शाक्त-आणवाख्यानां त्रयाणामेव मार्गाणामेकैकेनाध्यायेनाध्यायत्रयविभक्ते शिवसूत्रे व्याख्यानाच्च। एतदूरीकृत्यैवेश्वरप्रत्यभिज्ञाकारिकायाम्—

इति प्रकटितो मया सुघट एष मार्गो नवो
गुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा॥

इतीयमुत्पलाचार्योक्तिः संगमयितुं शक्यते नान्यथा। अभिनवत्वं च प्रत्यभिज्ञामार्गस्य वसुगुप्तेनाऽप्रतिपादनात्; न तु शैवागमानाश्रितत्वात्, यतः सोमानन्दः स्वयमेव वक्ति शिवदृष्ट्यन्ते—

प्रतिपादितमेतावत् सर्वमेव शिवात्मकम्।
न स्वबुद्ध्या शिवो दाता शिवो भोक्तेति शास्त्रतः॥ इति।

एवं स्पन्दकारिका तदाश्रिताश्च ग्रन्था न प्रत्यभिज्ञादर्शनप्रतिपादनपराः, यतः स्पन्दकारिका शिवसूत्रसंग्रहपरा, यथा स्पष्टीभवति शिवसूत्रविमर्शिनीकर्तुः क्षेमराजस्य वचनात्। यथाह—

"एतानि च सम्यगधिगत्य भट्टश्रीकल्लटाद्येषु प्रकाशितवान् स्पन्दकारिकाभिश्च संगृहीतवान्" (शि० सू० वि० २) इति।

स्पन्दशास्त्रं च प्रत्यभिज्ञाशास्त्राद् भिन्नम्, पूर्वस्य प्राधान्येन शाक्तोपायप्रतिपादकत्वादित्यपि ध्वन्यते क्षेमराजवाक्यात्। यथाह—

"श्रीपूर्वशास्त्रे ध्यानाद्येवाणवत्वेनोक्तम्। एतच्च स्थूलत्वात् शाक्तोपायप्रकाशनात्मनि स्पन्दशास्त्रे न संगृहीतम्" (शि० सू० वि० ७९) इति।

इदमप्यवश्यं स्मरणीयम्। शिवसूत्रप्रदर्शितास्त्रयो मार्गा आगमाश्रिताः, शिवसूत्रस्यापि रहस्यागमसारसंग्रहरूपत्वात्। यथाह स एव—

"रहस्यागमसारसंग्रहरूपत्वात् शिवसूत्राणाम्" (शि० सू० वि० ५५) इति।

प्रत्यभिज्ञादर्शनप्रास्ताविकम्

काश्मीरः शारदापीठ इति सुप्रसिद्धम्। प्रत्यभिज्ञादर्शनोत्थानसमये काश्मीरो बहूनां दार्शनिकविचारधाराणां संगमस्थानमासीत्। अशोकसमयादारभ्य (२७३-२३२ ई० पू०) काश्मीरो बौद्धानां महत्केन्द्रमभूत्। इह कनिष्को बौद्धधर्मपुस्तकेषु परस्परविरुद्धांशान् संगमयितुं बौद्धपण्डितानामेकां महतीं सभामायोजितवान्। बौद्धमतसत्ता कनिष्कसमये (७८–१०१ ई०) काश्मीरिकशैवानामरुन्तुदा सञ्जाता, यदा कनिष्कः सम्पूर्णां काश्मीरभूमिं बौद्धभिक्षुसंघाय प्रादात् तन्नेता नागार्जुनश्चार्थिकवैभवसहकृतं स्वीयं विचित्रबुद्धिवैभवं बौद्धधर्मप्रचाराय शैवधर्मोन्मूलनाय च प्रायौक्षीत्। नागार्जुनस्य तदनुयायिनां च शैवधर्मद्वेष्टृत्वं कह्लणकृतायां राजतरङ्गिण्यां वरदराजकृतशिवसूत्रवार्त्तिके चेत्थं सूचितम्—

नागार्जुनेन सुधिया बोधिसत्त्वेन पालिताः।
क्रियां नीलपुराणोक्तामाच्छिन्दन्नागमद्विषः॥ (रा० त०) इति।
नागबोध्यादिभिः सिद्धैर्नास्तिकानां पुरःसरैः।
आक्रान्ते जीवलोकेऽस्मिन्नात्मेश्वरनिरासकैः॥ (शि० सू० वा०) इति।

पाणिनीयव्याकरणस्य दर्शनस्य चाध्ययनाध्यापनपरम्परां कह्लणानुसारं काश्मीरराजोऽभिमन्युः संभवत ईशवीयपूर्वचतुर्थशतकभवः समचालयत्। पुण्यराजो वाक्यपदीयद्वितीयाध्यायटीकान्ते राजानकशूरवर्मशशाङ्कनामानौ स्वगुरुपरमगुरू कीर्तयति स्म। हेलाराजो भूतिराजतनयोऽपरो वाक्यपदीयटीकाकृद् भूतिराजश्चाभिनवगुप्तपादानां गुरू आस्ताम्। अभिनवगुप्तपादं वैयाकरणसिद्धान्तसंवेतृतया नवं शेषं स्वीकुर्वन्तस्तद्गुरवोऽभिनवगुप्तपाद इति नाम तस्मै प्रादुः।

न्यायदर्शनस्य तथाऽद्वैतवेदान्तदर्शनस्य काश्मीरे समीचीनः प्रचार आसीत्, न्यायसिद्धान्तमवलम्ब्य श्रीशङ्कुककृतस्य, वेदान्तसिद्धान्तानुसारं भट्टनायककृतस्य च रससूत्रव्याख्यानस्योपलम्भात्। अभिनवगुप्तः स्वीयकथामुखतिलके न्यायाभ्युपगतषोडशपदार्थान् प्रतिपादयति स्म, मालिनीविजयवार्त्तिके च वैशेषिकाभ्युपगतसमवायविशेषाभावान् दृढं समालोचयति स्म, ध्वन्यालोकलोचने चाभिहितान्वयवादान्विताभिधानवादमीमांसकसिद्धान्तौ च। प्रथमव्याख्याने संकीर्तिता रामकण्ठादयो द्वैतशैवसिद्धान्तदर्शनं व्याचख्युः। नैषधचरितकर्ता श्रीहर्षो जयन्तचन्द्राज्ञानुसारं स्वनिबन्धं काश्मीरविदुषः प्रदर्शयितुं शारदाहस्ते च स्वीकृत्यर्थं समर्पयितुं काश्मीरं जगाम। अत ईशवीयपूर्वचतुर्थशतकादारभ्य द्वादशशतकपर्यन्तं काश्मीरस्य शारदापीठत्वं विविधदर्शनविचार-

धारासंगमभूमित्वं चाक्षतमासीत् । शङ्कराचार्योऽपि मण्डनमिश्रप्रारब्धोन्मूलनं बौद्धमतं भारतीय-प्रदेशान्तरेभ्यः समुन्मूल्य ईशवीयनवमशतकस्य द्वितीयदशके काश्मीरमगमत् संवर्धयितुं तत्रत्यदार्शनि-केष्वद्वैतवेदान्ताद्वैतशैवागमज्ञानम्, प्रचारयितुं शैवाद्वैतविचारधारां दक्षिणामूर्तिस्तोत्रादिद्वारा, प्रोत्साहयितुं काश्मीरविदुषोऽद्वैतशैवविषये बौद्धकृतानाक्षेपानपाकर्तुम् । सुरेश्वराचार्यश्च तच्छिष्यो व्याख्याद् दक्षिणामूर्तिस्तोत्रमद्वैतशैवागमानुसारं प्रयुञ्जन् शैवागमपारिभाषिक-शब्दान्, आकर्षयन् तत्रत्यशैवानां ध्यानं मौलिकशैवाद्वैतसिद्धान्तान् प्रति, दर्शयंश्चागमाश्रितशाङ्कराद्वैतस्य शैवाद्वैतसाम्यम्, प्रवर्धयंश्च शैवविदुषामुत्साहं दार्शनिक-दृष्ट्या शैवागमानध्येतुम् ।

शङ्करः शैव आसीदित्यत्र नास्ति विवादः । स च चतुःषष्ट्यागमाननुसरति स्म, श्रीचक्रं शैवागमानुसारं जगन्नाथपुरीस्थस्वमठे स्थापयति स्मेत्यपि सुप्रसिद्धम्, तच्चक्रमद्यापि तत्र तिष्ठत्येव, केनापि तत्र गत्वा शक्यतेऽवलोकयितुम् । अतस्तदीयः सिद्धान्तोऽद्वैतशैवागमानुसारमध्ययन-मपेक्षते । अद्यत्वे त्वागमान् सर्वथोपेक्ष्य वेदान्तसूत्रोपरि तत्कृतभाष्यमात्रं तदुपरि च न्यायसिद्धान्त-प्रभावितैः परभाविभिः कृतानन्यान् ग्रन्थांश्चाश्रित्याऽद्वैतवेदान्तसिद्धान्तः प्रचलति । परन्तु शैवेन शङ्करेणाद्वैतशैवागमविरुद्धं कथमुक्तमिति न चिन्त्यते ।

सोमानन्दाभिनवगुप्तादयस्तु विविधान्यद्वैतवेदान्तमतानि समालोचयन्तः, तत्र तत्र जडब्रह्मवाद-अभावब्रह्मवाद-शून्यब्रह्मवादादिशब्दान् प्रयुञ्जन्तोऽपि न क्वचन शङ्करनाम गृह्णन्ति । तत्रेदं कारणं प्रतिभाति—

अभिनवगुप्तः स्वीयेश्वरप्रत्यभिज्ञाविवृतिविमर्शिन्यन्तेऽद्वैतशैवाद्वैतवेदान्तस्य मौलिकं भेदं मायास्वरूपमात्र एव मनुते । पूर्वो मायां शक्तिं स्वीकरोति, अपरस्तु सदसद्भ्यामनिर्व-चनीयाम् । शङ्करस्तु तत्र तत्र स्वभाष्ये मायाविषये शक्तिशब्दं प्रयुनक्ति । यथा—

"शक्तिरहितस्य प्रवृत्त्यनुपपत्तेः·······अविद्यात्मिका बीजशक्तिः" (शां० भा० २९७), "सर्वज्ञस्येश्वरस्य मायाशक्तिः" (शां० भा० ३८२) इत्यादि ।

गहनोऽयं विषयः समधिकं विचारमपेक्षत इति नेह प्रतन्यते ।

प्रत्यभिज्ञादर्शनम्

प्रत्यभिज्ञादर्शनं स्वातन्त्र्यवादः, आभासवादः, संविदद्वयवादः, यथार्थप्रत्ययवादः, काश्मीरशैवाद्वैतमित्यादिनामभिस्तत्र तत्र समुल्लिखितम् ।

स्वातन्त्र्यवादः

कस्मिंश्चिदन्यस्मिन् वादे स्वीकृते न केवलमात्यन्तिको मोक्षो न संभवत्यपि तु साधारणो लौकिको व्यवहारोऽपि। यतो विवर्तोऽसत्यरूपप्रतिभासात्मेत्युच्यते। निर्भासते चासत्यञ्चेति कथमिति तु न चिन्तितम्। परिणामे तु रूपान्तरं तिरोभवति रूपान्तरञ्चाविर्भवतीत्युक्तम्। प्रकाशस्य रूपान्तराभावात् तत्तिरोधाने स्यादान्ध्यम्। अप्रकाशश्च प्रादुर्भवन् नैव प्रकाशेतेत्युभयथापि सुप्तं जगत् स्यादिति न विचारितम्। वेदान्त्यभ्युपगतप्रतिबिम्बवादे स्वच्छतामात्रं संवेदनस्य न स्वातन्त्र्यमिति प्रतिबिम्बसमर्पकवस्त्वन्तरपर्येषणा कर्तव्या। अविद्या चानिर्वचनीया वैचित्र्यं चाधत्ते इति व्याहतम्। वेदान्तिस्वीकृतः प्रतिबिम्बवादो वेदान्तपरिभाषादिग्रन्थेषूपलभ्यमानो यथा न युक्तियुक्तस्तथा तन्मतोपन्यासपूर्वकमभिनवगुप्तपादैः स्वीयतन्त्रालोके तृतीयाह्निकेऽखण्ड्ययुक्तिभिः प्रदर्शितम्। यथाह—

यस्त्वाह नेत्रतेजांसि स्वच्छात् प्रतिफलन्त्यलम्।
विपर्यस्य स्वकं रूपं गृह्णन्तीति स पृच्छयते॥

(तं० आ० ३, श्लो० १२)

विपर्यस्तैस्तु तेजोभिर्ग्राहकात्मत्वमागतैः।
रूपं दृश्येत वदने निजे न मुकुरान्तरे॥

(तं० आ० ३, श्लो० १४)

इत्यादिकारिकाभिः। प्रतिफलनबलात् प्रत्यावृत्ता यदि नायना रश्मयः स्वकमेव वक्त्रं गृह्णन्ति, तर्हि निज एव देशे वक्त्रग्रहणं न्याय्यम्, नान्यत्र दर्पणादेरन्त इति भावः।

तस्मादनपह्नवनीयः प्रकाशविमर्शात्मा संवित्स्वभावः परमशिवः, स्वातन्त्र्यादेव मन्त्र-मन्त्रेश-मन्त्रमहेश-अकल-सकलादीन् विविधप्रमातृरूपतया, नीलसुखादीनगण्यान् प्रमेयतया स्वरूपानतिरिक्तेनापि सांसारिकविवेचकदृष्ट्याऽतिरिक्ततयैव भासमानेन, स्वरूपानाच्छादकेन, संविद्रूपनान्तरीयकस्वातन्त्र्यमहिम्ना प्रकाशयन् प्रकाशत इति स्वातन्त्र्यवादः स्थापितः।

स्वतन्त्रः परमशिवो महेश्वर एव स्वात्मनः सकाशात् स्वात्मन्येव स्वयैवेच्छया परदशायां स्वाभेदेनाऽहन्तारूपतया स्वस्मिन् वर्तमानं पदार्थजातम्, अपरदशायामन्योन्यावहानेन भेदात्मना निर्भासयन्, भेदेनावभासितानां पदार्थानां कार्यकारणभाव-क्रियाकारकभावादीन् पारस्परिकसम्बन्धांश्चावभासयन् सर्वेषां पारमार्थिकः स्वभाव इति स्वातन्त्र्यवाद्यद्वैतशैवानां सिद्धान्तः।

तत्र विवदिषूणामिमे प्रश्नाः—

(१) समस्तमिदं भावजातं चिद्रूपे भगवति शिवे विश्रान्तमित्येव कथं प्रत्येयम् ?

(२) तदीययैवेच्छया आत्मसंस्थं चेद् भावजातं बहिरवभास्यते, तर्हि स्वात्मन्येवावभास्यत इति कथं संगच्छते ? स्वात्मन्यविभेदेन यद् भासनं तद्विरुद्धं हि बहिरवभासनम्। नहि यद् भासमानं तत्रैव भवति तत्तदन्तर्वर्तित्वदशायामेव तद्बहिर्भूतमिति युक्तं वक्तुम्, घट इव गृहान्तर्भूतस्तद्बहिर्भूतश्चेति ?

(३) बहिर्भूतानामपि पदार्थानां स एव शिव आत्मेति नितरामप्रातीतिकम्, यतो बहिर्भासनं भेदावभासेन व्याप्तम्, शिवात्मत्वं चैषामेकात्मत्वेन तद्विरुद्धेन व्याप्तम्। ततश्च नानात्मानश्चैकात्मानश्चेमे भावा इत्युक्तं कः प्रतीयात् ?

(४) स्वात्मसंस्थं वेद्यवेदकराशिं बहिरवभासयितुं किमर्थमस्येच्छोत्पद्यते ? निष्कारणमेव वा सोत्पद्यते ? द्वितीयविकल्पाभ्युपगमे सततमेव शिवः सेच्छः स्यान्न कदाचिद्वेति स्वातन्त्र्यवादः सर्वथाऽसमञ्जस इति पूर्वपक्षिमतम्।

पूर्वपक्षिप्रश्नसमाधानम्—

(१) शिवात्मन्येव विश्वं विश्रान्तमित्येवं साध्यते। भावानां सत्त्वमसत्त्वं वा निश्चीयमानं संविद्विश्रान्तिमन्तरेण न शक्यते निश्चेतुम्। अतः संविद्विश्रान्ता एव पदार्थाः प्रकाशमाना भवन्तीति सिद्ध्यति। प्रकाशमानता चैषां संविदभेद एव, यतः प्रकाश एव संवित्। एवञ्च प्रकाशादतिरिच्यन्ते च प्रकाशन्ते चेत्युक्ते नीलं स्वरूपाद् व्यतिरिक्तम्, अथ च नीलमित्युक्तिरिव स्यात्। अतः सिद्ध्यतीदं यत् संविद्विश्रान्ता भावाः संविदनधिकवृत्तयः।

(२) तदीययैवेच्छया आत्मसंस्थं चेद् भावजातं बहिरवभास्यते तर्हि स्वात्मन्यवभास्यत इति किम् ? अयं प्रश्न एवं समाधीयते—नहि प्रसेवकादिवाक्षोटादि चिदात्मसंस्थं भावजातं चिदात्मनो निर्गतं बहिर्भासते, अपि तु स एव भगवान् स्वस्वातन्त्र्यादनतिरिक्तामप्यतिरिक्तामिव जगद्रूपतां दर्पणनगरवत् प्रकाशयन् स्थितः। भाववर्गो बाह्यतयाऽवभासमानोऽपि संविन्मये प्रकाश एव विश्राम्यति, अन्यथा प्रकाशेदेव न। अतः सुष्ठूक्तं प्रकाशविमर्शरूपाच्छिवान्निर्गतमपि भावजातं तद्विश्रान्तमेव तस्मिन्नेव भाति। अन्यथा तन्नैव भासेत, प्रकाशविश्रान्तस्यैव भानमिति सिद्धान्तात्।

(३) तृतीयप्रश्नस्योत्तरमिदम्—

स्वातन्त्र्यवादानुसारं प्रकाशविमर्शरूपः शिवो विमर्शरूपयेच्छयैव नीलपीतादिमेयजातं रुद्रक्षेत्रज्ञादि च प्रमातृवर्गमवभासयति। तथा बाह्यतयाऽवभासमानमपि मातृमेयजातं प्रकाशमात्रतां नोज्झति, प्रकाशादतिरिक्तस्य तृणमात्रस्याप्यप्रकाशनप्रसङ्गात्।

तदेवंभूतं निर्भासमानं कथमपह्नूयतामिति विरोधोऽपि नात्र कश्चित्। यदि हि नील-मनुज्झितनीलप्रकाशभावमेवानीलप्रकाशतया निर्भायात् को नीलानीलयोर्विरोधवैधुर्यमुद्घोषयेत्। न चेदमप्रातीतिकम्। स्वप्ने योगिसृष्टौ च प्रमात्रैकात्मान एव भावाः प्रमातृबाह्यतया वैचित्र्येणा-वभासन्ते, अथ च प्रमातृविश्रान्ता एव भान्ति। तदिदमेव भगवतः स्वाच्छन्द्यं यत्संविदात्मक-विचित्रप्रमातृप्रमेयात्मना संविद्रूपानधिकेनापि संविद्रूपाधिकतया निर्भासमानवपुषा प्रकाशते, तथा विमृशति च।

(४) निष्कारणमेव स्वात्मसंस्थभावजातबहिश्चिकीर्षोद्गमस्वीकारे सदैव शिवः सेच्छः स्यान्न कदाचिद्वेत्याक्षेपप्रतिक्षेप एवम्—

नास्मिन् सिद्धान्ते कालः कश्चन नित्यद्रव्यरूपस्तन्निर्माणानपेक्षः स्वतन्त्रः, यदवलम्बने-नायमाक्षेपः शक्यः कर्तुम्। कालो ह्यस्मिन् सिद्धान्ते त्रिविधः—शक्तिरूपः, परिमितप्रमातृ-कञ्चुकरूपः, सूर्यादिपरिस्पन्दरूपश्च। अन्त्यश्चास्मिन् सिद्धान्ते क्रियावैचित्र्याभासरूप एव। यथाह—

मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः॥ इति।

सर्वश्च क्रमश्चित्राभासकृतः प्रभोः कालाख्यया शक्त्या आभास्यते। यथाह—

क्रमो भेदाश्रयो भेदोऽप्याभाससदसत्त्वतः।
आभाससदसत्त्वे च चित्राभासकृतः प्रभोः॥ इति।

एवञ्च कालशक्त्यवभास्यः कला–नियति–राग–विद्या-कालाख्यपरिमितप्रमातृकञ्चुकमध्य-पतितकालाख्यपारिमित्यकारणग्राह्यत्वात् परिमितप्रमातृलग्नतयैव भवन् तद्विषयीकरणीयभावनिष्ठः क्रम एव कालः। तथा च सूर्यादिनिष्ठो नियतो यः क्रियावैचित्र्यरूपो क्रमः, स एव कालः। सुप्रसिद्धमिदं यन्नियतपरिमाणेन परिवर्तकादिना हेम मीयते। तथैव प्रसिद्धपरिमाणया अर्कोदया-ऽस्तमय्या क्रियया चैत्रगमनम्। यथोच्यते 'दिवसं चैत्रो गच्छति' इति।

योऽपि वैशेषिकाणां द्रव्यरूपः, कापिलानां रजःस्वभावः प्रवर्तनात्मकत्वात्, वैयाकरणानां नित्यानाश्रितप्रवृत्तिस्वभावः, सौगतानां सन्तन्यमानभावैकपरमार्थः, सोऽपि वस्तुतः क्रमरूपतां

नातिक्रामतीति क्रम एव नाम बहिः काल इति व्यवह्रियते। यत्रापि कारणे कालाख्येत्युच्यते तत्रापि दिवसे जातो मध्याह्ने जात इत्यर्कसञ्चारक्रमस्यैव कारणताप्रतीतिः सिद्धा, न तु नित्यद्रव्यात्मनः परिनिष्ठितरूपस्य कस्यचित्। द्रव्यमपि तत् प्रवहणधर्मकमेव नवपुराणतारूपपरत्वापरत्वतद्वैचित्र्योत्थापकमिति चेत्, तर्हि पुनरपि क्रमरूपतैवास्य व्यवतिष्ठते, न रूपान्तरतेति क्रम एव कालः। अतो वेद्य एव कालावस्थितिर्न संविदि। ज्ञानेऽपि वेद्यांश एव कालो न स्वसंवेदनांशे, न च विमर्शरूपशब्दनांशे। तदुक्तम्—

सक्रमत्वं च लौकिक्याः क्रियायाः कालशक्तितः।
घटते न तु शाश्वत्याः प्राभव्याः स्यात् प्रभोरिव॥ इति।

एवं कालो देशो वा वेद्यराशिपतितो वेद्यत्वादेव संवित्तादात्म्यमभिधावन् न संविदं भेदयितुं शक्तः। अतः सर्वदा सेच्छः स्यात् कदाचिदपि वा नेति न शक्यते वक्तुम्। स्वातन्त्र्येणैव कारणानपेक्षत्वस्य व्यज्यमानत्वादनुत्थानोपहतश्चायं प्रश्नः।

आभासवादः

आभासशब्दोऽद्वैतवेदान्तसाहित्येऽपि बहुशः प्रयुज्यते, परन्त्वेष शब्दः काश्मीराद्वैतशैवसाहित्ये वेदान्तस्वीकृतार्थाद्भिन्नेऽर्थे प्रयुज्यते। वेदान्तिनये आभासः सदसद्भ्यामनिर्वचनीयया मायया कल्पितो जडया मायया कल्पितत्वाज्जडस्तत्त्वान्यत्वाभ्यामनिर्वचनीयश्च। नहीश्वरत्वेन स निर्वक्तुं शक्यते, जडाजडयोरभेदायोगात्। नापि तदन्यत्वेन शक्यनिर्वचनः, स्वातन्त्र्येण तस्य सत्तास्फूर्त्यसम्भवात्। नहि जडमजडानपेक्षं सत्तास्फूर्तिमदभ्युपगन्तुं शक्यते, जडत्वभङ्गप्रसङ्गात्।

मिथ्याज्ञानार्थेऽप्याभासशब्दः प्रयुज्यमान उपलभ्यते, यतः शुक्तौ रजतभ्रमे 'अविद्या' रजतरूपार्थाकारेण रजतज्ञानाभासाकारेण च परिणमत इति वेदान्त्यभ्युपगमः। तथा च प्रतिबिम्बार्थेऽप्ययं शब्दः प्रयुज्यते। यथा—

बुद्धितत्स्थचिदाभासौ द्वावपि व्याप्नुतो घटम्।
तत्राज्ञानं धिया नश्येदाभासेन घटः स्फुरेत्॥ इति।

एवञ्च वेदान्तिनये प्रतिबिम्बादिवदवास्तवरूपमविद्याकार्यं मृषाबुद्धिश्चाभासः। अयं शब्दो वैभाषिक-वैशेषिक-पारमर्ष-सौत्रान्तिक-योगाचारविज्ञाननयेषु साधारणो यथायोगं तदौन्मुख्य-तत्प्रकाश-तत्प्रतिबिम्ब-तदुल्लेखेषु प्रयुक्तः।

परन्त्वद्वैतशैवनये सङ्कोचरूपेषदर्थकादाङुपसर्गपूर्वकात् प्रकाशापरपर्याय-दीप्त्यर्थाद् भास्-धातोर्घञन्तान्निष्पन्न आभासशब्दः परिच्छिन्नप्रकाशरूपे यौगिक एवार्थे प्रयुज्यते आभासवादविचारे। एतदर्थं केषुचित् स्थलेषु 'अवभास'शब्दोप्यवरतया निकर्षेणापूर्णतया भासमाने नीलादिविषये प्रयुज्यते। एवञ्च यत्किञ्चिदपि बाह्येन्द्रियग्राह्यमन्तःकरणग्राह्यं वा, यच्चान्तःकरणबहिष्करणव्यापार-विरतौ सुषुप्तमूर्च्छादौ भाति, यच्च परिच्छिन्नप्रमात्रा न शक्यते ग्रहीतुमतश्च समाधिमात्रगम्यम्, यत्किञ्चिदप्यस्ति, यस्य केनापि प्रकारेण सत्ताऽनुभूयते, यद्विषये च कथमपि शब्दव्यापारः सम्भवति, तद्विषयरूपं विषयिरूपं ज्ञानकरणरूपं ज्ञानरूपं वा सर्वमाभासः। एवं स्थिते शिवादिधरण्यन्तस्य षट्त्रिंशत्तत्त्वव्रातस्येश्वरप्रत्यभिज्ञायां प्रतिपादितस्याभासरूपता। यथाह—

निराभासात् पूर्णादहमिति पुराभासयति यद्
द्विशाखामाशास्ते तदनु च विभङ्क्तुं निजकलाम्।
स्वरूपादुन्मेषप्रसरणनिमेषस्थितिजुषस्
तदद्वैतं वन्दे परमशिवशक्त्यात्म निखिलम्॥ इति।

इदमत्रावधेयम्—यद्यप्युत्पलाचार्य ईश्वरप्रत्यभिज्ञाकारिकायां तद्वृत्तिटीकयोश्च, एवं तदनुसार्यभिनवगुप्तपादो विमर्शिनी-विवृत्तिविमर्शिन्योस्तथा च षट्त्रिंशत्तत्त्वसन्दोहादिष्वपरेषु ग्रन्थेषु षट्त्रिंशत्तत्त्वान्येव प्रतिपादितवन्तौ, तथापि सोमानन्दः शिवदृष्टौ, तथैव चाभिनवगुप्त-पादस्तन्त्रालोक-परात्रिंशिकाविवृत्यादिग्रन्थेषु सप्तत्रिंशं परशिवाऽनुत्तरादिशब्दद्योत्यं स्वीकृतवन्तौ। न च सप्तत्रिंशं तत्त्वमुत्पलाचार्यस्याऽनभिमतमासीत्, यतः स स्वयमेवेश्वरप्रत्यभिज्ञाकारिकां शिव-दृष्ट्यनुसारिणीं प्राह—

इति प्रकटितो मया सुघट एष मार्गो नवो
गुरुभिरुच्यते स्म शिवदृष्टिशास्त्रे यथा॥ इति।

परन्तु शैवाद्वैते प्रविभागदृष्ट्या परतत्त्वस्य रूपद्वयं स्वीक्रियते, विश्वोत्तीर्णं विश्वमयञ्च। न च तयोः पार्थक्यं कथञ्चन। विश्वोत्तीर्णतायामपि विश्वरूपता विश्वरूपतायां चापि विश्वो-त्तीर्णताऽविच्छिन्नतयैवास्ते। एतच्चाग्रे वितनिष्यते। विश्वमयस्वरूपप्रतिपादनमात्रपरेणोत्पला-चार्येण सप्तत्रिंशं तत्त्वं न संकीर्तितम्। यथाह —

'सर्वभूतस्थम्' इत्यन्तोऽयमद्वयोपदेशो मन्तव्यः। एवं सर्वभागे प्रकाशभागे च स्थिते गुणप्रधानताकृतं संसारासंसाररूपत्वं प्रतिपादितम्। गलिते तु समस्ते भेदलेशे परमशिवता दशा इह न वितानिता, तावत् सर्वात्मरूपतामुखेन तत्प्रत्यभिज्ञानोपक्रमात्।

(ई० प्र० वि० वि० भा० १ पृ० ४७)

विश्वोत्तीर्णोऽनुत्तर इति परः शिव इति चोच्यते। अद्वैतशैवनये जगदुत्पत्तिसिद्धान्तः परमार्थानुभवसिद्धान्तात् प्रमाणसिद्धान्ताच्च कथमपि न भिन्नः। यस्मादेव तत्त्वाज्जगदुद्भवस्तदेव तत्त्वं मोक्षे भाति, तन्निर्भरमेव च ज्ञानस्मृत्यादि। जगदुद्भावकतत्त्वस्य न किमपि क्षीयते जगदुद्भावने, नापि तस्माद् बाह्यं किमप्यनिर्वचनीयं वेदान्तिनयेऽन्ततो विनाशिनी मायेव भासमानजगत्कारणम्। यतो मोक्षो न मायानाशादपि तु मायोत्तीर्णत्वात्। परं तत्त्वं च न मोक्ष एव भाति, अपि तु साधारणस्यैन्द्रियकानुभवस्य सम्यग् विश्लेषणे क्रियमाणे समग्रज्ञानाग्रज्ञातृस्पर्शदशासु तथा तत्फले स्फुटं लक्ष्यते। यदाह —

न परं तदवस्थायां व्यवस्थैषा व्यवस्थिता।
यावत् समग्रज्ञानाग्रज्ञातृस्पर्शदशास्वपि ॥
स्थितैव लक्ष्यते सा च तद्विश्रान्त्या तथा फले। (शि० दृ० ७) इति।

तच्चैवम्—

शैवाद्वैते शक्तिशक्तिमतोरभेदः। यथाह —

न शिवः शक्तिरहितो न शक्तिः शिववर्जिता।
तादात्म्यमनयोर्नित्यं वह्निदाहकयोरिव ॥ इति।

यथा वैयाकरणनये। यथाह—

"तत्स्वरूपत्वेनाऽव्याहता नित्या अपि यस्य कलाः शक्तयः" (वा० प० टी० १-३) इति।

तच्चैक्यं सर्वशक्तिसामरस्यरूपम्। यथैव विभावानुभावव्यभिचारिस्थायिनां पानकरसन्यायेन सामरस्यरूपः सहृदयप्रेक्षकानुभूयमानो रस एकः, तथैव सर्वशक्तिसामरस्यात्मकः परः शिव एक एव परं तत्त्वम्। स च प्रकाशविमर्शात्मा, स्वप्रकाशः, स्वप्रकाशविश्रान्तः, परानपेक्षः, सर्वशक्तिसामरस्यतया पूर्णः, पूर्णत्वात् स्वप्रकाशस्वरूपविश्रान्तत्वाच्चानन्दरूपो विश्वोत्तीर्णः परः शिवः, स्वस्वरूपभूतायाश्चितः स्वस्वरूपविश्रान्तिलक्षणस्य चानन्दस्यैक्यं द्योतयितुमानन्दापरपर्यायान्निर्वृतिशब्दान्नित्ययोगद्योतकमत्वर्थीयाऽच्प्रत्ययान्तान्निष्पन्नेन 'निर्वृत'शब्देन स्वप्रकाशा-

परपर्यायचिच्छब्दसमस्तेन वृत्तौ पदार्थानामेकीभावाच्चिन्निर्वृत्योः प्रकाशानन्दयोरत्यन्ताविमेकार्थीभावं च द्योतयता 'निर्वृतचित्'शब्देनाभिधीयते। स च शक्तिरूपेणात्मसात्कृतसमस्तवेद्यार्थतया विभुः, ततः पृथक्सत्ताकस्य कस्याप्यभावात् पूर्णः, कालस्य विश्वरूपतायां तदवभासितनियतक्रमसूर्यादिसञ्चाररूपतया परिमितप्रमातारं प्रत्येव भासमानतया कालानवच्छिन्नो नित्यः, अहमिति सहजप्रत्यवमर्शात्मप्रकाशस्वरूपः, चिदानन्दमात्रानुभवस्तल्लयश्च।

परशिव-परब्रह्मणोः पारस्परिको भेदः

अद्वैतवेदान्तिभिरपि सच्चिदानन्दं ब्रह्मेति ब्रह्मणः स्वरूपलक्षणमुच्यते। "मूर्तिक्रियाविवर्तावविद्याशक्तिविलसितमात्रम्" (ई० प्र० वि० वि० भाग ३ पृ० १४) इत्यादि च वदद्भिर्नियतक्रमक्रियावैचित्र्यरूपस्य कालस्य मायाशक्तिविलसितरूपत्वं स्वीकुर्वद्भिर्मायोत्तीर्णं ब्रह्म न कालः कलयितुं शक्नोतीति कालानवच्छिन्नतया नित्यं मन्यते।

साधारणतो वेदान्तिनां विशेषतः शाङ्करवेदान्तिनामुपरि बौद्धदर्शनस्य महान् प्रभावः। ते शून्यवादिभिर्बौद्धैरभ्युपगतं परमार्थसत्यं संवृतिसत्यमसत्यमिति प्रविभागमनुसरन्तस्त्रिविधं सत्त्वम्—परमार्थसत्त्वम्, व्यावहारिकापरपर्यायमर्थक्रियासामर्थ्यं सत्त्वम्, प्रातिभासिकं च सत्त्वं स्वीकुर्वन्ति। एवञ्च नागार्जुनेतिप्रसिद्धस्य बौद्धविदुषः—

सर्वालम्बनधर्मैश्च सर्वतत्त्वैरशेषतः।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः॥

इति मतेन प्रभाविताः स्वाभ्युपगतमोक्षेतरावस्थानुभूतसर्वपदार्थाऽभावरूपमेकमेवाद्वितीयं ब्रह्म प्रतिपादयन्तस्तदनुकूलमेवौपनिषदवाक्यानि सङ्गमयन्तो ब्रह्मणः संसारस्य च सत्यतायां स्वीकृतायामेकत्वज्ञानेन नानात्वज्ञानापनोदस्यायुक्तत्वात् शुक्तौ ज्ञातायां तत्र प्रतिभातस्य रजतस्येव ब्रह्मज्ञाने संसारदशानुभूतसर्वपदार्थानां समूलमात्यन्तिकं ध्वंसं मन्वाना ब्रह्मेतरस्य सर्वस्यापि मिथ्यात्वं स्थापयन्तः शून्यं लक्षयद्भिर्बौद्धैः प्रयुक्ताम्—

"तत्त्वं सदसदुभयानुभयात्मकचतुष्कोटिविनिर्मुक्तं शून्यमेव"

इति भाषां विचारसरणिं चोपाददानाः संसारकारणं सदसद्भ्यामनिर्वचनीया मायेति वदन्तः—

"ब्रह्म सत्यं जगन्मिथ्या"

इति सिद्धान्तमुद्घोषयन्ति । अत एवाभिनवगुप्तपादः—

"वेदान्तिनः शून्यवादाविदूरवर्तिनः" इत्युल्लिखितवान्, तदनुसारिणा च रामानुजाचार्येण "शङ्करः प्रच्छन्नबौद्धः" इत्युक्तम् ।

वेदान्तनये एकं ब्रह्म एव सत्, ब्रह्मण एव सत्तालक्षणः स्वभावः, नान्यत्किञ्चित् परमार्थतोऽस्ति, कस्याप्यन्यस्य परमार्थानुभवेऽस्तित्वाभावात् । व्यावहारिकाणां सर्वेषां वस्तूनामस्तित्वं ब्रह्मपरिणामवादिनः पुरुषाणां पार्थिवत्वस्वभावस्य केशनखादिष्विव ब्रह्मणः सत्तालक्षणस्य स्वभावस्याकाशादिष्वनुवर्तनादिति मन्यन्ते । परन्तूत्कृष्टा वेदान्तिनः—

कृपणधीः परिणाममुदीक्षते
क्षपितकल्मषधीस्तु विवर्तताम् ॥

इत्युद्घोषयन्तो घटः सन्, घटो भवति, घट इष्ट इत्यादिलौकिकव्यवहारः सच्चिदानन्दब्रह्मैक्याध्यासादिति घटादीनामस्तित्वमध्यासमात्रादिति मन्वानाः—

अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥

इति स्वीकुर्वन्ति । एवं चानुभूयमानानां सर्वेषां पदार्थानां शुक्तौ भासमानस्य रजतस्येव काल्पनिकतया, कल्पितस्य च—

"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः"

इति योगनयानुसारमवस्तुत्वात् सति ब्रह्मण्यध्यस्यमानत्वात्तस्य चाधिष्ठानपरमार्थत्वादवस्तुसत्त्वमभ्युपगम्यते वेदान्तिभिः । तथा हि—ये दृष्टनष्टस्वरूपा न ते परमार्थसन्तः, यथा मृगतृष्णिकोदकादयः, तथा च सर्वं विकारजातम्, तस्मादवस्तुसत् । इदञ्च पूर्वोक्ताभिः सर्वशून्यत्वसाधनाय प्रयुक्ताभिः शून्यवादियुक्तिभिः साध्यते । तथा हि–सत्स्वभावं चेद्विकारजातं कथं कदाचिदसत्, अथाऽसत्स्वभावं कथं कदाचित् सत्, सदसतोरेकत्वविरोधात् । सदसत्स्वभावत्वं तु सदसतोः पारस्परिकविरोधान्न शक्यतेऽभ्युपगन्तुम् । अतश्च विकारजातं न वस्तुसत्, ततश्चानिर्वचनीयमनृतञ्च, अनिर्वचनीययाऽज्ञानरूपया मायया कल्पितत्वात् । अतः सत्त्वमबाधितत्वममृषात्वं सत्यत्वं वा, अत एव ब्रह्मविषये सत्यशब्दोऽपि प्रयुज्यते—

"सत्यं ज्ञानमनन्तं ब्रह्म" इत्यादौ ।

अस्मादेतत् स्फुटीभवति यद् ब्रह्मणः स्वरूपलक्षणे प्रयुक्तश्चिच्छब्दो ज्ञानापरपर्यायः । यद्यपि प्रत्यक्षस्थले वृत्तिविशिष्टं चैतन्यं ज्ञानमिति स्वीक्रियते, एवञ्च—

"ज्ञानं ज्ञानान्तरवेद्यं न भवति"

इति न्यायात् स्वप्रकाशत्वं तस्योरीक्रियते, तथापि वृत्तीनामागमापायित्वेनावस्तुत्वात् सर्ववृत्तिविरहितं स्वप्रकाशतत्त्वमेव 'चित्'शब्देनोच्यते । अतः—

"चित्त्वं स्वप्रकाशत्वम्"

इति वेदान्तसिद्धान्तः । घटादेरिव प्रदीपेन, ब्रह्मणः केनचित् प्रकाश्यत्वाभावात्, सूर्यादिवच्च स्वयंप्रकाशत्वात् । 'चित्'शब्दस्थाने क्वचन 'चैतन्य'शब्दोऽपि प्रयुज्यते, वेदान्तनये ज्ञानं चैतन्यं ब्रह्मेत्याद्यनर्थान्तरमित्याद्युक्तेः ।

तृतीयः 'आनन्द'शब्दो ब्रह्मणः स्वरूपलक्षणे प्रयुक्तो भारावतरणन्यायेन दुःखाभावद्योतकः । दुःखाभावश्च द्विविधः—यत्किञ्चिद्दुःखाभावः, यावद्दुःखाभावश्च । आद्यः संसारदशायाम्, द्वितीयस्तु मोक्षावस्थायामिति साधारणतया वेदान्तिमते यावद् दुःखाभाव एवानन्दः । निरतिशयसुखापरपर्यायत्वेनाऽप्येष शब्दः प्रयुज्यते । सुखं हि द्विविधम्—सातिशयं निरतिशयं च । आद्यं विषयानुषङ्गजनितान्तःकरणवृत्तितारतम्यकृतानन्दलेशाविर्भावरूपम् । एतदर्थमपि क्वचनानन्दशब्दः प्रयुक्त उपलभ्यते । यथा—

"शुभकर्मजन्यवृत्तिव्यक्तं चैतन्यमानन्दः" (वे० सू० २०८) इति । अपरं तु ब्रह्मैव ।

"रसो वै सः, रसमेवाऽयं लब्ध्वा आनन्दीभवति । को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्, एष एव ह्यानन्दयाति" (तै० २-७) इत्युपनिषद्वाक्यानुसारं 'रस'शब्दोऽप्यानन्दापरपर्यायत्वेन गृह्यते । परन्तु वेदान्तनयमाश्रित्येमां श्रुतिं व्याचक्षाणैः पण्डितराजजगन्नाथै रसस्वरूपमेवं प्रतिपादितम्—

"वस्तुतस्तु वक्ष्यमाणश्रुतिस्वारस्येन रत्याद्यवच्छिन्ना भग्नावरणा चिदेव रसः" इति ।

अस्मिन् व्याख्याने स्वीक्रियमाणे न भवति रसस्यानन्दापरपर्यायत्वम्, अपि तु ततः किमपि वैलक्षण्यम्, रत्याद्यवच्छिन्नत्वस्याभ्युपगमात् । रसव्याख्याने चाभिनवगुप्तपादमतमेवमुपन्यस्तं पण्डितराजैः—

"इत्थं चाभिनवगुप्तमम्मटभट्टादिग्रन्थस्वारस्येन भग्नावरणचिद्विशिष्टो रत्यादिः स्थायीभावो रसः" इति।

एतच्चाभिनवगुप्तपादमतमबुद्ध्वैव लिखितमिति स्पष्टीकृतं मया स्वीय-'कम्पेरेटिव् ईस्थेटिक्स्'-इत्याख्यपुस्तकस्य प्रथमभागे। न संभवतीदं मतमभिनवगुप्तपादस्य, यतः स निर्विशेषाद्वैतापरनामस्वातन्त्र्यवादी। निर्विशेषाद्वैतिनश्चायमभ्युपगमः—

"ग्राह्यत्वग्राह्यत्वाऽयोगान्न तेन (आत्मतत्त्वेन) तुल्यकक्ष्यतया परं किञ्चन चकास्ति। तुल्यकक्ष्यताप्रतिभासकृतश्च गुणभावप्रधानभावाभ्यां धर्मधर्मिभाव-विशेषणविशेष्यभावोपधानोपधेयभावादिव्यवहारः। एवञ्च विशेषणविशेष्यभावमुखेन यो व्यवहारः स आत्मनि नोपपद्यत इति नासौ कस्यचिद् धर्मः, नापि तस्य कश्चिद् धर्मः।" (ई० प्र० वि० भाग १—१४७) इति।

रसस्यानन्दरूपता त्वभिनवगुप्तनये न साधारणीकृतस्य स्थायिनः साधारणीभूतेन सहृदयेनानुभूयमानतादशायाम्, अपि तु तदुत्तीर्णत्वे। तथा हि—अभिनवगुप्तपादो रसशब्दमर्थद्वये प्रयुङ्क्ते। (१) रस्यते आस्वाद्यत इति रसः, तथा च साधारणीभूतेन सहृदयेन आस्वाद्यमानः साधारणीभूतः पानकरसन्यायेन स्थाय्यादीनां परस्परसंमिश्रणोत्थो रसो रस्यमानत्वाद्रस इत्युच्यते। अस्मिन्नर्थे रसस्य विषयरूपता।

(२) रसनं रसः, अस्मिन् विग्रहे तु क्रियमाणे रसो न विषयरूपः, अपि तु क्रियारूपः। एवं च रसना, चर्वणा, निर्वृतिः, प्रमातृविश्रान्तिः, चमत्कृतिरित्याद्यपरपर्यायैरुच्यते। प्रमातृविश्रान्तिः, स्वात्मविश्रान्तिरेवानन्दः। एवं चानन्दरूपता रसस्य न विभावादीनां सामरस्यतया रस्यमानतादशायाम्, अपि तु तदुत्तीर्णत्वे स्वात्ममात्रपरामर्शदशायाम्। यथाह—

"लोके सकलविघ्नविनिर्मुक्ता संवित्तिरेव चमत्कार-निर्वेश-रसना-आस्वादन-भोगसमापत्ति-लय-विश्रान्तिशब्दैरभिधीयते" (अ० भा० भाग १ पृ० २८१) इति।

आनन्दशब्दस्य सुखापरपर्यायत्वेन साधारणतः प्रयुक्तस्य परमानन्दाद् भेद इत्थं प्रदर्शितः—

"देहादिसंकोचकलुषाऽपरिपूर्णप्रत्यगात्माऽहंभावनिष्ठत्वेन शरीरस्य रिक्ततया क्षुधातुरस्य व्यतिरिक्तान्नाभिलाषविवशीकृतमतेरात्मपरामर्शोऽयमेकघनवृत्त्या यतो न संभवति, ततोऽयमनानन्द इवास्ते।......

यदा त्वन्नपरिपूर्णजठरताऽस्य, तदा तद्रिक्ततोद्रेकरूपा तावदपूर्णता नष्टा। संस्काररूपतया तु तदानीं यदभिलषणीयं कान्तालिङ्गनादि परामर्शनीयं स्थितम्.....'तद्योगादपूर्णोऽयमानन्द इति परमानन्दो न भवति। सांसारिकश्च सर्वोऽस्यानन्दः—"लाभे भाविवियोगभीरुः" इति, "विषयो विषयान्तरार्थितां जनयन् वा जनयेत् कथं सुखम्" इति च न्यायेन व्यतिरिक्ताकाङ्क्षा—विच्छेदमयतां सर्वात्मना न स्वीकुरुत इति ततोऽप्यपूर्ण एव। यस्तु तत्राप्यानन्दांशः, तत्र स्वात्मपरामर्शरूपितैव प्रयोजिका। तत एवोक्तम्—

त्रैलोक्येऽप्यत्र यो यावानानन्दः कश्चिदीक्ष्यते।
स बिन्दुर्यस्य तं वन्दे देवमानन्दसागरम्॥ इति।

........'मधुरादिरसास्वादे तु विषयस्पर्शव्यवधानम्, ततोऽपि काव्यनाटकादौ तद्व्यवधानशून्यता, तद्व्यवधानसंस्कारानुवेधस्तु (वर्तत एव), तत्रापि तु तथोदितव्यवधानांशतिरस्क्रियासावधानहृदया लभन्त एव परमानन्दम्।" (ई० प्र० वि० वि० भा० २-१७८-९) इति।

अतो रसास्वादस्य परकोटौ संवेदनस्यैकघनस्यास्वाद्यमानत्वादानन्दरूपता सर्वरसानामिति शैवाचार्याऽभिनवगुप्तपादसिद्धान्तः। यथाह—

"अस्मन्मते तु संवेदनमेवैकघनमास्वाद्यते। तत्र का दुःखाशङ्का।" (अ० भा० भाग १-२१६) इति।

अस्मिन् व्याख्याने स्वीक्रियमाणे "समानकर्तृकयोः पूर्वकाले क्त्वा" इति सूत्रानुसारं प्रयुक्तः पूर्वोक्तोपनिषद्वाक्ये 'लब्ध्वा' इति शब्दे क्त्वाप्रत्ययः संगच्छते।

इदञ्च वेदान्तनये न संगच्छते, वेदान्तिभिर्ब्रह्मणो निर्विमर्शस्वप्रकाशमात्रत्वस्य स्वीकरणेन स्वप्रकाशमण्यादिवत् स्वात्मपरामर्शशून्यत्वमभ्युपगच्छद्भिर्जडब्रह्मवादस्य स्थापितत्वात्।

न चाद्वैतशैवनये 'अहम्' इति स्वात्मपरामर्शरूपविमर्शस्वीकारे परतत्त्वस्य विकल्पतापत्तिः, "साऽभिलापं विकल्पाख्यम्" इति नयेन विकल्पस्याभिलापयोजनारूपत्वात्, प्रकृते च 'अहम्' इत्यभिलापयोगस्य स्वीकृतत्वात्। मैवं भ्रमितव्यम्। यतो न विकल्पलक्षणं तत्र संगच्छते। विकल्पो हि "द्वयाक्षेपी विनिश्चयः"। विविधा कल्पना, एकस्यापि विविधत्वेन च शङ्कितस्य कल्पोऽन्यव्यवच्छेदनं विकल्पः। अतश्च विकल्पेऽवश्यं तदतद्रूपद्वयेन भवितव्यम्। अन्यथा किं योज्येत, किं विभज्येत, किञ्च शङ्क्येत। एवंविधश्च विकल्पो मायापद एव सम्भवति, यतस्तत्र घटाघटौ भिन्नौ प्रकाशेते। एवञ्च तदतत्प्रतिभाभाजा

संकुचितप्रमात्रा घटप्रत्ययावसरेऽतदोऽघटरूपस्यान्यस्य घटदेशे संभाव्यमानतया समारोपितस्य निषेधलक्षणोऽपोहः क्रियते। तदनुप्राणिता च विकल्परूपता 'घट एवायं न पटः' इत्येतस्य निश्चयस्य, एवार्थस्य संभाव्यमानाऽपरवस्तुनिषेधरूपत्वात्। एष एव परितश्छेदनात् तक्षणकल्पात् परिच्छेद उच्यते।

एवं विकल्पस्य स्वरूपे निर्धारिते 'अहम्' इति यः शुद्धो विमर्शस्तस्य विकल्परूपता न कथमपि शक्यते समर्थयितुम्। यतो योऽयं विमर्शात्मप्रकाशरूपः परतत्त्व-परशिव-अनुत्तरादि-शब्दव्यपदेश्यः, तस्य स्थाने यः संभाव्यते स तावदप्रकाशरूपो न शक्यतेऽभ्युपगन्तुम्, तुल्यकक्ष्यस्यैव हि संभाव्यमानत्वं भवति। न चाप्रकाशस्य प्रकाशेन सह तुल्यकक्ष्यताऽभ्युपगमो युक्तियुक्तः, प्रकाशाप्रकाशयोरत्यन्तविरुद्धत्वात्। पटादिरूपस्याघटस्य तु नं घटेन सह प्रकाशाप्रकाशयोरिवात्यन्तिको विरोधः, उभयोरप्येकेन्द्रियग्राह्यत्वेन सत्त्वेन च तुल्यकक्ष्यत्वात्। अभ्युपगम्यमानेऽपि प्रकाशाप्रकाशयोस्तुल्यकक्ष्यत्वे संभावनाबलादारोपणबलाच्चाप्रकाशस्याप्रकाशरूपत्वं विघटेत। नहि संभावयिता अरोपयिता वा प्रमाताऽप्रकाशमानस्य संभावनामारोपणं वा कर्तुं शक्नोति। अतः प्रकाशतुल्यकक्ष्यस्यान्यस्याप्रकाशस्यापोहनात्मकव्यापारसहिष्णोरवभासमानत्वाभावादहंपरामर्शस्यापोहनव्यापारनिर्भरं न शक्यते विकल्परूपत्वं वक्तुम्। शुद्धाहंपरामर्शातिरिक्तस्य संभाव्यमानतायामभ्युपगतायामपि—

प्रागिवार्थोऽप्रकाशः स्यात् प्रकाशात्मतया विना।
न च प्रकाशो भिन्नः स्यादात्माऽर्थस्य प्रकाशता॥

इति नयेन तस्यापि प्रकाशमानतास्वीकारस्यानिवार्यत्वेन परप्रकाशस्य स्वरूपे देशकालभेदाभावाद् भिन्नतया संभाव्यमानस्यापि तदेकरूपत्वादपोह्यस्य द्वितीयस्याभावान्न संभवति विकल्परूपता शुद्धाऽहंपरामर्शस्य।

अहंपरामर्शद्वैविध्यम्

अहंपरामर्शो द्विविधः, शुद्धोऽशुद्धश्च। पूर्वः परतत्त्वरूपः, एवं च पूर्वोक्तयुक्त्या निर्विकल्परूपः। अपरस्तु परिमितप्रमातृनिष्ठः, एवं च तदपेक्षया द्वितीयस्य परिच्छिन्नस्यापोह्यस्य सत्त्वाद् विकल्परूपः।

इदमत्रावधेयम्—यथा वैयाकरणनये 'अल्' इति प्रत्याहारान्तर्गताः सर्वे स्वरा व्यञ्जनाश्च, न च ततो बाह्यस्तदवच्छेदकश्च कोऽपि वर्णः; तथैव 'अहम्' इति शब्दे 'अह्' इत्यंशोऽकारादारभ्य

हकारपर्यन्तवर्णमालाद्योतितं सर्वमपि भावजातमभिधत्ते । 'अम्' इत्यंशश्च सर्वेषां बिन्दुवद-भेदेनावस्थानम् । यदाहाभिनवगुप्तपादाचार्यः—

"अनुत्तराद् आदिवर्णादानन्दादिपरामर्शान्तराविर्भावकारित्वाच्छक्तिस्वरूपिणी या हान्ता प्रसृतिः, हकारपर्यन्तेन स्थूलेन रूपेण स्फुरन्ती, सैव पुनः—

"आदिरन्त्येन सहेता" (पा० २।२।७२)

इति नीत्याऽकारहकारात्मना रूपेण प्रत्याहृतं गर्भीकृतमशेषमानन्दाद्यमृतबीजपर्यन्तं विश्वं यया तथाभूता सती, अनुत्तरे निर्विभागप्रकाशात्मनि परस्मिन् रूपे, निलीयते विश्राम्यति येन 'अहम्' परामर्शो जायते" इत्यादि तन्त्रालोके तृतीयाह्निके द्विशततमश्लोकादारभ्य पञ्चाधिक-द्विशततमश्लोकपर्य्यन्तम् ।

एवंरूपः शुद्धाहंपरामर्शो विमर्शशब्देनाप्यभिधीयते । विमर्शश्च परावाग्रूपः शैवनये । यथाह—

चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥ इति,

"एवञ्च विमर्शनं परावाक्शक्तिमयम्" (भां० भा० १, २६४) इति च । विमर्शाऽपर-पर्याया च परा वाक् शैवागमानुसारिभिर्नागेशभट्टादिभिर्वैयाकरणैः स्वीकृतैव, यस्यां नास्ति विकल्पत्वलेशः केषाञ्चनापि मत इति शुद्धाऽहंप्रत्यवमर्शस्याऽविकल्परूपत्वं निर्विवादम् ।

भर्तृहरिनये परतत्त्वस्यान्तःकृतानन्तविश्वरूपता प्रकाशविमर्शमयता च

भर्तृहरिर्न केवलं काश्मीरशैवाद्वैतसाधारणं स्वातन्त्र्यवादमपि त्वद्वैतशैवागमप्रतिपादितान् अन्यानपि बहून् सिद्धान्तान् अनुसरति । तेषु द्वावेव प्रकरणसंबद्धाविह प्रदर्शनीयौ ।

(१) भर्तृहरिनये ब्रह्मणोऽन्तः सकलोऽपि विकारग्रामस्तदेकीभावेन पारस्परिकभेद-विरहेण सृष्टेः प्रागवतिष्ठते । इयं खलु ब्रह्मणः संवर्तावस्था । विवर्तावस्थायां तु तत एव सकलमेव चराचरं प्रथमत उत्पद्यते । प्रथममनाकृतं रूपम्, द्वितीयं तु व्याकृतं रूपम् । द्वयमपि क्रमशो विद्याऽविद्यारूपतच्छक्तिप्रभावात् । यथा स्वप्नावस्थायामेक एव ज्ञानक्षणो भिन्नजातीयाऽनेक-पदार्थावभासी जायते, तथैव संवृतं ब्रह्म विवर्तेऽनेकपदार्थावभासि जायते । अतो भर्तृहरिनये संवृते ब्रह्मणि तदेकात्मतया विद्यमानं भावजातं सृष्टिकाले परस्परविविक्तं भासते स्वीयाऽविद्या-शक्तिबलात् । यथाह स्ववृत्तौ—

"तत एव हि शब्दाख्यादुपसंहृतक्रमाद् ब्रह्मणः सर्वविकारप्रत्यस्तसमये संवर्तादनाकृतात् पूर्वं विकारग्रन्थिरूपत्वेनाऽव्यपदेश्याज्जगदाख्या विकाराः प्रक्रियन्ते" (वा० प० चा० सं०–६)इति।

अत इदं सुस्पष्टं यद् भर्तृहरिणा विवर्तशब्दो न वेदान्तिस्वीकृतेऽर्थे प्रयुज्यते। अस्यां व्याख्यायां स्वीकृतायां 'विवर्तते' इति क्रियायाः कर्तृब्रह्माश्रितत्वम्, कर्तुश्च ब्रह्मणः स्वव्यतिरिक्तस्य कस्याप्यनपेक्षणात्तस्य विवर्तनक्रियायां स्वातन्त्र्यं च संगच्छेते।

(२) प्रकाशविमर्शमयत्वं परतत्त्वस्यैवं सिद्ध्यति—भर्तृहरिमते त्रयः प्रकाशाः, ये न केवलं स्वयं प्रकाशन्ते, अपि तु परानपि प्रकाशयन्ति। एकोऽग्निः, यस्तमोऽपनयनादात्मानं परञ्च घटादि प्रकाशयति। अपर आन्तरो बुद्धिरूपः, यो बाह्येन्द्रियग्राह्यान् घटपटादीन् आन्तरांश्च सुखादीन् प्रकाशयति, स्वयं विदितत्वाच्चात्मानम्। तृतीयस्तु शब्दाख्यः प्रकाशः, यः प्रकाशरूपं जातवेदसं बुद्धिं तथाऽप्रकाशरूपान् घटादीन्, ये नाग्निवद् बुद्धिवद्वा स्वयंप्रकाशाः, तान् सर्वान् प्रकाशयति, स्वयञ्च प्रकाशते। यत्र सर्वं स्थावरजङ्गमात्मकं विश्वमुपनिबद्धम्, यस्मात् पृथक्सत्ताकं स्वतन्त्रं किमपि नास्ति, यः सर्वेषामाश्रयभूतः। यथाह—

"इह त्रीणि ज्योतींषि त्रयः प्रकाशाः स्वरूपपररूपयोरवद्योतकाः। तद्यथा योऽयं जातवेदा यश्च पुरुषेष्वान्तरः प्रकाशो यश्च प्रकाशाप्रकाशयोः प्रकाशयिता शब्दाख्यः प्रकाशः, तत्रैतत् सर्वमुपनिबद्धं यावत्स्थास्नु चरिष्णु चेति।" (वा० प० चा० सं० २४)

एवञ्च शब्दतत्त्वस्य प्रकाशरूपत्वं स्वयंप्रकाशत्वं परप्रकाशयितृत्वं सर्वाश्रयत्वञ्च सुस्पष्टम्। यत्खलु शब्दस्य स्वप्रकाशरूपज्ञानप्रकाशयितृत्वं तदेव तस्य विमर्ष्टृत्वं प्रत्यवमर्शित्वं वा। किमपि ज्ञानं तथाविधं न भवति यद् वाग्व्याप्तम्, वागनुषक्तम्, वागनुगतं न भवति।

अत्र वैयाकरणनैयायिकयोर्मतभेदः। नैयायिका निर्विकल्पकज्ञानस्याशाब्दत्वमभ्युपगच्छन्ति।

"अशाब्दमर्थज्ञानमिन्द्रियार्थसन्निकर्षोत्पन्नम्" (न्या० द० २१)

इति हि तन्मतम्। स्पष्टीकृतं चेदं वाचस्पतिमिश्रेण न्यायवार्त्तिकतात्पर्यटीकायाम्। यथाह—

"तत्र नामरहितमविकल्पं नास्तीति ये विप्रतिपद्यन्ते तन्मतमपाचिकीर्षुरुपन्यस्यति भाष्यकारः "यावदर्थं नामधेयशब्दाः" (न्या० वा० ता० टी० ८२) इति।

एवञ्च निरस्यमानं वैयाकरणमतं संक्षेपतो निर्दिशन् स एवाह—

"तथा च नाविकल्पं शब्दरहितमस्तीति तात्पर्यार्थः" (न्या० वा० ता० टी० ८३) इति।

उदाहरति चैतन्मतसमर्थकं वाक्यपदीयवाक्यम्—

"न सोऽस्ति प्रत्ययो लोके" इत्यादि।

अतो वैयाकरणनये किमपि ज्ञानं सविकल्पकं निर्विकल्पकं वा शब्दरहितं न भवतीत्यत्र नास्ति विवादावसरः। ज्ञानस्य च वाग्रूपता शाश्वती, नित्या, सा प्रत्यवमर्शिनी, प्रकाशरूपज्ञानस्यापि प्रकाशिका, यथा व्यवसायस्य प्रकाशकोऽनुव्यवसायः। प्रत्यवमर्शरूपवाग्व्यापारं विना प्रकाशरूपस्यापि ज्ञानस्य न प्रकाशः। एवञ्च ज्ञानस्य शाश्वतीं प्रत्यवमर्शरूपाम्, विमर्शरूपां वा वाग्रूपतां मन्वाना वैयाकरणाः परतत्त्वस्य प्रकाशविमर्शरूपतामद्वैतशैवानुमतां स्वीकुर्वन्ति। यथाह—

वाग्रूपता चेदुत्क्रामेदवबोधस्य शाश्वती।
न प्रकाशः प्रकाशेत सा हि प्रत्यवमर्शिनी॥ इति।

"यथा प्रकाशकत्वमग्नेः स्वरूपं चैतन्यं वाऽन्तर्यामिणः, तथा ज्ञानमपि सर्वं वाग्रूपमात्रानुगतम्। याऽप्यसञ्चेतितावस्था तस्यामपि सूक्ष्मो वाग्धर्मानुगमोऽभ्यावर्तते" (वा० प० चा० सं० ११२)।

अतः परतत्त्वस्य जाड्यमस्वीकुर्वाणा अद्वैतशैवाः प्रकाशविमर्शरूपमेव परं तत्त्वं स्वीकुर्वन्तीति स्वप्रकाशमात्रपरतत्त्ववादिभ्यो वेदान्तिभ्यस्तेषां भेदः। यथाह—

स्वभावमवभासस्य विमर्शं विदुरन्यथा।
प्रकाशोऽर्थोपरक्तोऽपि स्फटिकादिजडोपमः॥

(भा० भा० १–२४१)

वेदान्तिसंमतस्य भेदस्याविद्योपप्लवरूपतापर्यालोचनम्

स्वप्रकाशमात्रचिद्रूपस्यैकत्वं वास्तवम्, भासमानभावरूपभेदस्त्वविद्योपप्लवादिति मतेऽयं दुःसमाधेयः प्रश्नो जागर्ति—

कस्यायमविद्योपप्लवः? ब्रह्मणो हि विद्यैकरूपस्य न संभवत्यविद्यारूपता, न चान्यः कश्चिदस्ति जीवादिर्यस्याविद्या भवेत्। अनिर्वाच्येयमविद्येति चेत्, कस्यानिर्वाच्या? इति

दुरुत्तरम्। स्वरूपेण भाति, ब्रह्मावृणुते, जगतश्च कारणमित्यभ्युपगमे कथमनिर्वाच्येति शक्यते वक्तुम्? युक्त्या नोपपद्यत इति चेत्, अनुभवापह्नवकारिणी का खलु युक्तिर्नाम? सद्रूपमेव ब्रह्म चकास्त्यविकल्पके, विकल्पबलात्तु भेदोऽयमिति चेत्, कस्यायं विकल्पनव्यापारः? ब्रह्मणश्चेत्, अविद्यायोगोऽस्यापतति। न चान्योऽस्ति यस्यायमुच्येत। अविकल्पकं सत्यं विकल्पकमसत्यमित्ययं विभागः कथं शक्यसमर्थनः, उभयोरपि भासमानत्वाविशेषात्। भासमानोऽपि भेदो बाधित इति चेत्, यथा मोक्षदशायां भेदो बाध्यते, तथा संसारदशायामभेदोऽपि बाध्यत एव। विपरीतसंवेदनोदय एव हि बाधो नान्यः कश्चित्। तस्मात् स्वतन्त्रप्रकाश एव शरणम्।

सत्त्व-समीक्षा

न भावानां नैयायिकाभ्युपगतसत्ताख्यपरजातिसम्बन्धः सत्त्वम्। यत इदं लक्षणमव्याप्त्यतिव्याप्त्यादिदोषदूषितम्। तत्र सत्तायाः सामान्यादिभ्यो व्यावृत्तेरव्यापकत्वम्। तत्राप्यनुवृत्तावनवस्था। सत्तायां हि सत्तायामङ्गीकृतायां तत्राप्यन्या तत्राप्यन्येत्यनवस्थाया दुर्निवारत्वात्, अभावेऽपि सत्ताभ्युपगमे तत्स्वरूपव्याघातापातात्।

नापि बौद्धाभ्युपगतमर्थक्रियाकारित्वं सत्त्वम्। सत्त्वं हि भावेषु ध्वंसात् प्राक् सर्वदा भवति। न चार्थोऽर्थक्रियाविष्टः सर्वदा भवति। अतोऽर्थक्रियाकारित्वाभावदशायां सतोऽर्थस्यासत्त्वापत्तेर्नार्थक्रियाकारित्वं सत्त्वमभ्युपेयम्। अत एवोक्तम्—

अर्थक्रियाऽपि सहजा नार्थानामीश्वरेच्छया।
नियता सा हि तेनास्य नाक्रियातोऽन्यथा भवेत्॥ इति।

(भा० भा० १–१२०)

नाप्यर्थक्रियाकरणयोग्यत्वं सत्त्वम्। भावस्य सत्त्वमसत्त्वं वेति झटिति निश्चयनसमयेऽर्थक्रियाकरणयोग्यत्वनिर्णयस्याऽशक्यत्वात्। अतः प्रकाशमानत्वमेव भावानां सत्त्वमित्यद्वैतशैवनिश्चयः। एवं च शैवनये न मोक्षावस्थायामेवाद्वैतम्, अपि तु संसारावस्थायामपि। सर्वस्यापि भावजातस्य प्रकाशमानतया प्रकाशरूपपरतत्त्वाभेदात्। तच्चेत्थं साध्यते—

वर्तमानत्वेन स्फुटतया इदमित्याकारेण कल्पितशून्यादिशरीरान्तमायीयप्रमातृपृथग्भावेन भासमानानां पदार्थानां भासनं शुद्धचिन्मयपरमार्थप्रमात्रा सहैक्यमनुज्झितवतामेवोपपद्यते नान्यथा, अर्थस्याप्रकाशतायां स्वीकृतायां नीलादिज्ञानस्यासंभवात्। यदि ह्यर्थेभ्यो भिन्न एव

ज्ञानात्मा प्रकाशस्तर्हि प्रकाशमात्ररूपत्वात्तस्य स्वात्मन्यभेद एव। यतो नीलस्य प्रकाशः ज्ञानं वेत्यत्र यो नीलांशः स ज्ञानस्य स्वरूपमिति न शक्यते वक्तुम्, भेदवादत्यागापत्तेः। अतश्च नीलज्ञानपीतज्ञानयोः पारस्परिको भेदो दुःसमर्थ्यः, तयोर्नीलपीतयोरप्रकाशात्मत्वात्। न च नीलेन जनितः, पीतेन जनितः, तेन वैकसामग्रीक इत्यादि शक्यते वक्तुम्, सिद्धे हि नीलपीतयोर्भेदे एवं वक्तुं शक्यत्वात्, स एव तु विचारास्पदीभूतः। न च नीलाकारं ज्ञानं पीताकारं वा ज्ञानं प्रतिबिम्बबलादिति वाच्यम्, ज्ञानाद्भिन्नस्य बिम्बस्यानवभासात्। अतोऽर्थस्य प्रकाशात्मत्वमवश्यमभ्युपेयम्।

न चार्थस्य प्रकाशरूपतायामभ्युपगतायां स सर्वान् प्रति सर्वदा भायादिति वाच्यम्, परिमितप्रमातारं प्रत्यर्थभानस्य माहेश्वरज्ञानशक्तिनिर्भरत्वात्। निपुणमिदं विवेचितमभिनवगुप्तपादैरीश्वरप्रत्यभिज्ञाविमर्शिन्यां विवृतिविमर्शिन्याञ्च ज्ञानाधिकार इति तत एवावधार्यम्, इह तु विस्तरभिया नोच्यते।

भ्रान्तिविचारः

ननु प्रकाशमानत्वं सत्त्वमित्यभ्युपगमे पुरोवर्तमानायां शुक्तौ यो रजतावभासस्तस्यापि सत्त्वात् सत्यत्वं स्यादिति विगतः सत्यासत्यप्रविभाग इति चेच्छ्रूयताम्। भ्रान्तेः परिनिष्ठितं स्वरूपमद्वैतशैवनये। नासत्ख्यातिः, असाधारणख्यातिः, अनर्थक्रियाकारिताख्यातिः, विपरीतख्यातिः, अनिर्वचनीयख्यातिर्वा भ्रान्तिरद्वैतशैवनये, अपि तु पूर्णप्रथाभावादपूर्णख्यातिरूपाऽख्यातिरेव भ्रान्तिः। तथा हि—शुक्तौ पुरोवर्तमानायां यद् "इदं रजतं स्थिरं सर्वप्रमातृसाधारणमर्थक्रियायोग्यम्" इति ज्ञानं तत्रेदमंशे रजताद्यंशेषु तेषाञ्च सामानाधिकरण्येन योजनारूपे चांशे न तावत् काचन भ्रान्तिः, प्रकाशविमर्शयोरेव वस्तुस्वरूपव्यवस्थापकत्वात्। परन्त्विदमिह मनसि निधेयम्। भ्रमो द्विविधः, मानस ऐन्द्रियकश्च। पूर्वस्य शुक्तौ रजतमिति ज्ञानम्, अपरस्यैकस्मिंश्चन्द्रे चन्द्रद्वयप्रतीतिरुदाहरणम्। उभयत्र विषयतया गृहीतं यद् रजतं चन्द्रद्वयं वा तद् यावता पूर्णेन रूपेण उत्तरकालभाविसत्यविमर्शपर्यन्तम् 'इदं रजतम्' इति रूपेण ख्यातव्यम्, तावता रूपेण न ख्यातिरित्यपूर्णख्यातिरेव भ्रान्तितत्त्वम्।

अत्र 'इदं रजतम्' इति पूर्वविकल्पस्योत्तरकालभाविविमर्शेन 'नेदं रजतं वस्तु स्थिरं प्रमात्रन्तरगम्यमर्थक्रियाकारि' इति रूपेण विकल्पेन विमृश्यमानत्वाभावात् पूर्वस्योत्तरेण बाधः।

परन्तु बाधात् पूर्वं रजतस्य भासमानत्वाद् रजतज्ञानस्य सत्यत्वम्, अन्यथा रजतादानार्थं प्रवृत्तेरसंभवात्। न चात्र पृथक् पृथग् रजतांशे इदमंशे वा भ्रान्तिः, रजतं भातमिति ज्ञानस्याबाधितत्वात्। नहि बाधाकालेऽपि 'रजतं न भातम्' इति कस्यापि प्रतिपत्तिः, मानसे ज्ञाने रजतस्य भातत्वात्। इदमंशेऽपि न भ्रान्तिः, बाधसमयेऽपीदंपरामर्शस्य तदवस्थत्वात्। अत उत्तरकाले बाधात् प्रकाशमानत्वं सत्त्वमिति सिद्धान्तस्य न काचनापि क्षतिः। यतो भ्रान्तिर्न पृथक् पृथग्भासमानेष्विदन्ताद्यंशेषु, अपि तु 'इदम्' इति सर्वसाधारणस्य प्रमात्रन्तरगम्यस्याभासस्य 'रजतम्' इति मानसज्ञानरूपेण संस्कारोद्बोधरूपेणात एव प्रमात्रन्तरासाधारणेनाभासेन सह मेलनांशे। मेलनांशे यदेव 'इदम्' तदेव स्थिरत्वादिगुणयुक्तं 'रजतम्' इति समानाधिकरणतया स्थापनरूपे विमर्शानुवृत्तिनिर्मूलनं विमर्शोदयकालादारभ्यैव बाधकेन क्रियत इति तत्रैव भ्रान्तिभावः। एवं चाद्वैतशैवनये संबन्धनिष्ठो बाधः, न तु विषयनिष्ठः। अतोऽद्वैतशैवनये वेदान्तिनय इव भ्रान्तावभासमानस्य विषयस्य न स्वकारणेन सह सर्वथोच्छेदः, अपि तु मानसज्ञानरूपस्य संस्कारोद्बोधरूपस्य मनोबाह्येन तादात्म्यसंबन्धमात्रस्य। एवं द्विचन्द्रज्ञाने ऐन्द्रियविकारभासितस्य 'द्वौ चन्द्रौ' इत्याभासस्य देशकालाभ्यामस्ति मेलनं यद् बाधकेन बाध्यते। प्रमात्रन्तरसाधारणत्वाभावस्य यदख्यानं तन्महिम्नैवासत्ता-वैपरीत्यव्यपदेशौ युक्तावन्वयव्यतिरेकाभ्याम्। तदेव 'अन्यथा' इति 'व्यतिरेक' इति शब्दयोर्भ्रमविषये प्रयोगस्य मूलं कारणम्।

एवञ्च यः केशादेर्द्रष्टा तैमिरिकमात्मानं मन्यते तं प्रति केशादेर्नासत्त्वेन नापि विपरीतत्वेन व्यपदेशः। तेन हि प्रमात्रन्तरं प्रति न विषयः केशादिरिति निश्चितम्। यथा—ऐन्द्रजालिकं प्रत्यलीकरूपाणां मणिप्रभृतीनां नासत्त्वं नापि विपर्ययः कश्चित्, यतः स तेषां तात्त्विकं रूपं जानाति, अतोऽसत्त्वविपर्ययव्यवहारस्य व्यापिका प्रमात्रन्तरसाधारणत्वाभावस्याख्यातिरेव, तद्व्यापकाभावे तद्व्यवहाराभाव इति निर्णयः।

एवमेव "मायापदं सर्वं भ्रान्तिः" इत्यभ्युपगच्छतामद्वैतशैवानां नेदं मतं यन्मोक्षे संसारस्य समूलकारणस्योच्छेदः, अपि तु परिमितप्रमातारं प्रतीदन्तया भासमानस्य भावजातस्य यो ज्ञातृज्ञेयभावरूपः संबन्धस्तस्यैव व्युच्छेदः, परिमितप्रमातुर्माया-विद्या-काल-कला-नियति-रागरूपे कञ्चुके धान्यात्त्विषीव पतिते परप्रमातृतादात्म्यादिदंभावरूपभेदबुद्ध्यसंभवात् सर्वस्याप्यहन्तातादात्म्यापत्तेः। यथाह—

इदं नीलमितीहाऽपि नामरूपे प्रथात्मके।
न हेयेऽनयोर्हेया त्वहंभावाऽप्रथैव सा॥ इति,

सर्वो ममायं विभव इत्येवं परिजानतः ।
विश्वात्मनो विकल्पानां प्रभवेऽपि महेशता ॥ इति च ।

अद्वैतशैववेदान्तमतयोर्मौलिको भेदः

ब्रह्मणः स्वरूपलक्षणे उपात्तानां सच्चिदानन्दशब्दानामुभयमतानुसारमर्थविवेचनया तथा भ्रान्तिस्वरूपोपपादनेन वेदान्त्यद्वैतशैवयोः पारस्परिको भेदः संक्षेपेण प्रदर्शितः, अद्वैतशैवनये नास्तित्वमात्रं सत्त्वम्, अपि तु प्रकाशमानत्वम्। चित्त्वं न स्वप्रकाशमात्रत्वम्, अपि तु प्रत्यवमर्शात्मत्वम्। आनन्दश्च न दुःखाभावस्वरूपः, अपि तु स्वात्मविश्रान्तिरूप इति। इमे सर्वेऽपि भेदा मौलिकभेदादुद्भवन्ति ।

स चायम् :—

वेदान्तिनये माया सदसद्भ्यामनिर्वचनीया, न च भजते ब्रह्मतादात्म्यम्। अद्वैतशैवनये तु माया परमशिवाभिन्नतत्तादात्म्यावस्थितशक्तिपरमार्था, शक्तिशक्तिमतोस्तादात्म्याभ्युपगमात्। यथाह—

न शिवः शक्तिरहितो न शक्तिः शिववर्जिता ।
तादात्म्यमनयोर्नित्यं वह्निदाहकयोरिव ॥ इति ।

मायाऽपरपर्यायाया अविद्याया ब्रह्मशक्तिरूपत्वं तु वैयाकरणसिद्धान्तेऽपि स्वीक्रियत इति प्रागुपपादितम्। अतो वैयाकरणाद्वैतशैवयोरस्मिन् विषये सर्वथैकमत्यम्।

मायायाः परतत्त्वशक्तित्वस्वीकारांश एवाद्वैतशैववेदान्तिनोर्मौलिको मतभेद इति स्पष्टमेवोक्तमभिनवगुप्तपादैः स्वीयेश्वरप्रत्यभिज्ञाविवृत्युपसंहारे। यथाह—

"ब्रह्मवादेऽविद्यां मायाशक्तीकृत्य विज्ञानाद्वयमात्मेश्वराभिप्रायेण निरूप्य सिध्यत्येव जनः" इति ।

उपसंहारः

विस्तरभिया ज्ञानस्मृत्यपोहनशक्तिमन्महेश्वरानभ्युपगमे न सिध्यति कश्चन ज्ञानस्मरणादिनिर्भरो लौकिकोऽपि व्यवहार इत्यादि महत्त्वपूर्णानप्येतद्विषयान्तर्गतान् विषयानस्पृशन्, लब्धेऽ-

न्यस्मिन्नवसरे तत्प्रतिपादनं चिकीर्षन्, समयाभावात् प्रतिपिपादयिषिते अपि क्रमकुलदर्शने अप्रतिपादयन्, अस्य व्याख्यानत्रयस्य शैवदर्शनसंग्रहरूपतां परिरिरक्षिषुः परिशिष्टरूपेण तद्दर्शनद्वयविवरणं दित्सन्, सावधानमिमानि भाषणानि शृण्वद्भ्यो विद्वच्छ्रोतृभ्यः शतशो धन्यवादान् ददत्, विरमाम्युच्चारयन्नेतत्सिद्धान्तसंक्षेपरूपं पद्यद्वयम्—

स्वेच्छावभासिताशेषलोकयात्रात्मने नमः ।
शिवाय शश्वदच्छन्नस्वच्छस्वातन्त्र्यमूर्तये ॥
यस्मिन् सर्वं यतः सर्वं यः सर्वं सर्वतश्च यः ।
यश्च सर्वमयो नित्यं तस्मै सर्वात्मने नमः ॥

॥ इति शम् ॥

स्वातन्त्र्यवादी भर्तृहरिः

स्वातन्त्र्यवादो यद्यप्यद्वैतशैवागमाननुसरद्भिः सोमानन्द-उत्पलाचार्य-अभिनवगुप्तपाद-क्षेमराजादिभिः प्राधान्येन सविस्तरं प्रतिपादितः, एवं चायं काश्मीरशैवाद्वैतापरपर्य्यायत्वेन गृह्यते; तथापि नायं तद्बुद्धिप्रभवः। यथोक्तं सोमानन्दपादैः स्वीयशिवदृष्ट्यवसाने—

प्रतिपादितमेतावत् सर्वमेव शिवात्मकम्।
न स्वबुद्ध्या शिवो दाता शिवो भोक्तेति शास्त्रतः॥ इति।

वैदिकैर्वेदानामिव शैवैः शैवागमानामनादित्वं स्वीक्रियते। पाणिनिसमकालिकः पाणिने-श्चोपदेष्टा नन्दिकेश्वरः "अइउण्" इति सूत्रस्य दार्शनिकव्याख्यायामिमं स्वातन्त्र्यवादं स्वीकृतवान्। नन्दिकेश्वरनये हि प्रथमो वर्णः 'अ' इति निर्गुणब्रह्मवाचकः, इकारश्चित्कलावाचकः, उकार ईश्वरवाचकः, णकारश्च 'आसीत्' इति क्रियावाचकः। एवञ्च परयोगिनामन्यतिरेकतुरीया-तीतसमाधौ निर्गुणतया प्रकाशमानो ब्रह्मापरपर्यायः शिवः प्रकाशविमर्शरूपोऽपि विश्वोत्तीर्णरूपे न्यग्भावितविमर्शतया प्रकाशैकघनः 'अ' इति निर्दिष्टः। स एव न्यग्भावितप्रकाशतया चिति-सत्ता-विमर्श-स्वातन्त्र्यादिपर्यायस्वशक्तिप्रधानतया पश्यन्त्याद्या वाचः सकलजडाऽजडात्मकं वाच्यं चाभासयन् विश्वरूप ईश्वर इत्युच्यते। अयं नन्दिकेश्वरसिद्धान्तः।

ब्रह्मणः सद्रूपत्वमभ्युपगच्छद्भिर्वेदान्तिभिरप्ययं स्वातन्त्र्यवादोऽवश्यं स्वीकार्यः, यदि तैर्व्याकरणं नोपेक्ष्यते सर्वथा। अविरतप्रवर्तमानत्वद्योतकशतृप्रत्ययान्ताद् भवनार्थाद् 'अस्'-धातोर्निष्पन्नः सच्छब्दोऽसिक्रियाकर्तुर्ब्रह्मणो भवने स्वातन्त्र्यमभिधत्ते। अतो यदि ब्रह्मविषये तेषां सच्छब्दप्रयोगः सार्थकस्तर्हि स्वातन्त्र्यवादाभ्युपगमात् पलायनमार्गो नास्ति कश्चन।

परमवैयाकरणेन भर्तृहरिणा स्वीकृत एवायं स्वातन्त्र्यवादः। यथाह—

अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः।
जन्मादयो विकाराः षड् भावभेदस्य योनयः॥ (वा० प० १।२)
जलयन्त्रभ्रमावेशसदृशीभिः प्रवृत्तिभिः।
स कलाः कलयन् सर्वाः कालाख्यां लभते विभुः॥ (वा०प०३।६।१४)

यथा च स्पष्टीकृतं भूतिराजतनयहेलाराजेन—"विश्वात्मैक एव परं ब्रह्माभिधानं सत्यो भावः। स एव नानाविधकार्यकारितयाऽनन्तशक्तित्वेन व्यवह्रियते, तथा च क्रमिकांश्चक्रभ्रमिवत् परावर्तमानान् भावान् प्रकाशयन् कालयति भूतानीति काल इत्युच्यते। स विभुः स्वतन्त्रः। अत एव स्वातन्त्र्यशक्तिः काल इति वाक्यपदीये सिद्धान्तितम्—

अध्याहितकलां यस्य कालशक्तिमुपाश्रिता इत्यत्र" इति।

अतो वाक्यपदीये प्रथमकारिकोपलब्धं 'विवर्तते' इति शब्दमाश्रित्य विवर्तवादिवेदान्ताऽनुसारं वैयाकरणदर्शनप्रतिपादनं न युक्तियुक्तं प्रतिभाति, भर्तृहरेः स्वातन्त्र्यवादित्वात्। वाक्यपदीयोपलब्धस्य विवर्तशब्दस्य न सर्वथाऽद्वैतवेदान्तप्रक्रियास्वीकृतोऽर्थः, जगद्विषये विवर्तशब्दवत् परिणामशब्दस्यापि भर्तृहरिणा प्रयुक्तत्वात्। यथाह—

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत॥ (वा० प० १।१२१)

एवं प्रतिभाति यद् भर्तृहरिसमये वि-उपसर्गपूर्वकाद् वर्तमानार्थाद् वृतुधातोर्घञन्तान्निष्पन्नस्य विवर्तशब्दस्य विलक्षणतया अद्भुततया विशेषेण विपरीततया वा वर्तनमिति विग्रहानुसारं यौगिक एवार्थः परिगृहीत आसीत्। अयमर्थो वाक्यपदीयटीकायाम् (३।२।१२)—"अनेकभावग्रामरूपतया चाद्भुतया वृत्त्या विवर्तनाद्" इति वदता हेलाराजेन स्वीकृत इवाभाति। इदञ्च समर्थ्यते—

न तत्त्वातत्त्वयोर्भेद इति वृद्धेभ्य आगमः।
अतत्त्वमिति मन्यन्ते तत्त्वमेवाविचारितम्॥ (वा०प० ३।२।७)
विकल्परूपं भजते तत्त्वमेवाविकल्पितम्।
न चात्र कालभेदोऽस्ति कालभेदश्च गृह्यते॥ (वा०प० ३।२।८)

इति कारिकाभ्याम्, तथा च तट्टीकोपलब्धहेलाराजवचनाभ्याम्। यथाह—

"नेहाऽद्वयनये सत्यासत्ये द्वे रूपे स्तः, अद्वैतहानिप्रसङ्गात्; किन्तु पारमार्थिकमेकमेवाद्वयम्। ......तत्र योऽयं प्रकाशः स विद्या, अप्रकाशस्तु तमोऽविद्या। न च प्रकाशाभावोऽप्रकाशो नाम कश्चित् प्रमाणसिद्धो निरूप्यः। ततश्च योऽयं भेदप्रकाशः सैवैकघनप्रकाशाभावः प्रकाशविच्छेदोऽविद्या" इति। अथ च—"परमार्थतोऽविकल्पितं विकल्पानामविषयो यत्तत्त्वं तदेव व्यवहारकालेऽन्यस्याभावाद्विकल्पमानं विकल्परूपं नानाविधभेदावभासमनादिसिद्धाऽविद्यावशात्

समवलम्बते·····"मूर्तिविवर्ताश्रयं दिक्शक्तिविभक्तदेशनानात्वं निमित्तपौर्वापर्यावलम्बनसहम्, एवमकालकलितमपि तत्त्वमनादिनिधनकालाख्यस्वतन्त्रशक्तिविनिवेशितप्रतिबन्धाभ्यनुज्ञावशाज्जन्मादिविकाराऽभिधीयमानपौर्वापर्यं चकास्ति" इति ।

अत्रेदमवधार्यम्—भर्तृहरिरविद्यामप्रकाशरूपां सर्वथा प्रकाशविरुद्धां प्रकाशभिन्नां न स्वीकरोति, अपि तु तस्या अपि प्रकाशरूपतामेव मनुते । एवञ्चाऽविद्याब्रह्मणोर्न पारमार्थिको भेदः । मूर्तिवैचित्र्यरूपो देशक्रमो मूर्तिशक्त्या, क्रियावैचित्र्यरूपश्च कालक्रमः कालशक्त्याऽवभास्यते । उभे ब्रह्माऽभिन्ने । शक्तिशक्तिमतोर्हि वैयाकरणनये तादात्म्याभ्युपगमः, "तत्स्वरूपत्वेनाव्याहता नित्या अपि यस्य कलाः शक्तयः" (१।३) इति वाक्यपदीयटीकाकारवचनात् । अतः स्पष्टमिदं यद् भर्तृहरिनये ब्रह्मैव स्वशक्त्या स्वस्मिन् भेदमवभासयति । स च परिमितप्रमातृगताऽविद्याकारणात् परिमितप्रमातारं प्रत्येव भाति । एतत्सर्वमद्वैतशैवैरनुमन्यते । यथोक्तम्—

मूर्तिवैचित्र्यतो देशक्रममाभासयत्यसौ ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः ॥
सर्वत्राभासभेदोऽपि भवेत् कालक्रमाकरः ।
विच्छिन्नभासः शून्यादेर्मातुर्भातस्य नो सकृत् ॥
देशक्रमोऽपि भावेषु भाति मातुर्मितात्मनः ।
स्वात्मेव स्वात्मना पूर्णा भावा भान्त्यमितस्य तु ॥

(भा० भा० २, पृ० १६-२०)

अयमेव विवर्तशब्दस्यार्थः स्वातन्त्र्यवादप्रतिपादकैरभिनवगुप्तपादैः स्वीयक्रमकेलिनामकग्रन्थे परिगृहीतः । यथोक्तं महेश्वरानन्देन महार्थमञ्जर्याम्—"यथा च क्रमकेलौ 'तद्विवर्तः स्मृतो रश्मिपुञ्जश्चक्रेशिपूर्वकः' इत्यत्र व्याख्यातम्—विवर्तो विचित्रेण रूपेण वर्तनं न त्वविद्यावशात्, अपि तु स्वातन्त्र्यतः" इति । परन्तु नात्र सन्देहो यद्विवर्तस्य "एकस्य तत्त्वादप्रच्युतस्य भेदानुकारेणाऽसत्याऽविभक्तान्यरूपोपग्राहिता विवर्तः" इति लक्षणं वाक्यपदीयप्रथमश्लोकटीकायामुपलभ्यते । तथा कैश्चन सोमानन्दात् पूर्वभाविभिर्वाक्यपदीयटीकाकारैरिदमेवोरीकृतमासीत् । यतः सोमानन्दः स्वीयशिवदृष्टिद्वितीयाध्याये 'अनादिनिधनं ब्रह्म' इति कारिकामुद्धरन् 'विवर्तते' इति शब्दस्याद्वैतवेदान्त्यभ्युपगतमेवार्थं मनुते स्मेति प्रतीयते शिवदृष्टिटीकाकर्तुस्तच्छिष्यस्योत्पलाचार्यस्य वचनात् । यथाह—"पश्यन्तीरूपं शब्दतत्त्वमक्षरमनाद्यन्तं ब्रह्म

विश्वार्थभावेन विवर्तते, तदसत्यरूपमात्मन्युपगच्छति। असत्यविभक्तान्यरूपोपग्राहिता विवर्तस्तस्यास्तद्विवर्तते" (शि० दृ०, पृ० ४४) इति।

विवर्तवादस्वीकृतं जगदसत्यत्वम्, अविद्याभ्युपगमम्, पश्यन्त्याः परतत्त्वत्वप्रतिपादनम्, अन्यांश्च स्वातन्त्र्यवादविरुद्धान् वैयाकरणसिद्धान्तांशान् दृढं समालोच्य सोमानन्दः स्वातन्त्र्यवादं मनोहारिणीभिर्युक्तिभिर्दृढीचकार। वेदान्त्यभ्युपगतविवर्तवादस्वातन्त्र्यवादयोः परस्परविरुद्धयोरेकस्मिन् दर्शने समावेशः सर्वथाऽसमञ्जस इति सुविदितमेव विदुषाम्। परमतीव गहनोऽयं विषयः समधिकं विवेचनमपेक्ष्यते। चिकीर्ष्यते चेदं समयान्तरे। आशास्यते च मत्तोऽधिकं व्याकरणदर्शने कृतपरिश्रमैरत्रत्यैर्धुरन्धरैर्वैयाकरणैः करिष्यते विचारोऽस्मिन् विषय इति॥

क्रमदर्शनम्

श्रीमन्तः श्रद्धेयाः कुलपतिमहोदयाः ! उपकुलपतिमहाभागाः ! महान्तः काशीविद्वांसः ! तन्त्रानुरागिणश्च !

अतीवानुगृहीतमात्मानं मन्ये यदहं वाराणसेय-संस्कृत-विश्वविद्यालय-तन्त्रदर्शनपरिषदोऽध्यक्षपदं ग्रहीतुमामन्त्रितः सम्मेलनायोजकानां महतां विदुषां सम्मत्या तत्रभवद्भिरुपकुलपतिमहाभागैः । शिष्टपरम्परागतनियमानुसारं चोपस्थितोऽहं किमपि वक्तुं तन्त्रविषयमवलम्ब्य ।

तन्त्रशब्दार्थः

तन्त्रशब्दो विस्तारार्थकात् तनुधातोः "सर्वधातुभ्यः ष्ट्रन्" इत्युणादिसूत्रानुसारं ष्ट्रन्प्रत्ययान्तः; तनोति तन्यतेऽनेन वेति व्युत्पत्त्यनुसारम्, यद्वा कुटुम्बधारणार्थात् तत्रिधातोः "भावे" (३-३-१८) इत्यष्टाध्यायीसूत्रानुसारं घञ्प्रत्ययान्तः; तन्त्रणं तन्त्र्यते यद् येन यत्र वेति व्युत्पत्त्यनुसारं तन्त्रशब्दः सिध्यति । एवञ्च तद् ग्रन्थजातं यत् तं सर्वं ज्ञानराशिं विस्तृणाति, विस्तरेण प्रकटयति, तदनुसारि कुटुम्बं समूहं बिभर्ति, तत् तन्त्रम् । ज्ञानराशीनां विस्तरेण प्रतिपादयतां ग्रन्थानां च विषयभेदाद् भवति पारस्परिको भेदः । नास्ति किञ्चिद्यत्कस्यचन ज्ञानगोचरं नास्ति । तथा च यः कश्चनापि ग्रन्थो यं कञ्चन ज्ञानविषयं विस्तरतः प्रतिपादयन् तन्त्रशब्देन वक्तुं शक्यते । तथा च सन्ति शैवानां शाक्तानां बौद्धानां प्रसिद्धानि तन्त्राणि तन्मतप्रतिपादकानि, परिगणितानि च तान्युपतन्त्रेषु वाराहीतन्त्रे, यथा--

बौद्धोक्तान्युपतन्त्राणि कपिलोक्तानि यानि च ।
अद्भुतानि च एतानि जैमिन्युक्तानि यानि च ॥
वशिष्ठः कपिलश्चैव नारदो गर्ग एव च ।
पुलस्त्यो भार्गवः सिद्धो याज्ञवल्क्यो भृगुस्तथा ॥
शुक्रो बृहस्पतिश्चैव अन्ये ये मुनिसत्तमाः ।
एभिः प्रणीतान्यन्यानि उपतन्त्राणि यानि च ॥ इति ।

"पञ्चशिखेन मुनिना बहुधा कृतं तन्त्रम् । षष्टितन्त्राख्यं षष्टिखण्डं कृतमिति । तत्रैव हि षष्टिरर्था व्याख्याताः" इत्यादिभिस्तत्र तत्रोपलब्धैरुद्धरणैः । तथा च--

"तेषु च षष्टितन्त्रादिख्यातेष्विति । विस्तरत्वात् षष्टितन्त्रस्य संक्षिप्तरुचिसत्त्वानुग्रहार्थं सप्ततिकारम्भः" इत्यादिभिश्चेदं सुस्पष्टं यत् सांख्यतन्त्राण्यप्यासन् । अद्वैतवेदान्तप्रतिपादकशिरोमणिभिः श्रीशङ्कराचार्यैर्लिखितम् 'गायत्रीतन्त्रम्' समुपलभ्यते मुद्रितम् । राजनीतिकग्रन्था आख्यायिकारूपेण मित्रभेद-मित्रप्राप्ति-सन्धिविग्रह-लब्धनाश-अपरीक्षितकारित्वादीन् प्रतिपादयन्तः पञ्चतन्त्र-तन्त्राख्यायिकादयो ग्रन्थाः स्पष्टयन्ति यद्राजनीतिसाहित्यमपि तन्त्रशब्दाभिधेयम् । तथ्यं त्विदं यद्राजनीतिरपि तन्त्रप्रतिपाद्यविषयेषु परिगणितोपलभ्यते । यथा वाराहीतन्त्रे—

राजधर्मा दानधर्मा युगधर्मस्तथैव च ।
व्यवहारः कथ्यते च तथा चाध्यात्मवर्णनम् ॥ इति ।

एवं यन्त्रविज्ञानमपि तन्त्रप्रतिपाद्यान्तर्गतमेव । यथा तत्रैव—

संस्थानञ्चैव भूतानां यन्त्राणाञ्चैव निर्णयः ।
उत्पत्तिर्विबुधानाञ्च तरूणां कल्पसंज्ञितम् ॥ इति ।

उपर्युक्ततन्त्रशब्दविवरणानुसारं भारतविषये—"भारतं प्रजातन्त्रं राष्ट्रम्" इति वाक्ये प्रयुज्यमानस्य 'प्रजातन्त्र'शब्दस्य वैयाकरणदृष्ट्या व्युत्पाद्यमानस्यायमर्थः—

प्रजा तनुते शासननियमान् यत्र, प्रजया तन्यते विस्तार्यते शासनपद्धतिर्यत्र, प्रजया तन्त्र्यते ध्रियते स्वसमूहो यत्र । एवञ्च भारतं तद्राष्ट्रं यस्मिन् प्रजैव राष्ट्रनियमांस्तथैव तनुते विस्तारयति संशोधनपरिष्करणादिभिर्यथा तन्तुवायस्तन्तून्, यत्र च प्रजैवैभिर्नियमैः स्वात्मानं धारयति पोषयति च, यत्र प्रजैव राष्ट्रचिन्तां करोति । प्रयुक्तस्तन्त्रशब्दोऽन्तिमार्थे महाकविना माघेन स्वीयशिशुपालवधमहाकाव्ये । यथा—

तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ।
सुनिग्रहा नृपेन्द्रेण पन्नगा इव शत्रवः ॥ इति ।

तन्त्रशब्दो धार्मिकग्रन्थेष्वागमशब्दापरपर्यायः । यद्यपि—

आगतं शिववक्त्रात्तु गतं च गिरिजामुखे ।
मतं श्रीवासुदेवेन आगमं संप्रचक्षते ॥

इति वाक्यानुसारमागमशब्दं द्वैतद्वैताद्वैताद्वैतशैवमतप्रतिपादनपरशैवागमार्थ एव केचन प्रयुञ्जते; तथाप्यभिनवगुप्ताचार्य आगमतन्त्रशब्दावेकार्थवाचिनाविति मन्वानो दशाष्टादशवस्वष्टभेदभिन्नशैवागमव्याख्यापराभ्यां स्वीयग्रन्थाभ्यां तन्त्रालोकतन्त्रसारनामनी प्रददौ । एवञ्च पाञ्चरात्रागमा अपि तन्त्रान्तर्गता एव ।

तन्त्राणि न केवलं भारतीयान्यपि तु चीनदेशीयान्यपि सन्ति। परिगणितानि च तानि विश्वसारतन्त्रे। यथा—

महाचीनादितन्त्राणि अविकल्पे महेश्वरि।
सुसिद्धानि वरारोहे रथक्रान्तादिभूमिषु ॥ इति।

अवेलान्-उड्रफ्-इत्यादिभिः पाश्चात्त्यैर्विद्वद्भिर्बहवस्तन्त्रविषयका ग्रन्था आंग्लभाषायां लिखिताः। बार्नेटमहोदयेनाभिनवगुप्तकृतः परमार्थसार आंग्लभाषायामनूदितः। बाइरमहोदयेन क्षेमराजकृतं प्रत्यभिज्ञाहृदयं जर्मनभाषायामनूदितम्। विभिन्नैर्योरोपदेशीयैः शासनैराहूतेन विभिन्नेषु पाश्चात्त्यदेशेषु व्याख्यानानि ददता तत्रत्यैर्विद्वद्भिर्भारतीयपाश्चात्त्यदर्शनतुलनाविषयकं विचारविनिमयं कुर्वता मया स्वाक्षिभ्यां दृष्टा तन्त्रविषयिणी पाश्चात्त्यविदुषां रुचिः। रोम-विश्व-विद्यालयस्थेन सुविख्यातेनाध्यापकेन डाक्टर-ग्नोलीतिनामधेयेन इटली-भाषायां कृतोऽनुवादोऽभिनवगुप्तलिखितस्य तन्त्रसारस्य। फ्रांसदेशीय-पैरिस-विश्वविद्यालयेऽनुसन्धानं कुर्वत्या सिल्वर्न-नाम्न्या विदुष्या क्रियतेऽभिनवगुप्तकृतस्य परात्रिंशिकाविवरणस्य स्वीयभाषायामनुवादः। अस्मद्देशेऽपि काश्मीरिकानुसन्धानविभाग-देवशालपुरीशिवागमसिद्धान्तपरिपालनसङ्घादिभिः क्रियत एव तन्त्रविषयकं कार्यम्। उत्तरप्रदेशेऽप्याबाल्यादद्यत्वेऽपि तन्त्राणामुद्धारे तान्त्रिकसाधनायाञ्च दत्तचित्ता विद्वन्मूर्धन्याः श्रीमन्तः सर्वपूज्या महामहोपाध्यायगोपीनाथकविराजमहोदया विराजन्त एव, येषां प्रेरणया साहाय्येन पथप्रदर्शनेन चैतद्विषयकं बहुकार्यं काशीस्थैर्महद्भिः पण्डितैः कृतम्, पण्डितजगन्नाथोपाध्याय-व्रजवल्लभद्विवेदप्रमुखैरन्यैश्चाद्यापि क्रियते करिष्यते च। अत इदमतीव मोदावहं यदस्मिन् वाराणसेय-संस्कृत-विश्वविद्यालयेऽनुपमेयवैदुष्याणां कृतयोगाभ्यासानां श्रीमतां कविराजमहामनसामाध्यक्ष्ये योगतन्त्राख्यस्यैकस्य स्वतन्त्रस्य विभागस्य स्थापना सञ्जाता, वयं चास्मिंस्तन्त्रसम्मेलने सम्मिलिता विचारविनिमयं कर्तुं प्रसारयितुञ्च ज्ञानयोगचर्याक्रियाविषयकं तान्त्रिकं ज्ञानं विज्ञानञ्च।

तान्त्रिकज्ञानविज्ञानोद्धारार्थं किं कर्तव्यं कथं कर्तव्यं क्व कर्तव्यं कैश्च कर्तव्यमिति त्वस्माकं मान्यैरुपकुलपतिमहाभागैः स्वीयललितभाषणे सम्यङ्निर्दिष्टमेवेति न शिष्यते किमपि वक्तव्यं तद्विषये। अत एतद्विश्वविद्यालयीय-डाक्टरगङ्गानाथझाव्याख्यानमालायां शैवदर्शनविषयकं व्याख्यानत्रयं ददता उपसंहारे क्रमकुलाख्यं दर्शनद्वयं संक्षेपेण प्रतिपादयितुं या प्रतिज्ञा कृता तामेवांशेन सफलीकर्तुं लब्धावसरेणाद्य मया क्रमदर्शनं प्रतिपाद्यते।

काश्मीरे त्रीण्यद्वैतदर्शनान्युदभूवन्। सर्वाण्यप्यभिनवगुप्तपादो व्याचख्यौ। क्रमदर्शनं कुलप्रत्यभिज्ञाख्यदर्शनद्वयाद्भिन्नम्। अस्येतिहासो भिन्नः, गुरुपरम्परा भिन्ना, तथैवागमा अपि; यानिदं दर्शनं प्रमाणत्वेनाश्रयति, भिन्नाः। अस्य कुलदर्शनेन महत् साम्यम्, यस्मादिदं कुलदर्शनसोदरत्वेन स्वीक्रियते। इदमभिनवगुप्तपादैः स्वीयतन्त्रालोकचतुर्थाह्निके द्वादशकाली-व्याख्यानावसरे स्पष्टमुक्तम्—

"द्वादशकाल्यभ्युपगमः क्रमकुलसाधारणः"

इति वदद्भिः। आसां द्वादशकालीनां वर्णनमभिनवगुप्तकृतक्रमस्तोत्रे समुपलभ्यते।

क्रमदर्शनं कुलदर्शनाद्भिन्नम्। प्रथमं शाक्तोपायमाश्रयति, द्वितीयं तु शाम्भवोपायम्। प्रथमनये विकल्पसंशोधनक्रमेण मुक्तिः, द्वितीयनये तु 'अहम्'प्रत्यवमर्शतादात्म्यीभवनमात्रा-दक्रमेण मुक्तिः। प्रत्यभिज्ञादर्शनादप्यस्य भेदः कुलदर्शनादस्य भेदेन समकक्षः। यतः प्रत्यभिज्ञोपायः 'अनुत्तर, अनुपाय' इत्यादिशब्दैरभिधीयते, न च प्रत्यभिज्ञायां कश्चन क्रमः। यथाह—

ततोऽपि परमं ज्ञानमुपायादिविवर्जितम्।
आनन्दशक्तिविश्रान्तमनुपायमिहोच्यते॥

इच्छादीनां हि एषणीयादिविषयावच्छेदेन बाह्योन्मुखत्वाद् भेदसम्भावनाऽपि स्यात्। आनन्दशक्तिः पुनः—

"आनन्दो ब्रह्मणो रूपम्"

इत्याद्युक्त्या हि चितस्तत्स्वरूपमेवेति नात्रोपायगन्धोऽस्तीति तात्पर्यम्। इति (तं० आ०, आ० १, श्लो० २४२)।

इदं दर्शनान्तरेभ्यो भिन्नतया मालिनीविजयवार्त्तिकादिग्रन्थेषु स्वीकृतम्। यथाह—

"अतिमार्गकुलक्रमत्रिकस्रोतोऽन्तरादिषु" इति (मा० वा० वि० ३०)।

जयरथः स्वीयायां तन्त्रालोकटीकायां 'क्रमदर्शन, क्रमनय' इत्यादिशब्दान् प्रयुङ्क्ते। तथाह—

"क्रमदर्शने सर्वत्रैव सृष्ट्यादिदेवीनाम् .... " इति,

"क्रमनयसमानकक्ष्यत्वविवक्षायाम् .... " इति च।

तथा च तन्त्रालोकप्रथमश्लोकं क्रम-कुलाख्यदर्शनद्वयानुसारं व्याख्याति स्म।

अस्य दर्शनस्य नामानि

इदं दर्शनं 'क्रम'इति नाम्नोच्यते। यत एतदनुसारं विकल्पसंस्कार एव निर्विकल्परूप-परतत्त्वज्ञानरूपाया मुक्तेरुपायः, विकल्पसंस्कारश्च क्रमेणैव भवति, न तु सहसा। यथाह—

चतुर्ष्वेव विकल्पेषु यः संस्कारः क्रमादसौ।
अस्फुटः स्फुटताभावी प्रस्फुटन् स्फुटितात्मकः॥
ततः स्फुटतरो यावदन्ते स्फुटतमो भवेत्। इति।

(तं० आ०, भा० ३, पृ० ४, ५)

अतोऽस्य क्रमदर्शनमिति नाम। अपरमस्य नाम कालीनय इति। यत एतत्सिद्धान्तानुसारं क्षेप-ज्ञान-प्रसंख्यान-गति-नाद-रूपाणि पञ्च कृत्यानि कुर्वन्ती काली एव परं तत्त्वम्। कालीशब्द एव इमानि पञ्च कृत्यानि द्योतयति, यतोऽयं शब्दः (१) कल-किल-विल विक्षेपे, (२) कल गतौ (गतिर्ज्ञाने प्राप्तौ च), (३) कल शब्दे, (४) कल संख्याने इति धातुचतुष्टयात् "अकर्तरि च कारके संज्ञायाम्" इति सूत्रानुसारं कर्मणि घञ्प्रत्ययान्ताद् ङीपि कृते सिध्यति। एवं च यया सर्वं कल्यते विक्षिप्यते बहिरुल्लास्यते, सर्वं ज्ञायते—स्वात्माभेदेन परामृश्यते, संख्यायते—प्रमातृप्रमेयादिः सकलोऽप्ययं राशिः परस्परतो व्यपोह्यते, इदमिदं नानिदमिति प्रतिनियततया अवस्थाप्यते गम्यते—भेदितः सकलोऽर्थः संविल्लक्षणं स्वरूपमारोह्यते, दर्पणगतप्रतिबिम्बवत् स्वस्मादव्यतिरिक्तत्वेऽपि व्यतिरिक्ततया अवभास्यते, शब्द्यते, स्वात्मपरामर्शशेषतां नीयते, सर्वमविकल्पज्ञानादि विलोप्यते यया सा काली। एवं या स्वात्माभेदेन स्थितं सर्वं भावजातं स्वस्माद्बहिरुल्लासयति, उल्लासितान् भावान् परस्परतो भेदयति, तांश्च स्वात्मनि प्रतिबिम्बरूपेण धारयति, स्वस्मादभेदेन गृह्णाति, स्वस्मिन्नेव विलापयति क्रमशः सा काली।

उपर्युक्तदिशा पञ्चविधकृत्यकारिणी काली। इमानि कृत्यानि प्रत्यभिज्ञासिद्धान्ताभ्युपगतपरशिवपञ्चकृत्येभ्यः सृष्टिस्थितिसंहारपिधानानुग्रहेभ्योंऽशतो भिन्नानि, पिधानानुग्रहयोः केषुचिदपि गणितेषु कालीकृत्येष्वन्तर्भावाभावात्। प्रत्यभिज्ञासिद्धान्तेऽनुग्रहस्यातीव महत्त्वं यतस्तदनुसारं शिवानुग्रहेणाक्रममेव भवति मोक्षः। परमस्मिन् सिद्धान्ते मोक्षः क्रमभाव्येव। अतोऽनुग्रहशक्तिः क्रमदर्शने न स्वीक्रियते।

एतत्सिद्धान्तानुयायिनो मन्यन्ते यत्तेषां दर्शनं केवलं दार्शनिकाभ्युपगममात्रं नास्ति, अपि तु कालीशब्द एव निहितम्, अस्य शब्दस्य पञ्चविधकृत्यार्थकत्वात्। अस्य सर्वसिद्धान्तोत्कर्षित्वमुद्घोषयितुमेतदर्थम् "महानयः, अतिनयः" इति शब्दावपि प्रयुज्जते। यथा—

एवंविधं यदधिगन्तुमिहार्थतत्त्वं
मिथ्याविकल्पविभवोद्दलनञ्च सम्यक् ।
युक्तिं महानयमयीं न विहाय शक्यं
सर्वोत्तमोत्तमतमो हि ततो महार्थः ॥ इति ।

(म० मं० १७९)

यथा च—

श्रीकेयूरवतीतः प्रभृति श्रीचक्रभानुशिष्यान्तम् ।
सन्ततयोऽतिनयस्य प्रथिता इह षोडशैवेत्थम् ॥ इति ।

(तं० आ०, भा० ३, पृ० १९५)

शिवस्य देवत्वस्वीकारवत् काल्या देवीरूपत्वस्वीकारादिदम् 'देवीनयः' इत्यपि भण्यते । यथा--

"श्रीवीरनाथपादैः पञ्च च देवीनये कृताः शिष्याः" इति ।

(तं० आ०, भा० ३, पृ० १९६)

शिवस्योत्तरमुखनिःसृतागमाश्रितत्वात् काश्मीरोद्भूतत्वाच्चेदम् 'औत्तराम्नाय' इत्यप्युच्यते। तथाहि—(१) शिवः पञ्चवक्त्र इति तु सर्वैः स्वीक्रियत एव । शैवानामिदं परम्परागतं मतं यच्छैवागमा विभिन्नेभ्यः शिवमुखेभ्यो निःसृताः, ते चागमाः, यान् क्रमदर्शनमाश्रयति, उत्तर-मुखोद्गताः । उत्तरश्च मुखो वाम इति क्रमदर्शनप्रदर्शितो मार्गो वाममार्गः । (२) पीठेष्वेक उत्तरपीठः, स च काश्मीरम् । काश्मीरोद्भूतं च क्रमदर्शनम् । यथा—

"औत्तराम्नायाद्यशेषशास्त्रार्थावबोधशिक्षाशालित्वात्" इति ।

(म० मं०, पृ० ६)

क्रमदर्शनेतिहासः साहित्यञ्च

महार्थमञ्जरीकर्ता महेश्वरानन्दो धार्मिकदृष्ट्या, भैरवः क्रमदर्शनं भैरवीमवेदयदित्याद्या-यातिवर्णनं लिखित्वा शिवानन्दं भूलोकेऽस्य प्रथमप्रवर्तयितारं स्वीकरोति, महाप्रकाशं स्वगुरुं ततो दूरकालभाविनं मनुते च । जयरथस्तु स्वीयायामभिनवगुप्तकृततन्त्रालोकस्य टीकायां धार्मिकं कथानकमुपेक्ष्य ऐतिहासिकदृष्ट्या शिवानन्द एव क्रमदर्शनप्रवर्तयितेत्युल्लिखति । तच्छिष्यपरम्परां चेत्थं वर्णयति—

शिवानन्दस्य तिस्रः शिष्याः केयूरवती–मदनिका–कल्याणिकेति नाम्न्योऽभूवन्। तासां बहवः शिष्या आसन्, येषु गोविन्दराज–भानुक–एरकाख्या महतीं प्रसिद्धिं प्राप्नुवन्। गोविन्दराजः शिवदृष्टिकर्तुः सोमानन्दस्य गुरुरभवत्। भानुकादेका महती शिष्यपरम्परा प्रसृता, यस्याम्–उज्जटप्रभृतयो महान्तः प्रतिभाशालिनः समभूवन्। जयरथोऽप्यस्या एव सन्ततेः कस्माच्चन व्यक्तिविशेषात् क्रमदर्शनगुरुपरम्पराविषयकं ज्ञानं लब्धवान्। यथाह—

"तस्यैव चैषा श्रीमदुज्जटोद्भटादिनानागुरुपरिपाटी सन्ततिः, यत्प्रसादादासादितमहिमभिरस्माभिरेतत् प्रदर्शितम्" इति। (तं० आ०, भा० ३०, पृ० १६२)।

जयरथ एरकशिष्यपरम्परायां क्रमागतान् हृस्वनाथ–भोजराज–सोमराजाभिधांस्त्रीन् शिष्यानुल्लिखति।

उल्लिखिताद् गुरुक्रमादिदं सुस्पष्टीभवति यत् क्रमदर्शनस्योद्भव ईशवीयाष्टमशतकप्रारम्भेऽभूत्। यतः शिष्यपरम्परायामुल्लिखितस्य सोमानन्दस्य समयः सम्यङ्निश्चितः। सोऽभिनवगुप्तपादानां परमेष्ठिगुरुरासीत्। अभिनवगुप्तश्च स्वीयं क्रमस्तोत्रं नवशताधिकैकनवतितमे ईशवीयवर्षे व्यलिखदिति तत एवावगम्यते। यथाह—

"वसुरसपौषे कृष्णदशम्यामभिनवगुप्तः स्तवमिममकरोत्" इति।

अतः सोमानन्द ईशवीयनवमशतकमध्यभव ऊरीक्रियते। सोमानन्दशिवानन्दयोर्मध्ये परम्परागतौ द्वौ गुरू अभूताम्। अतः क्रमदर्शनम् ईशवीयाष्टमशतके समुद्भूदिति निष्प्रचम्।

क्रमदर्शनसाहित्यं द्विप्रकारम्—आगमाः, आगमाश्रिता ग्रन्थाश्च। क्रमसद्भावः, क्रमसिद्धिः, ब्रह्मयामलम्, तन्त्रराजभट्टारकश्च—इमे आगमाः क्रमदर्शनविचारे प्रदत्तेभ्य उद्धरणेभ्यो ज्ञायन्ते। अन्येऽप्यागमा एतद्दर्शनप्रतिपादकैः प्रमाणत्वेनाभ्युपगताः स्युरिति सम्भाव्यते, परं स्वान्वेषणानुसारं किमपि निश्चितं तद्विषये न शक्यते वक्तुम्। आगमाश्रिता बहवो ग्रन्थाः शिवानन्दादिभिर्लिखिता उपलब्धग्रन्थेषु नामकीर्तनमात्रेणापि न दृष्टिपथमायाता अद्यावधि, परं तत्कृतयोऽप्यासन्निति तन्मतोल्लेखेभ्यो ज्ञायते। उदाहरणम्—शिवानन्दः पुस्तकद्वयं व्यलिखत्। एकस्मिन्ननाख्यचक्रे पूज्या द्वादशकाल्यः, अपरस्मिंश्च त्रयोदश इति प्रत्यपादयत्। यथाह जयरथस्तन्त्रालोकटीकायाम्—

"श्रीमदवतारकनाथस्याप्यत्र त्रयोदशैव विवक्षिताः, यः श्रीगोविन्दराजादीनामपि परमगुरुत्वेन स्थितः" इति।

अथ च—"अस्य द्वादशाप्यभिप्रेताः" (तं० आ०, भा० ३, पृ० १६८) इति।

अत्रेदं मनसि सम्यङ्निधेयं यत् शिवानन्द एव क्रमदर्शनस्यावतारकत्वादत्र अवतारकनाथ इत्युक्तः।

अपरे ग्रन्था उद्धरणेभ्य एव ज्ञायन्ते, परं तत्कर्तृनामान्यप्यविदितानि। ते च—(१) क्रमसूत्रम्, क्षेमराजकृतटीकासहितम्, (२) क्रमोद्योतः, (३) पञ्चशतिकम्, (४) षडर्धशतिकम्, (५) क्रमस्तोत्रम्, अभिनवगुप्तकृतया क्रमकेलिनाम्न्या टीकया अन्याभिश्च टीकाभिः समलङ्कृतम्। इदमभिनवगुप्तकृतात् क्रमस्तोत्राद्भिन्नम्। (६) महानयपद्धतिः।

अन्ये च क्रमदर्शनविषयिका अमुद्रिता ऋजुविमर्शिन्यादयः, उद्धरणेभ्यो ज्ञाताः क्रमवासनादयः, मुद्रिताश्च महार्थमञ्जर्यादयो वर्तन्ते, यद्विषये मया स्वीये ग्रन्थे आङ्गलभाषायां लिखिते यावज्ज्ञायते तावल्लिखितमिति विशिष्टजिज्ञासुभिस्तत एवावगन्तव्यम्।

क्रमदर्शनं पञ्चकदर्शनम्

यथा सम्पूर्णं शैवदर्शनं महामाहेश्वरेणाभिनवगुप्तेन 'त्रिकम्' इति संज्ञितं तस्य सिद्धान्तस्य सामान्यतो द्विनवतिशैवागमाश्रितत्वेऽपि प्राधान्येन सिद्धा-नामक-मालिनीतिविख्याततन्त्रत्रयाश्रितत्वात्, पर-परापर-अपररूपत्रिकप्रतिपादकत्वात्, तदन्तर्गतस्य त्रिकत्रयस्य, शिव-शक्ति-तत्सामञ्जस्यरूपस्य, शिव-शक्ति-नररूपस्य, परा-अपरा-परापरादेवीरूपस्य व्याख्यायां प्राधान्येन प्रवृत्तत्वात्, भेद-भेदाभेद-अभेदरूपस्य त्रिप्रकारस्यापि ज्ञानस्य दार्शनिकदिशा स्पष्टीकरणाच्च।

तथैव क्रमदर्शनं पञ्चकदर्शनमिति शक्यते वक्तुम्, पञ्चार्थक्रमपदव्या प्रसृतत्वात्। यथाह महेश्वरानन्दः—

> इत्येनां गुरुमुखसम्प्रदायलब्धां वाचालः शुक इव वृन्दचक्रचर्याम्।
> पञ्चार्थक्रमपदवीरहस्यसंवित्सर्वस्वव्यतिकरगर्भिणीमवोचम् ॥ इति।

(म० मं० ६८)

क्रमदर्शनाभ्युपगताः परतत्त्वस्य स्फुरणधारा व्योमवामेश्वरी-खेचरी-दिक्चरी-गोचरी-भूचरीनाम्न्यः पञ्च। परशक्तयः सृष्टि-स्थिति-संहार-अनाख्य-भासारूपाः पञ्च। यद्यपि "त्रय्या वाचः परं पदम्" इति वदता भर्तृहरिणा वाक्त्रयमेव स्वीकृतम्, सोमानन्दः स्वीयशिवदृष्टौ भर्तृहरिमतं समालोच्य चतुर्थीं परां वाचं स्थापितवान्, यदनुसारं नागेशभट्टो वाचश्चतुरो भेदान् स्वीकृतवान्; तथापि क्रमदर्शनस्वीकृता वाग्भेदाः परा-सूक्ष्मा-पश्यन्ती-मध्यमा-वैखरीरूपाः पञ्च। क्रमेणार्च्यदेवताचक्राणि श्रीपीठ-पञ्चवाह-नेत्रत्रय-वृन्दचक्र-गुरुपङ्क्तिरूपाणि पञ्च। परतत्त्वस्वरूपत्वेन तदभेदेन विद्यमानाः शक्तयः चित्-आनन्द-इच्छा-ज्ञान-क्रियारूपाः पञ्च।

इयं पञ्चकाश्रया विचारधारा प्रबला आसीत्। अस्या एव कारणात् तेऽपि समुदाया येषु समुदितानां पदार्थानां संख्या पञ्चसंख्यातोऽधिका न्यूना वाऽऽसीत्, तेऽपि कथञ्चन पञ्चीकृताः। यथा श्रीपीठे आद्यस्पन्द–प्रसरणानुरूपशक्ति–प्रमाणस्फुरणरूपेन्द्रियस्पन्द–वस्तुव्यवस्थापनात्मकप्रमाण–स्फुरत्ता–पञ्चविधेन्द्रियविषयोल्लासरूपा नव कलाः सन्ति; तथापि पञ्चेन्द्रियविषयान् भिन्नतया न गणयित्वा तांश्च प्रमेयरूपतया एकीकृत्य पञ्चैव कला इत्युक्तम्। इयं पञ्चकविचारधारा मौलिकस्य काल्याः क्षेप–ज्ञान–प्रसंख्यान–गति–नाद–रूपकृत्यपञ्चकविचारस्य प्रभावात् प्रसूतेति भाति।

विकल्पसंस्कार एव मोक्षोपायः

विकल्पस्वरूपे बौद्धशैवयोर्मतभेदः। बौद्धाः—"शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः" इति, "साभिलापं विकल्पाख्याम्" (भा० भा० १, पृ० ८५) इत्यादि च वदन्तः शब्दसंस्कारोद्बोधसहितं ज्ञानं विकल्पं स्वीकुर्वन्ति। तथा च परतत्त्वं प्रकाशविमर्शस्वरूपं निर्विकल्पकं चेति वदतां शैवानां मतमित्थं दूषयन्ति—

"तत्र विमर्शोऽभिलापात्मना शब्देन योजित एव, तद्योजनाकृतं च विकल्परूपत्वं शुद्धेऽपि परमेश्वरे प्राप्तम्। न चैतदिष्टम्, तस्य संसारे मायात्मन्युपपत्तेः" इति।

(भा०, भा० १, पृ० ३०१–२)

शैवाश्चेत्थं प्रतिवदन्ति—

प्रकाशस्य शुद्धसंविद्रूपस्य सारस्वभावो विच्छेदशून्योऽन्तरभ्युपगमकल्पोऽनन्यमुखप्रेक्षित्वरूपस्वातन्त्र्यविश्रान्तिरूपः 'अहम्' इति प्रत्यवमर्शः। असौ विकल्पो न भवति। नह्यस्य विकल्पलक्षणमस्ति। विकल्पो हि विविधा कल्पना। विविधत्वेन च शङ्कितस्य कल्पोऽन्यव्यवच्छेदनम्। अतो विकल्पेऽवश्यं निश्चेतव्य–अपोहितव्यरूपं द्वयं भवति, यतो विकल्पो द्वयापेक्षी विनिश्चयः। नहि परावाग्वपुष्यहंप्रत्यवमर्शेऽपोहितव्यं किञ्चनास्ति।

एवं संस्कारोऽपि द्विधा भवति। कस्मिंश्चिद् वस्तुनि कस्यचन गुणस्याधानेन, यथा तिलेषु पुष्पसुगन्ध्याधानेन। अथवा कस्यचनानपेक्षितांशस्य निष्कासनेन, यथा रजको मलनिष्कासनरूपं पटस्य संस्करणं करोति। अतस्तस्माद् विभिन्नांशाद्विकल्पाद् यस्मिन् साधकेन मनः स्थिरीक्रियतेऽसारभूतानामत एवानपेक्षितानामंशानां दूरीकरणमेव क्रमनये विकल्पसंस्कारः।

'क्व चेतः स्थिरीकार्यम्?' इति प्रश्नस्योत्तरमिदम्। यत्र कुत्रापि साधकस्य मनः स्थैर्यं गच्छतु, यतः सर्वं ब्रह्ममयं सर्वात्मकञ्च। यथाह—

अथवास्मद्दृशि प्राणधीदेहादेरपि स्फुटम्।
सर्वात्मकत्वात् तत्रस्थोऽप्याभासोऽन्यव्यपोहनम्॥ इति।

यथा चाह जयरथः स्वटीकायाम्—

"पराद्वयदर्शने 'प्रदेशोऽपि ब्रह्मणः सार्वरूप्यमनतिक्रान्तश्चाविकल्प्यश्च' इति नीत्या देहादेरपि संविद्रूपत्वेन सर्वात्मकत्वात्" (तं० आ०, भा० ३, पृ० १०५) इति। अत्र प्रमाणभूतं श्रीपूर्वशास्त्रवाक्यमित्थम्—

किन्त्वेतदत्र देवेशि नियमेन विधीयते।
तत्त्वे चेतः स्थिरं कार्यं तच्च यस्य यथास्त्विति॥

परन्त्वस्मिन् प्रसङ्गे विकल्प-बाह्यवस्तुनोर्भेदः सम्यङ्मनसि निधेयः। बाह्यवस्तुनो हि विकल्पजनकत्वेनैव परिग्रहः, न तु चक्षुर्द्वारा चित्तैकाग्र्यविषयत्वेन। एतच्च शैवानां प्रमाणमीमांसासिद्धान्तस्योपरि दृष्टिपातेन स्पष्टीभवति। स चेत्थम्—शैवा बौद्धवत् "अर्थाऽसंस्पर्शिनो विकल्पाः" इति सिद्धान्तमभ्युपगच्छन्ति। बुद्धिश्च प्रमातुर्बहिर्मुखं रूपम्, यस्यां बाह्यो विषयः प्रतिबिम्बितो भवति, ततश्च या सङ्कोचं गच्छति। यथाह क्षेमराजः—

"चितिरेव चेतनपदादवरूढा चेत्यसंकोचिनी चित्तम्" इति।

मनश्च बुद्धिप्रतिबिम्बितविषयांशेषु कांश्चन उपेक्षते, अपरांश्च संयोजयति वियोजयति वा। यथाह उत्पलाचार्यः—

तद्द्वयालम्बना एता मनोऽनुव्यवसायि सत्।
करोति मातृव्यापारमयीः कर्मादिकल्पनाः॥ इति।

(भा०, भा० २, पृ० ४१)

परन्तु शैवा बौद्धवद् ज्ञानानां क्षणिकत्वमप्यूरीकुर्वन्ति। अतोऽयं प्रश्नो जागर्ति क्वास्ति स विषयः, यं मनो विकल्पयति। शैव इत्थमुत्तरं ददाति—स्यादस्य प्रश्नस्यावकाशो यदि विकल्पः स्वतन्त्रो भवेत्। यावता प्रमातुरसौ व्यापारः, प्रमाता च पूर्वानुभवान्तःस्वसंवेदनरूपः। तदस्य चायमेव पूर्वानुभवसंस्कारो यद्विकल्पनव्यापारकालेऽपि पूर्वानुभवात्मत्वमनुज्झन्नेवास्ते। ततः पूर्वानुभवो यावत् स्वलक्षणात्मा तावत् पूर्वानुभवतादात्म्यापन्नप्रमातृ-

तत्त्वव्यापारोऽपि विकल्पस्तद्विषय एव। अतो विकल्पशोधने बुद्धौ प्रतिबिम्बितस्य मनसा च संयोजनवियोजनरूपव्यापारेण विकल्पितस्य विषयस्य शोधनं क्रियते। तच्चैवम्—"तत्त्वपक्षपातो हि धियां स्वभावः" इति नीत्या तत्त्वान्वेषि प्रेक्षकमनो यथा दुःष्यन्तभूमिकावलम्बनवेलायां वस्तुनो नटस्य नटत्वेऽपि दुष्यन्तरूपतयाऽवभासमानान्नटाद् भूमिकावलम्बनार्थं परिगृहीतान् वस्त्राभूषणवर्णादीन् वियोज्य नटं वेत्ति, तथैव तत्त्वग्रहणपरं साधकचेतो विषयस्फारणवेलायां विषयरूपाच्छन्नात् संवित्तत्त्वात् तदाच्छादकान् विषयांशान् अपास्य संवित्तत्त्वं साक्षात्करोति। अयं क्रमदर्शनाभ्युपगतो विकल्पसंस्कारप्रकारः।

विकल्पसंस्कारस्योपायः सत्तर्कः, नैयायिकानां परपराजयपरात् शुष्कतर्काद्भिन्नः। अयं च पातञ्जलयोगस्वीकृतेभ्योऽष्टयोगाङ्गेभ्योंऽशतो भिन्नेषु शैवाभ्युपगतेषु षड्योगाङ्गेषु सर्वोत्तमः। यथोक्तम्—

प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा।
तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते॥ इति।

तथा—

श्रीपूर्वशास्त्रे तत् प्रोक्तं तर्को योगाङ्गमुत्तमम्।
हेयाद्यालोचनात् तस्मात् तत्र यत्नः प्रशस्यते॥ इति।

(तं० आ०, भा० ३ पृ० १४-१५)

अयं हि विकल्पे यद् हेयं तद् आलोचयति। उपादेयाच्च हेयमपास्य तत्त्वज्ञानं जनयति।

अपोहनक्रमः

साहित्यानुशीलननाटकदर्शनाभिव्यक्तरसप्रतिपादयितारः स्वीकुर्वन्तीदं यद् योगाभ्यासेन विनैव, केवलात् काव्यानुशीलनाद् रङ्गमञ्चे नाट्यमाननाटकदर्शनाच्च भवति सहृदये ब्रह्मानुभवो ब्रह्मास्वादसहोदरो वाऽनुभवः। यथाह भट्टनायकः—

वाग्धेनुर्दुग्ध एकं हि रसं यद्बालतृष्णया।
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः॥ इति।

(ध्व० लो० पृ० ६१-६२)

योग्यनुभूतादानन्दात् सहृदयानुभूतस्यानन्दस्यायं विशेषः—योगी बलात्कारेण आनन्दरूपब्रह्मतन्मयीभावभावनाप्रकर्षं संपाद्य रसावेशेन विना ब्रह्मानन्दमनुभवति। सहृदयस्तु विभावानुभावव्यभिचारिभावावबोधनोत्तरमेव तन्मयीभवनयुक्त्या तद्विभावाद्युचितोद्बुद्धस्थायि-

भावसंमिश्रणाभिव्यक्तरसानुरञ्जितं संविदानन्दमनुभवति। एवं चोभयोराक्रान्त्यनाक्रान्तिकृतः सरसत्वनीरसत्वनिष्ठश्च भेदः। यथाहाभिनवगुप्तपादाचार्यो लोचने—

"तदावेशेन विनाप्याक्रान्त्या हि यो योगिभिर्दृश्यते" इति।

(ध्व० लो०, पृ० ६२)

एवमेव क्रमदर्शनमपीदं प्रतिपादयति यत् संविदानन्दानुभवरूपो मोक्षो योगाभ्यासं विनैव सत्तर्करूपकुठारेण दुर्भेदद्वैतपादपस्य समूलं कृन्तनात् प्राप्यते। यथाह—

दुर्भेदपादपस्यास्य मूलं कृन्तन्ति कोविदाः।
धारारूढेन सत्तर्ककुठारेणेति निश्चयः॥ इति।

(तं० आ०, भा०, ३, पृ० १२)

अपरञ्च साहित्यविद्भिः रसानुभवे स्तरत्रयमूरीक्रियते। प्रथमे स्तरे प्रस्तावनागतगीतातोद्यचर्वणाविस्मृतसांसारिकभावतया विमलमुकुरकल्पीभूतनिजहृदयः प्रतिभाशाली सहृदयो दृश्यदर्शनध्वनियुक्तश्रव्यश्रवणानन्तरं स्वप्रतिभया कविमनोगतचित्रसदृशं विभावानुभावव्यभिचारिणां देशकालव्यक्तिविशेषसम्बन्धशून्यं चित्रं स्वान्तःकरणे चित्रयति। वासनारूपेण स्थितस्य विभावादिसमुचितस्य स्थायिभावस्य जागरणात् तेन च सह विभावानुभावव्यभिचारिभावानां पानकरसन्यायेन संमिश्रणादभिव्यक्तं रसमनुभवति च।

द्वितीये स्तरे सहृदयचेतसः चर्व्यमाणरससारग्रहणपरत्वाद् अपासितविभावादिः स्थाय्येव चर्वणापात्रम्। यतोऽप्रधाने वस्तुनि न कस्यचित् संविद् विश्राम्यति, अप्रधानवस्तुप्रत्ययस्य प्रधानान्तरं प्रत्यनुधावतः स्वात्मनि अविश्रान्तत्वात्। अतो विभावानुभाववर्गे स्थायिना संमिश्रितेऽपि स्थाय्येव चर्व्यते। यथाह अभिनवगुप्ताचार्यः—

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने बद्धदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम्।
दर्भैरर्धावलीढैः श्रमविततमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति॥

इत्यादिवाक्येभ्यो वाक्यार्थप्रतिपत्तेरनन्तरं मानसी साक्षात्कारात्मिकाऽपहसिततत्तद्वाक्योपात्तकालादिविभागा तावत्प्रतीतिरुपजायते। तस्यां च यो मृगपोतकादिर्भाति तस्य विशेषरूपत्वाभावाद् भीत इति त्रासकस्यापारमार्थिकत्वाद् भयमेव, परं देशकालाद्यनालिङ्गितम्। तत एव

'भीतोऽहं भीतोऽयं शत्रुर्वयस्यो मध्यस्थो वा' इत्यादिप्रत्ययेभ्यो दुःखसुखादिकृतहानादिबुद्ध्यन्तरोदयनियमवत्तया विघ्नबहुलेभ्यो विलक्षणं निर्विघ्नप्रतीतिग्राह्यं साक्षादिव हृदये निविशमानं चक्षुषोरिव विपरिवर्तमानं भयानको रसः। (अ० भा०, भा० १, पृ० २८०)।

तृतीये तु स्तरे विषयविषयिरूपं द्वैतं सर्वथा व्यपगच्छति, संविदः पूर्णतयाऽन्तर्मुखीभूतत्वाद् विषयतयाऽवभासमानस्य उद्बुद्धस्य स्थायिनोऽपि वासनायां प्रतिमज्जनात्। एवं चाभिनवगुप्तमते तृतीयस्तरे रसानुभवः परमानन्दानुभवो व्यतिरेकतुरीयातीतसमाधावनुभूयमानादनुभवादभिन्नः, सर्वस्यापि वैषयिकज्ञानस्य वासनायां निमग्नत्वाच्छुद्धस्य संविदात्मन आनन्दरूपे स्वस्वरूपे भानाच्च। यथाह प्रत्यभिज्ञाविवृतिविमर्शिन्याम्—

"मधुरादिरसास्वादे तु विषयस्पर्शव्यवधानम्, ततोऽपि काव्यनाटकादौ तद्व्यवधानशून्यता, तद्व्यवधानसंस्कारानुवेधस्तु तत्रापि, परन्तु तथोचितव्यवधानांशतिरस्क्रियासावधानहृदया लभन्त एव परमानन्दम्" (ई० प्र० वि० वि०, भा० २, १७८–१७६) इति।

तथा च अभिनवभारत्याम्—"अस्मन्मते तु संवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखाशङ्का" (अ० भा०, भा० १, पृ० २६३) इति।

रसानुभवे क्रमभाविनः स्तरत्रयस्य दृष्टान्तेन स्पष्टीकर्तुमिष्टस्य क्रमभाविनः क्रमदर्शनाभ्युपगतमोक्षस्य दार्ष्टान्तस्य सम्यगवबोधाय काल्याः प्रागुक्तव्यापारपञ्चकाद् ज्ञान-गति-नाद-रूपाणां त्रयाणां व्यापाराणां स्वरूपं सम्यक् स्मर्तव्यम्।

(१) ज्ञाने बहिःस्फारितस्य 'इदमिदं नानिदम्' इति प्रतिनियततयाऽवस्थापनरूपस्य विकल्पस्य पश्चाद् भेदितस्याविकल्पनं स्वात्माऽभेदेन परामर्शः क्रियते। अतो ज्ञाने सर्वं विषयजातं प्रमात्रैकात्मना 'सर्वमिदम् अहमेव' इत्येवं रूपेण भाति, यथा वेदान्तनये "सर्वं खल्विदं ब्रह्म" इति रूपेण। परं नेदं शुद्धं निर्विकल्पकं ज्ञानम्; ज्ञातृज्ञेयरूपस्य द्वैतस्य सर्वशब्दद्योतितस्य विषयगतबहुत्वस्य च भानात्। अत एवाभिनवगुप्तपादैरिदं ज्ञानं शुद्धविद्यात्मकं विकल्पज्ञानमित्युच्यते। यथाह—

तदेव तु समस्तार्थनिर्भरात्मैकगोचरम्।
शुद्धविद्यात्मकं सर्वमेवेदमहमित्यलम्॥

इदं विकल्पनं शुद्धविद्यारूपं स्फुटात्मकम् ।

प्रतिहन्तीह मायीयं विकल्पं भेदभावकम् ॥ इति ।

(तं० आ०, भा० ३, पृ० ११६-११७)

(२) गतौ गत्युपसर्जनायां प्रातौ तु सर्वं विषयजातं संविल्लक्षणं स्वरूपमारोहति, न देवदत्तो यथा कटम्, अपि तु प्रतिबिम्बो यथा दर्पणम् । एवञ्च यथा प्रतिबिम्बस्य दर्पणाव्यतिरिक्तत्वेऽपि व्यतिरिक्ततयाऽवभासनम्, तथैव विषयजातस्य संविदि । तच्च विषयजातं न पारस्परिकभेदेन, अपि तु सामान्ययेदन्तया विशुद्धप्रमातृसंलग्नम् 'अहमिदम्' इत्येवं भासते, यथा वेदान्तनये 'सर्वं खल्विदं ब्रह्म' इत्यस्मात् सर्वांशस्य निराकरणे 'इदं ब्रह्म' इत्यात्मब्रह्मणोरभेदादेकस्यापरपर्यायत्वाच्च 'अहं ब्रह्म' इत्येव भानं भवति ।

(३) नादे तु सारार्थाकर्षणरूपेण निष्पीडनेन तेषामविकल्पादिरूपाणां सर्वेषां वैषयिकज्ञानगत्यादीनां विलोपनाद् अपहस्तनात् स्वात्मपरामर्शशेषतैव 'अहम्' इत्येव भाति । यथाह जयरथस्तन्त्रालोकटीकायाम्—

"संविदेव हि आश्यानीभूता नीलादिरूपतामधिशयाना प्रमाणोपारोहद्वारेण तद्रूपतां विलाप्य प्रमातरि विश्रान्तिमभ्युपगच्छन्ती स्वेन प्रमात्रेकात्मना रूपेण स्फुरति" (तं० आ०, भा० ३, पृ० १४१) इति ।

अथ च—

"प्रमाणप्रमेयाभ्यामप्यतिक्रान्तं प्रमातृलक्षणं ज्योतिरवभासत एव" (तं० आ०, भा० ३, पृ० १४२) इति ।

एवं यथा नाटकदर्शनाभिव्यक्तरसास्वादे त्रयः स्तरास्तिस्रो वा भूमिका भवन्ति क्रमशः, परमानन्दानुभवश्च तृतीयस्यां भूमिकायामेव जायते, प्रथमभूमिकायां सम्मिलितरूपेण विभावानुभावव्यभिचारिस्थायिनाम्, द्वितीयस्यां च केवलस्य स्थायिनो विषयरूपेण वर्तमानत्वात् । तथैव क्रमदर्शनानुसारं पूर्णा मुक्तिस्तृतीयस्तरप्राप्तावेव भवति, यस्मिन् विषयस्य सर्वथाऽभावः । न त्वादिमे स्तरद्वये । प्रथमे स्तरे सर्वविशिष्टस्य द्वितीये च निर्विशेषस्य 'इदमः' वर्तमानत्वात्, तयोः स्तरयोः 'अहमिदं सर्वम्', 'अहमिदम्' इत्यनुभवयोः क्रमेणानुभूयमानत्वात् ।

वैष्णवानां परप्रकृतिसायुज्यरूपो मोक्षः, ब्रह्मवादिनामानन्दरूपतारूपः, विज्ञानवादिनां विशुद्धचित्तमात्ररूपः, वैभाषिकाणां प्रदीपवत् सन्ततिक्षयरूपश्च मोक्षः कथं क्रमदर्शनदृष्ट्या

प्रलयाकलतामयः, क्रमदर्शनप्रतिपादितस्य राजयोगस्य हठयोगात् को भेदः, क्रममार्गानुसारिभिः पूज्यानां द्वादशकालीनां किं स्वरूपम्, पूजा का? इत्यादीन् व्याख्यातुमिष्टानपि विषयान् समयस्य स्वल्पीयस्त्वात् परित्यजन् सप्रमाणोपन्यासं संक्षेपेण व्याख्यातेऽस्मिन् दर्शने भवद्विचार-विनिमयमस्मिन् महति सम्मेलनेऽन्यत्र च आशंसमान इदं नीरसं व्याख्यानं सावधानं शृण्वद्भ्यो विद्वद्भ्यः शतशो धन्यवादान् ददद् विरमामि।

॥ इति शम् ॥

कुलदर्शनम्

अभिनवगुप्तपादः क्रमशः क्रम-कुल-प्रत्यभिज्ञाख्यानि त्रीण्यद्वैतशैवदर्शनानि व्याचख्यौ, परतत्त्वसाक्षात्काराय तत्प्रदर्शितानि चर्या-योग-ज्ञानमार्गाणि च क्रमशोऽनुससार। परं साक्षात्कृतवान् परतत्त्वं न क्रम-प्रत्यभिज्ञाप्रदर्शितपथिभ्यामपि तु कुलपथैव। यथोक्तं तेनैव—

श्रीभट्टनाथचरणाब्जयुगात्तथा श्रीभट्टारिकाङ्घ्रियुगलाद् गुरुसन्ततिर्या।
बोधान्यपाशविषनुत्तदुपासनोत्थबोधोज्ज्वलोऽभिनवगुप्त इदं करोति॥ इति।

(तं० आ०, भा० १, पृ० ३३)

यथा च जयरथेन —

"एवं च तन्त्रप्रक्रियोपासन्नगुर्वभिमुखीकरणानन्तरं विश्रान्तिधामतया कुलप्रक्रियागुरुमप्युत्कर्षयति" (तं० आ० टी०, भा० १, पृ० ३१) इति।

मधुराजयोगिविरचितध्यानश्लोकाश्रिते मत्प्रकाशिते अभिनवगुप्तचित्रे शिवरसकरकं पूर्णताम्बूलपेटीं बिभ्रतीभ्यां दूतीभ्यामप्युपर्युक्तमतं समर्थ्यते।

कुलशब्दार्थाः

संस्त्यानार्थकाद् बन्ध्वर्थकाच्च कुलधातोः "इगुपधज्ञाप्रीकिरः कः" (३-१-१३५) इति पाणिनिसूत्रानुसारं कृतकप्रत्ययात् कुलशब्दः सिध्यति। भट्टोजीदीक्षितानुसारञ्च 'बन्धुशब्देन तद्व्यापारो गृह्यते' (सि० कौ० ३६२)। बन्धुशब्दश्च बन्धनार्थाद् बन्धधातोः "शस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च" (१०) इत्युणादिसूत्रेण उप्रत्यये कृते सिध्यति। तथा च कुलशब्दस्येमेऽर्थाः —

१. सर्वेषां स्थूलानां सूक्ष्माणां परेषां च पदार्थानां समूहो यस्मिन् सर्वम्—विभिन्नप्रकारकाः प्रमातारः, प्राणाः, ज्ञानेन्द्रियाणि, कर्मेन्द्रियाणि, यत्किमपि विषयस्वरूपम्, यच्च किमपि कार्यकारणसम्बन्धेन सम्बद्धम्—अन्तर्गतम्।

२. परप्रकाशरूपो बोधः शिवादिधरण्यन्तषट्त्रिंशत्तत्त्वरूपेण क्रमशः स्त्यानीभवतीति कौलानामभ्युपगमः। स्त्यानीभवनञ्च वेदितृस्वभावन्यग्भावाद् वेद्यतोत्कर्षात्मकं काठिन्यम्। बोधश्चाश्यानतायामपि न स्वस्वरूपं परित्यजति हिममिव जलत्वम्। यथाह —

स्त्यानस्य क्रियावशादिक्षूरसस्येव शिवप्रकाशस्य ।
गुडपिण्डा इव पञ्चापि भूतानि मधुरतां न मुञ्चन्ति ॥ इति ।

(म० मं०, का० २५)

एवञ्च सर्वमपि पदार्थजातं स्वतन्त्रबोधस्याश्यानरूपतया बोधस्वरूपम्; तथापि तत्स्वातन्त्र्यादेवास्य बन्धकत्वाभिमानः । अतो बन्धकत्वेनाभिमतः सर्वोऽपि पदार्थसार्थः कुलशब्दवाच्यः ।

३. आगमेषु उपर्युक्तदिशा कुलशब्दवाच्यः सर्वोऽपि पदार्थः परभैरवमानो रश्मिपुञ्जत्वेन स्वीकृतः । रूपकञ्चेदं व्यनक्ति यत् प्रमातृप्रमाणप्रमेयात्मकं तदतिक्रान्तञ्च परभैरवात्तथैव स्फुरति, तेन च तथैव सम्बद्धं यथा सूर्येण तद्रश्मयः । परमिदं सर्वं परसंवित्तादात्म्यापन्नो ज्ञानी स्वात्माभेदेनानुभवति । अतो ज्ञानिना स्वात्माभेदेनानुभूयमानं समस्तं भावजातं कुलशब्दाभिधेयम् ।

४. निराभासं परं तत्त्वं यच्छिवशक्त्यादीन् सर्वानपि पदार्थानाभासयति, तदपि कुलशब्दाभिधेयम् । यथाह —

यत्रोदितमिदं चित्रं विश्वं यत्रास्तमेति च ।
तत्कुलं विद्धि सर्वज्ञ शिवशक्तिविवर्जितम् ॥ इति ।

(तं० आ०, भा० २, टी० ७५)

५. विषयरूपजगदर्थमप्ययं शब्दः प्रयुज्यते । यथाह—"कुलस्य शाक्तप्रसरात्मनो जगतः" (तं० आ०, भा २, टी० ७६) इति ।

६. परमेशस्य सर्वोर्ध्ववर्तिनी स्वातन्त्र्यशक्तिरपि कुलशब्दाभिधेया । यथाह —

कुलं च परमेशस्य शक्तिः सामर्थ्यमूर्ध्वता ।
स्वातन्त्र्यमोजो वीर्यं च पिण्डः संविच्छरीरकम् ॥ इति ।

(तं० आ०, आ० २९, पृ० ३)

७. प्राणदेहाद्यर्थे, यथाह —"कुलस्य प्राणदेहादेः" इति (प० त्रिं०, ३६) ।

८. शिवशक्त्योः सामरस्यरूपसंयोगार्थे, यथाह —"कुले शिवशक्त्यात्मनि" इति (प० त्रिं०, ३६) ।

९. तस्य परतत्त्वस्यार्थे यस्यान्तः पृथिव्यादिपञ्चब्रह्मान्तः सर्वोऽपि भावौघ आस्ते। यथाह—"तस्यैव कुलस्यान्तः पृथिव्यादीनि यावद् ब्रह्मपञ्चकम्" (प० त्रिं०, २०८) इति।

१०. परभैरवविमर्शरूपशक्त्यर्थे, यथाह—"कुलशक्तेरत्रैव निवेशात्, कलनात्मिका हि विमर्शशक्तिः, तामन्तरेणाकुलमपि तुरीयातीतं नाम न किञ्चित्" इति (प० त्रिं०, १६४–५)।

११. शरीरार्थे, यथाह—"अविद्यमानं मृतं यत्र तत् 'कुलं' शरीरं यस्य" इति (तं० आ०, आ० ६, पृ० ५)।

१२. अनाख्यपदार्थे, यथाह—"कुलं पदमनाख्यम्" इति (तं० आ०, आ० १, पृ० ६)।

१३. आकारार्थे, यथाह—"'कुलम्' आकारो यस्य" इति (तं० आ०, आ० १, पृ० १२)।

१४—नित्यानामशक्त्यर्थे यथाह—

कुलं शक्तिः समाख्याता सा च नित्या प्रकीर्तिता। इति।

(तं० आ०, आ० २०, पृ० ५१)

कुलदर्शनस्य नामानि

१. इदं दर्शनम् 'कुल' इति नाम्नाऽभिधीयते यत एतद्दर्शनानुसारं परं तत्त्वम् 'कुल' इत्युच्यते। इदं तत्त्वं शिवतत्त्वादप्युपरिवर्ति, अस्मादेव समस्तं जगदुद्भवति, अस्मिन्नेव स्थितिं भजते, लयञ्च गच्छति। यथाह—

यत्रोदितमिदं चित्रं विश्वं यत्रास्तमेति च।
तत्कुलं विद्धि सर्वज्ञ शिवशक्तिविवर्जितम्॥ इति।

(तं० आ० भा० २, ७५)

पूर्णपरसंवित्तत्त्वलक्षणं प्रकाशैकरूपं सर्वथा च स्वतन्त्रमिदं शिवशक्त्यादिशब्दैरप्यव्यपदेश्यम्, अनुत्तरानुत्तरयोस्तथैवैकीभावरूपं यथा "अतो गुणे" इति पाणिनिसूत्रानुसारमकारद्वयमेकीभवति।

२. इदं दर्शनम् 'कौल' इति नाम्नाप्यभ्युद्यते, सर्वदर्शनेभ्यश्चोत्तमं स्वीक्रियत आगमेषु। यथाह—

वेदादिभ्यः परं शैवं शैवाद्वामं च दक्षिणम्।
दक्षिणाच्च परं कौलं ततो परतरं नहि॥ इति।

(तं० आ०, भा० १, ४८)

३. अर्धत्र्यम्बकमठिका इति तृतीयं कुलदर्शनस्य नाम। 'अर्धत्र्यम्बकः' इति नामकरणस्य कारणमिदम्—

त्रीणि दर्शनानि—अद्वैत-द्वैत-द्वैताद्वैतप्रतिपादकानि श्रीकण्ठाज्ञया क्रमशस्त्र्यम्बक-आमर्दक-श्रीनाथनामकैः सिद्धैः प्रतिपादितानि। त्र्यम्बकस्यैका दुहिता आसीत्। तस्या सुतेन मच्छन्देन मीनापरनाम्ना कुलदर्शनं प्रथमं कलियुगे प्रकटीकृतम्। त्र्यम्बकदुहितृवंशसमुद्भूतत्वादस्य 'अर्धत्र्यम्बकः' इति नाम। यथाह—

श्रीमच्छ्रीकण्ठनाथाज्ञावशात् सिद्धा अवातरन्।
त्र्यम्बकामर्दकाभिख्यश्रीनाथा अद्वये द्वये॥
द्वयाद्वये च निपुणाः क्रमेण शिवशासने।
आद्यस्य चान्वयो जज्ञे द्वितीयो दुहितृक्रमात्॥
स चार्धत्र्यम्बकाभिख्यः सन्तानः सुप्रतिष्ठितः।
अतश्चार्धचतस्रोऽत्र मठिकाः सन्ततिक्रमात्॥ इति।

(तं० आ०, भा० १, २६)

एतच्चाग्रे इतिहासवर्णनावसरे स्पष्टीकरिष्यते।

कुलदर्शनेतिहासः

इदं दर्शनमिशवीयपञ्चमशतके समुदभूत्। एतन्मतसमर्थकानि कारणानीमानि—

१. सोमानन्दः स्वीयशिवदृष्टौ स्वीयां वंशपरम्परां वर्णयन्नात्मानं कलौ अद्वैतशैवागमप्रचारकात् त्र्यम्बकात् सन्ततिक्रमे एकोनविंशतितमं कथयति। सोमानन्दश्चाभिनवगुप्तपादानां परमेष्ठिगुरुरासीत्। अतः स ईशवीयनवमशतकभवः स्वीक्रियते। एवञ्च यदि प्रत्येकं सन्ततेराधुनिकेतिहासज्ञमतानुसारं पञ्चविंशतिवर्षपरिमितः कालः स्वीक्रियते तर्हि सोमानन्दस्त्र्यम्बकात् पञ्चाशदधिकचतुःशतवर्षानन्तरं जात इत्यायाति। तथा चेदं स्पष्टीभवति यत् कलौ अद्वैतशैवागमप्रथमप्रचारकस्त्र्यम्बक ईशवीयचतुर्थशतकमध्यभवः। यथाह—

कैलासाद्रौ भ्रमन् देवो मूर्त्या श्रीकण्ठरूपया।
अनुग्रहायावतीर्णश्चोदयामास भूतले॥

मुनिं दुर्वाससं नाम भगवानूर्ध्वरेतसम् ।
नोच्छिद्येत यथा शास्त्रं रहस्यं कुरु तादृशम् ॥
ततः स भगवान् देवादादेशं प्राप्य यत्नवान् ।
ससर्ज मानसं पुत्रं त्र्यम्बकादित्यनामकम् ॥
....
यावत् पञ्चदशः पुत्रः सर्वशास्त्रविशारदः ॥
....
तेन यः स च कालेन काश्मीरेष्वागतो भ्रमन् ॥
नाम्ना स संगमादित्यो वर्षादित्योऽपि तत्सुतः ।
तस्याप्यभूत् स भगवानरुणादित्यसंज्ञकः ॥
आनन्दसंज्ञकस्तस्मादुद्बभूव तथाविधः ।
तस्मादस्मि समुद्भूतः सोमानन्दाख्य ईदृशः ॥ इति ।

(शि० दृ०, पृ० २२१)

२. अद्वैतद्वैतद्वैताद्वैतशैवदर्शनेभ्यो भिन्नं चतुर्थं कुलाख्यं शैवदर्शनं त्र्यम्बकस्य दौहित्रः समस्थापयत् । अत एवास्यार्धत्र्यम्बकमठिकेत्यपरं नाम । इदं च स्पष्टीभवत्यभिनवगुप्तकृतस्य तन्त्रालोकस्योपरि दृष्टिदानेन ।

(अ) भूमिकायां सः स्वीयं कुलप्रक्रियागुरुं वन्दते । यथाह—

एवञ्च तन्त्रप्रक्रियोपासन्नगुर्वभिमुखीकरणानन्तरं विश्रान्तिधामतया कुलप्रक्रियागुरुमप्युत्कर्षयति---

जयताद् जगदुद्धृतिक्षमोऽसौ
भगवत्या सह शम्भुनाथ एकः । इति ।

(तं० आ०, भा० १, ३१)

(आ) अवसाने विभिन्नान् स्वगुरून् कीर्तयन् सोमदेवशिष्यं शम्भुनाथं कुलेतिप्रसिद्धचतुर्थशैवदर्शनगुरुमुल्लिखति । यथाह—

तुर्याख्यसन्ततिमहोदधिकर्णधारः
श्रीसोमतः सकलवित् किल शम्भुनाथः ॥ इति ।

(तं० आ०, भा० १२, पृ० ४१४)

(इ) सोमदेवस्य गुरुः सुमतिनाथनामाऽभूत्, यथाह—"श्रीसुमतिनाथस्य सोमदेवः शिष्यः, तस्य श्रीशम्भुनाथः, यद् वक्ष्यति—'श्रीसोमतः सकलवित् किल शम्भुनाथः'" इति (तं० आ०, भा० १, पृ० २३६)।

(ई) कलौ कुलदर्शनस्य प्रवर्तयिता अर्धत्र्यम्बकमठिकायाः स्थापकश्च मच्छन्द-मीनेत्याद्यपरनामा मत्स्येन्द्रो बभूवेति प्रागुक्तम्। तस्य पत्न्या नाम कुङ्कुणाम्बा इत्यासीत्। तस्य च षट् पुत्रा अभूवन्। येषां नामानिः—(१) अमरनाथः, (२) वरदेवः, (३) चित्रनाथः, (४) अलिनाथः, (५) विद्यानाथः, (६) गुडिकानाथ इति। तेषां पत्नीनां नामानि क्रमशः—(१) सिल्लाई, (२) एरुणा, (३) कुमारी, (४) बोधाई, (५) महालच्छी, (६) अपरमेखला इत्यासन्। इमे राजपुत्रा इत्युक्ताः। एषां स्थानादिनिर्देशश्च कृतः। अत इदं प्रतिभाति यन्मच्छन्द एको राजाऽभूत्। यथाह —

षण्णां वै राजपुत्राणां घरपल्लिक्रमं शृणु।
अमरस्य तु पट्टिल्लो दक्षिणावर्तपल्लिका॥
वरदेवे करविल्लं पल्ली कुम्भरिका भवेत्।
अम्बिल्लं चैव चित्रस्य विल्लं पल्ली सुमध्यमे॥
अलिनाथे पुलिन्देति अडवी पल्लीरुच्यते।
शरविल्लं विन्ध्यनाथे पल्ली चाक्षरसंहिता॥
गुडिकानाथपादानामडविल्लं घरं प्रिये।
डोम्बी पल्ली च निर्दिष्टा .... ॥ इति।
त्रिपुरोत्तरे निकेतं सिद्धिस्थानञ्च तद्विदुः।
अमरस्य वरारोहे वरदेवस्य कामरू॥
चित्रस्य अट्टहासं वै देवीकोट्टमलेस्तथा।
दक्षिणं चैव विन्ध्यस्य गुडिका कौलगिर्यता॥ इति च।

(तं० आ०, आ० २९, पृ० २९)

(उ) स्वीयतन्त्रालोकस्य अष्टाविंशतितमे आह्निके अभिनवगुप्तपादो देवीयामलतन्त्रस्य द्वापञ्चाशाह्निकानुसारं दश कुलदर्शनगुरून् कीर्तयति। तेषां नामानीमानि —(१) उच्छुष्मः, (२) शबरः, (३) चण्डगुः, (४) मतङ्गः, (५) घोरः, (६) अन्तकः, (७) उग्रः, (८) हलहलकः, (९) क्रोधी, (१०) हुलुहुलुरिति। यथा —

उच्छुष्मशबरचण्डगुमतङ्गघोरान्तकोग्रहलहलाः ।

क्रोधी हुलुहुलुरेते दश गुरवः शिवमयाः पूर्वे ॥ इति ।

(तं० आ०, आ० २८, पृ० १६६-७)

(ऊ) तन्त्रालोकस्यैकोनत्रिंशाह्निके यस्मिन्नर्च्यकुलगुरूणां नामानि निर्दिष्टानि, जयरथः त्रिचत्वारिंशश्लोकस्य भूमिकायामिमं प्रश्नमुत्थापयति—

"ननु श्रीदेवीपञ्चशतिकादौ--

निष्क्रियानन्दनाथश्च ज्ञानदीप्त्या सहैकतः ।

विद्यानन्दश्च रक्ता च द्वितीयं कथितं तव ॥

शक्त्यानन्दो महानन्दा तृतीयं सिद्धपूजितम् ।

शिवानन्दस्तथा ज्ञेया समया तच्चतुर्थकम् ॥

इत्याद्युक्त्या अन्येऽपि सपत्नीका गुरव उक्तास्तद्वदिहापि कथं नोच्यते ।"

अभिनवगुप्तस्योत्तरं चेदं यत् ते न कीर्तिताः । यतस्ते केवलं स्मर्तव्याः, न तु पूज्याः । यथाह--"ते विशेषान्न संपूज्याः स्मर्तव्या एव केवलम्" (तं० आ० आ० २९, पृ० ३२) इति ।

एवञ्चेदं स्पष्टीभवति यद् मच्छन्द-अभिनवगुप्तयोर्मध्ये क्रमागता अष्टादश कुलदर्शन-गुरवः समभूवन् । प्रत्येकं गुरोः पञ्चविंशतिवर्षपरिमिते काले स्वीकृते मच्छन्दोऽभिनवगुप्तपादात् चतुःशताधिकपञ्चाशद्वर्षपूर्वं तथा च पञ्चमे ईशशतके समभूदित्यायाति । गहनोऽयं विषयः समधिकमनुसन्धानमपेक्षते ।

कुलदर्शनसाहित्यम्

कुलदर्शनसाहित्येतिहासः पञ्चमादीशशतकादष्टादश ईशशतकपर्यन्तं विस्तीर्णः । एतद्दर्शनविषयकलेखका इतिहासमहत्त्वं जानन्ति स्मेति प्रतिभाति; यत एतत्प्रतिपादकानां गुरूणां परम्परा कालीकुल-पञ्चशतिक-नाम्नि पुस्तकद्वये लिखिता आसीत्, यदाश्रित्य अभिनव-गुप्तपादजयरथादिभिः कुलगुरुपरम्परा प्रदत्ता स्वकृतिषु । कुलगुरुपरम्परां च तदनुयायिनां स्मृतौ संरक्षितुं चर्याक्रमे गुरुनामकीर्तनपुरःसरं गुरुपरम्परापूजनमवश्यकर्तव्यत्वेन निर्दिष्टम् । परमिद-मतीव खेदावहं यत्ते ग्रन्था नोपलभ्यन्ते, उद्धरणेभ्य एव च ज्ञायन्ते ।

कुलदर्शनसाहित्यं त्रिविधम्—(१) आगमाः, (२) आगमाश्रिता ग्रन्थाः, (३) आगम-टीकाश्च । एषु वहवो ग्रन्था उद्धरणेभ्य एव ज्ञायन्ते, न चोपलभ्यन्ते क्वापि । अत एषामेतल्लेख-

कानाञ्च कालादिः सम्यङ् न शक्यते निर्धारयितुम् ; तथापि यावच्छक्यमुपलब्धसामग्र्याश्रयेण तेषामैतिहासिकक्रमनिर्देशः क्रियते ।

अभिनवगुप्त ईशवीयदशमशतके जात इति तु तद्वचनैरेव निश्चीयते । अत इदं निश्चप्रचं यद् यावन्तो ग्रन्थास्तल्लिखितपुस्तकेषु नाममात्रेणाप्युल्लिखिता उपलभ्यन्ते, ते सर्वे तत्पूर्वभाविनः । आगमा येभ्यः कुलप्रक्रियानुसारं रहस्यचर्याविधिवर्णनपरे तन्त्रालोकस्यैकोनत्रिंशाह्निके प्रतिपादितमतसमर्थनायोद्धरणानि प्रदत्तानि, ते सर्वे कुलदर्शनस्याश्रयभूता इति निःसन्देहं स्वीकर्तुं शक्यते । तेषां नामानीमानि—(१) कालीकुलम् , (२) रत्नमाला, (३) वीरावलिः, (४) हार्देशः, (५) खेचरीमतम्, (६) योन्यर्णवः, (७) सिद्धातन्त्रम्, (८) उत्फुल्लकमतम्, (९) निर्मर्यादशास्त्रम्, (१०) त्रिशिरोमतम्, (११) गमशास्त्रम्, (१२) तन्त्रराजः, (१३) ब्रह्मयामलम्, (१४) माधवकुलम्, (१५) देवीयामलम्, (१६) कुलक्रमोदयः, (१७) योगसञ्चरः, (१८) त्रिशिरोभैरवः, (१९) कुलगह्वरम्, (२०) नित्यातन्त्रमिति ।

कुलागमानामैतिहासिकः क्रमः

(१) सिद्धयोगीश्वरीतन्त्रापरनामकं सिद्धयोगीश्वरीमतं प्राधान्येन दार्शनिकतत्त्वविमर्शनपरम्, अप्राधान्येन मन्त्र-मुद्रा-मण्डल-विवरणपरं शतकोटिप्रविस्तरं तन्त्रमासीत् । अस्मिन् न केवलमद्वैत-द्वैत-द्वैताद्वैत-शैवदर्शनानां विस्तृतं व्याख्यानम्; अपि त्वध्यात्मिकोनामाधिभौतिकीनाञ्चापरासामपि विद्यानां सुविशदं विवेचनमासीत् । इदं त्रिधा संक्षिप्तम् । प्रथमे संक्षिप्ताकारे 'मालिनीविजयः' इति नाम्ना विख्याते योगमहत्त्वप्रदर्शनपराः श्लोकानां तिस्रः कोट्यो द्वितीये च द्वादशसहस्रश्लोका आसन्, इमौ नोपलभ्येते । तृतीयं मालिनीविजयोत्तरमिति प्रसिद्धं मुद्रितमुपलभ्यते । यथोक्तम्—

सिद्धयोगीश्वरीतन्त्रं नवकोटिप्रविस्तरम् ।
यत् त्वया कथितं पूर्वं भेदत्रयविसर्पितम् ॥
मालिनीविजये तन्त्रे कोटित्रितयलक्षिते ।
योगमार्गस्त्वया प्रोक्तः सुविस्तीर्णो महेश्वर ॥
भूयस्तस्योपसंहारः प्रोक्तो द्वादशभिस्तथा ।
सहस्रैः सोऽपि विस्तीर्णो गृह्यते नाल्पबुद्धिभिः ॥
अतस्तमुपसंहृत्य समासादल्पधीहितम् ।

सर्वसिद्धिकरं ब्रूहि प्रसादात् परमेश्वर ॥
एवमुक्तस्तदा देव्या प्रहस्योवाच देवराट् ।
शृणु देवि प्रवक्ष्यामि सिद्धयोगीश्वरीमतम् ॥
यन्न कस्यचिदाख्यातं मालिनीविजयोत्तरम् । इति ।

(मा० वि०, २)

अत्र कुलदर्शनस्य कुलमार्गस्य च साङ्गस्य प्रतिपादनमुपलभ्यते । यथाह—

इत्ययं कथितो लेशात् कौलिको विधिरुत्तमः ।
योगिनां सर्वसिद्ध्यर्थं कुलमार्गानुसारिणाम् ॥ इति ।

(मा० वि०, १३६)

कुलमार्गे च वामदक्षिणमार्गयोः ससामञ्जस्यमेकीकरणम् । यथाह—

अशेषतन्त्रसारं तु वामदक्षिणमाश्रितम् ।
एकत्र मिलितं कौलं श्रीषडर्धकशासने ॥ इति ।

(तं० आ०, भा० १२, पृ० ४००)

ऐतिहासिकदृष्ट्या सिद्धयोगीश्वरीतन्त्रं सर्वागमेषु प्राथमिकं प्रतिभाति, यतः सिद्धयोगीश्वरतन्त्रसंक्षेपरूपस्य श्रीमालिनीविजयोत्तरतन्त्रस्य 'श्रीपूर्वशास्त्रम्' इत्यपरं नाम तत्र तत्रोपलभ्यते । नामांशभूतस्य पूर्वशब्दस्य च न शिवपूर्वमुखनिःसृतमित्यर्थः । यतः कुलदर्शनमूर्ध्वमुखोद्गतम् । अतो यदि पूर्वशब्दस्य आद्य इत्यर्थः स्वीक्रियते, तर्हिदं सुस्पष्टं यत् सिद्धयोगीश्वरीतन्त्रम्—यस्य मालिनीविजयतन्त्रं सूक्ष्मं रूपम्—आद्यं तन्त्रम् ।

मालिनीविजयस्योपर्यभिनवगुप्तपादैरेकं वार्त्तिकं मालिनीश्लोकवार्त्तिकमिति नाम, यस्यैकोंऽशो मुद्रित उपलभ्यते, एका च बृहती टीका पूर्वपञ्चिकेति नाम्नी लिखिते । इयं टीका उद्धरणेभ्य एव ज्ञायते । यथाह—

"पूर्वपञ्चिकायां मयैव विस्तरतो निर्णीतम्" इति ।

(प० त्रिं०, २४)

"निर्णीतं च एतन्मयैव श्रीपूर्वपञ्चिकायाम्" इति च ।

(प० त्रिं०, ५७)

(२) रुद्रयामलतन्त्रं वामकेश्वरीतन्त्रात् पूर्वभावि, यतः पूर्वमपरस्मिन् कीर्तितम् । यथाह—

करशुद्धयादिविद्यानामेकैकं परमेश्वरि ।
रुद्रयामलतन्त्रे तु कर्म प्रोक्तं पुरा मया ॥ इति ।

(वा० तं०, पृ० १२१)

इदं (अ) ज्ञानार्णवाद् (आ) नित्याषोडशिकार्णवात् (इ) तन्त्रराजाच्च पूर्वभावि । यतो ज्ञानार्णवेऽस्योल्लेखो नित्याषोडशिकार्णवे च ज्ञानार्णवस्योल्लेखः, तथा तन्त्रराजे नित्याषोडशिकार्णवस्योल्लेखश्चोपलभ्यते । यथाहुः —

वेदशास्त्रपुराणेषु यामलेष्वपि सुव्रते ।
गुप्ता श्रीषोडशार्णेयं निधानमिव संस्मरेत् ॥ इति ।

(ज्ञा० अ०, पृ० ११६)

"श्रीचक्रस्वरूपमवान्तरचक्रात्मकमुक्तं यामले" इति ।

(नि० षो०, पृ० २७)

प्रत्युत तन्त्रराजस्याप्येतत्सापेक्षतैव दृश्यते । यदुक्तं तत्रैव—

"नित्याहृदयसंप्रोक्तस्फुटोपायेन भावयेत्" इति ।

(नि० षो०, पृ० ६)

इदं तन्त्रं कुलदर्शनप्रतिपादकमिति तु सुस्पष्टमभिनवगुप्तकृतात् परात्रिंशिकाविवरणात् । यतः परात्रिंशिका रुद्रयामलतन्त्रस्यैवैको भागः । यथोक्तम्—

"एवं मन्त्रफलावाप्तिरित्येतद्रुद्रयामलम्" इति ।

(प० त्रिं०, पृ० २७७)

जीवानन्दविद्यासागरप्रकाशितं रुद्रयामलतन्त्रं न सम्पूर्णम्, परमस्योत्तरो भाग एव । एतच्चाध्यायसमाप्तिवाक्येभ्यः सुस्पष्टम् । यथाह—"इति श्रीरुद्रयामले उत्तरतन्त्रे" इति ।

इदं विष्णुयामलब्रह्मयामलयोरनन्तरं ग्रथितम्, तयोर्नाम्नोस्तत्रोपलब्धत्वात् । अस्मिन् "कुलाचारविधिः (पृ० २०), कौलानां सन्ध्या (पृ० २२८), कौलतर्पणम् (पृ० २२८), कुलद्रव्यम् (पृ० ८०) इत्यादीनां कौलिकविषयाणामुपलभ्यमानत्वान्नात्र सन्देहकणिकाऽपि यदिदं कौलिकं तन्त्रम् । अस्य ग्रथनं तस्मिन् काले सञ्जातं यस्मिन् कौलबौद्धधर्मयोश्चीनदेशे प्रसारः सञ्जातः, बौद्धधर्मस्योपरि कौलतन्त्रप्रभावश्चापतितः, यतो वशिष्ठः कुलाचारं सम्यगवबोद्धुं चीनदेशं गन्तुमादिष्टः । यथाह—

तती मुनिवरः श्रुत्वा महाविद्यासरस्वतीम् ।
जगाम चीनभूमौ च यत्र बुद्धः प्रतिष्ठितः ॥ इति ।

(रु० या० १५२)

वशिष्ठ श्रृणु वक्ष्यामि कुलमार्गमनुत्तमम् ।
येन विज्ञातमात्रेण रुद्ररूपी भवेत् क्षणात् ॥ इति ।

(रु० या० १५३)

कुलार्णवतन्त्रम् । अस्य नामैव द्योतयति यदिदं कौलिकं तन्त्रम् । इदं सिद्धयोगीश्वरीमतादपरभावि । यथाह—

लोकधर्मविनोदोऽपि सिद्धयोगीश्वरीमते ।

(कु० अ०, अ० २, श्लो० ८८)

इदं वामकेश्वरीमततन्त्राच्च भास्कररायकथनानुसारं पूर्वभावि । तच्चेत्थं स्पष्टीभवति— इदं तु सुप्रसिद्धं यन्नित्याषोडशिकार्णवो यस्योपरि भास्कररायेणैका टीका लिखिता वामकेश्वरीमतस्यैको भागः । प्रथमाध्यायस्थद्वितीयश्लोकगतस्य 'अन्यानि' इति शब्दस्योपरि टीकां लिखता तेनैवेदमुट्टङ्कितम् —

"अन्यान्यपि कुलार्णव–दक्षिणामूर्तिसंहिता-सनत्कुमारसंहिता-परानन्दतन्त्रादीनि" इति ।

(नि० षो०, पृ० २५)

कुलार्णवग्रथनकाले कुलदर्शनमेकं स्वतन्त्रं सर्वोत्कृष्टं च दर्शनं स्वीकृतमासीत् । यथाह—

"धन्यो मनुष्यलक्षेषु जानाति कुलदर्शनम्" इति ।

(कु० अ० हस्तलिपिः, अ० ३, श्लो० २८)

"श्रीकौलदर्शने चापि भैरवेण महात्मना" इति च ।

(कु० अ० (मुद्रितः) अ० ५, श्लो० ४५)

कुलमार्गः पञ्चमुखशिवस्योर्ध्वमुखोद्गततन्त्राश्रितत्वाद् नियतिक्षेत्रोपरिवर्तमानत्वादतिक्रान्तनियतिमर्यादत्वाचोर्ध्वमार्ग इत्युच्यते । यथाह —

ऊर्ध्वत्वात् सर्वधर्माणामूर्ध्वाम्नायः प्रशस्यते ।
ऊर्ध्वं नयत्यधःस्थं चेत्यूर्ध्वाम्नाय इति स्मृतः ॥ इति ।

(कु० अ०, अ० ३, श्लो० १८)

कुलार्णवे मिथ्याज्ञानविडम्बकानामक्षुण्णराजयोगमार्गाणामवशीकृतमनसां कौलरहस्यमविदुषामपि मद्य-मांस-मैथुनरूपमकारत्रयोपयोगमात्रेण मोक्षलिप्सूनामवैधं मकारत्रयोपयोग-

मुपदिशताम्, तथैव च राजयोगजनिततत्त्वज्ञानेन विनैव केवलान् वसनत्याग–गङ्गातटवास–नामकीर्तन–तृणपर्णोदकाहार–निर्जलव्रत–अभक्ष्यभोजन–शीतवातातपसहनादीन् मोक्षप्रापकान् मन्वानानां महती निन्दा कृता। यथाह—

बहवः कौलिकं धर्मं मिथ्याज्ञानविडम्बकाः।
स्वबुद्धया कल्पयन्तीत्थं पारम्पर्यविमोहिताः॥
मद्यपानेन मनुजो यदि सिद्धिं लभेत वै।
मद्यपानरताः सर्वे सिद्धिं गच्छन्तु पामराः॥
मांसभक्षणमात्रेण यदि पुण्या गतिर्भवेत्।
लोके मांसाशिनः सर्वे पुण्यभाजो भवन्ति किम्॥
स्त्रीसंभोगेन देवेशि यदि मोक्षं व्रजन्ति चेत्।
सर्वेऽपि जन्तवो लोके मुक्ताः स्युः स्त्रीनिषेवणात्॥
कुलमार्गो महादेवि न मया निन्दितः क्वचित्।
आचाररहिता येऽत्र निन्दितास्ते न चेतरे॥ इति।

(कु० अ०, अ० २, ११७–१२१)

गृहारण्यसमा लोके गतव्रीडा दिगम्बराः।
चरन्ति गर्दभाद्याश्च विरक्तास्ते भवन्ति किम्॥
आजन्ममरणान्तं च गङ्गादितटिनीस्थिताः।
मण्डूकमत्स्यप्रमुखा व्रतिनस्ते भवन्ति किम्॥
वदन्ति हृदयानन्दं पठन्ति शुकसारिकाः।
जनानां पुरतो देवि विबुधाः किं भवन्ति हि॥
तृणपर्णोदकाहाराः सततं वनवासिनः।
हरिणादिमृगा देवि तापसास्ते भवन्ति किम्॥
शीतवातातपसहा भक्ष्याभक्ष्यसमाः प्रिये।
तिष्ठन्ति सूकराद्याश्च योगिनस्ते भवन्ति किम्॥
तस्मादित्यादिकं कर्म लोकरञ्जनकारकम्।
मोक्षस्य कारणं साक्षात् तत्त्वज्ञानं कुलेश्वरि॥ इति च।

(कु० अ०, अ० १, ८२-८८)

कुलार्णवे केचन श्लोकाः कैश्चन मद्यपायिभिर्दाम्भिकैः समावेशिता वर्तन्ते । यथा स्पष्टीभवति पूर्वापरविरोधावलोकनेन । तत्र हि तावत्यैव मात्रयाऽधिकारिणा कुलाचारानुष्ठाने मद्यं पेयत्वेन निर्दिष्टं यावत्या मुखवैवर्ण्यमिन्द्रियवैकल्यं च न स्यात् । यथाह —

यावन्नेन्द्रियवैकल्यं यावन्नो मुखविक्रिया ।
तावद् यो पिबते मद्यं स मुक्तो नात्र संशयः ॥ इति ।

(कु० अ०, अ० ७, १०६)

अत एतदनन्तरं नीचैर्दत्तं श्लोकद्वयं पूर्वविरोधित्वान्निःसंशयं प्रक्षिप्तमेव —

पीत्वा पीत्वा पुनः पीत्वा यावत्पतति भूतले ।
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ॥
आनन्दात्तृप्यते देवी मूर्च्छनाद् भैरवः स्वयम् ।
वमनात् सर्वदेवाश्च तस्मात् त्रिविधमाचरेत् ॥ इति ।

(कु० अ०, अ० ७, १०९–११०)

(४) ज्ञानार्णवतन्त्रं षोडशस्वरूपाया नित्यायाः स्वरूपनिरूपणपरम् । षोडशसु रूपेषु त्रिपुरसुन्दरीत्यपराभिधा त्रिपुरा मुख्या । यथाह —

त्रिपुरा परमेशान ज्ञानमार्गेण सूचिता ।
तत्त्वरूपेण कथय यद्यहं तव वल्लभा ॥ इति ।

(ज्ञा० अ०, पृ० ३)

इदं बहुशः कुलाचारं निर्दिशति, कुलागमक्रमेण नित्याध्यानं चक्रपूजनं चादिशति, कुलशब्दं शक्त्यपरपर्यायं स्वीकृत्य नित्यां शक्तिस्वरूपिणीमेवं च कुलस्वरूपिणीं मनुते । यथाह —

"कुलं शक्तिः समाख्याता सा च नित्या प्रकीर्तिता" इति ।

(तं० आ० टी०, आ० २९, ५१)

अतो निःसन्देहमिदं कौलिकं तन्त्रम् । इदं यामलतन्त्रेभ्यो रुद्रयामलादिभ्योऽनन्तरं ग्रथितम्, यतस्तेषां नामान्यस्मिन्नुद्धृतानि । यथाह —

वेदशास्त्रपुराणेषु यामलेष्वपि सुव्रते ।
गुप्ता श्रीषोडशार्णेयं निधानमिव संस्मरेत् ॥ इति ।

(ज्ञा० अ०, पृ० ११९)

नित्याषोडशिकार्णवाच्च पूर्वभावि, तत्र परिगणितेषु चतुःषष्टितन्त्रेष्वस्यापि समुल्लेखात् । यथाह —

तन्त्रं वैशेषिकं ज्ञानं वीरावलि तथा परम् ।
अरुणेशं मोहिनीशं विशुद्धेश्वरमेव च ॥ इति ।

स्पष्टीकृतं चैतद् भास्कररायेण—

"ज्ञानमिति ज्ञानार्णवपदेन प्रसिद्धम्" इति वदता ।

(नि० षो०, पृ० २४-२५)

अस्योपरि शङ्करानन्देनैका टीका लिखिताऽऽसीत्, या भास्कररायकृतोल्लेखादेव ज्ञायते । यथाह —

शतपत्रकैरिति श्लोकव्याख्यावसरे…"इत्युक्तं शङ्करानन्दैः" (नि० षो०, अ० २१) इति ।

बहुषु स्थलेषु भास्करराय: शङ्करानन्दात् स्वीयं मतभेदं प्रकटयति । यथाह—

"एतेन ज्ञानार्णवीयवचने…शङ्करानन्दस्य भ्रम एव" (नि० षो०, अ० १७०) इति ।

(५) वामकेश्वरतन्त्राङ्गभूतं नित्याषोडशिकार्णवतन्त्रम् ।

"कुलं शक्तिः समाख्याता सा च नित्या प्रकीर्तिता ।"
"नित्यातन्त्रविदः कृष्णं कार्तिकाच्चरमं दिनम् ।
कुलस्य नित्याचक्रस्य पूर्णत्वं यत्र तन्मतम् ॥"

(तं० आ०, आ० २८, ५१)

इत्यादिवचनेभ्यो नित्याषोडशिकार्णवतन्त्रं कौलिकं तन्त्रमिति विषये नास्ति कश्चन सन्देहलेशोऽपि ।

इदमत्र सम्यगवधेयं यत् काश्मीरसंस्कृतग्रन्थमालायां जयरथकृतटीकया विवरण इति नाम्न्या सह मुद्रितं वामकेश्वरतन्त्रं न सम्पूर्णं वामकेश्वरतन्त्रम्, अपि तु नित्याषोडशिकार्णवस्य प्राथमिकमध्यायपञ्चकमेव । इदञ्च पाठैकत्वात् सुस्पष्टम् । वामकेश्वरतन्त्रस्य नित्याषोडशिकार्णवाख्यो भागो नीचैर्लिखितचतुःषष्टितन्त्रानन्तरं ग्रथितः, तेषां तत्रोल्लेखात् । यथाह —

महामाया शम्बरं च योगिनी जालशम्बरम् ।
तत्त्वशम्बरकं चैव भैरवाष्टकमेव च ॥

बहुरूपाष्टकं चैव यामलाष्टकमेव च ।
चन्द्रज्ञानं वासुकिं च महासम्मोहनं तथा ॥
महोच्छुष्मं महादेव वातुलं वातुलोत्तरम् ।
हृद्भेदं तन्त्रभेदं च गुह्यतन्त्रं च कामिकम् ॥
कलावादं कलासारं तथान्यत् कुब्जिकामतम् ।
तन्त्रोत्तरं च वीणाख्यं त्रोतलं त्रोतलोत्तरम् ॥
पञ्चामृतं रूपभेदं भूतोड्डामरमेव च ।
कुलसारं कुलोड्डीशं कुलचूडामणिं तथा ॥
सर्वज्ञानोत्तरं देव महाकालीमतं तथा ।
महालक्ष्मीमतं चैव सिद्धयोगीश्वरीमतम् ॥
कुरूपिकामतं देव रूपिकामतमेव च ।
सर्ववीरमतं चैव विमलामतमुत्तमम् ॥
पूर्वपश्चिमदक्षं च उत्तरं च निरुत्तरम् ।
तन्त्रं वैशेषिकं ज्ञानं वीरावलि तथा परम् ।
अरुणेशं मोहिनीशं विशुद्धेश्वरमेव च ॥ इति ।

(नि० षो०, पृ० २२–२३)

काश्मीरे काश्मीराद् बहिश्च नित्याषोडशिकार्णवतन्त्रमतीव लोकप्रियमासीत् । अस्योपरि बह्वयष्टीका आसन्, यासु जयरथ–भास्करकृते द्वे एवोपलभ्येते, शेषाश्चोद्धरणेभ्य एव ज्ञायन्ते । उद्धरणेष्वपि क्वचन टीकानामैव लिखितम्, अपरत्र च टीकाकर्तुरेव नाम । एवञ्च ऋजुविमर्शिनी-अर्थरत्नावलीनाम्न्यौ द्वे टीके, तथा च काश्मीरिके लिखिता बह्वयष्टीका ज्ञायन्ते । यथाह —

"अत्र ऋजुविमर्शिन्यां महामायातन्त्रं शम्बरतन्त्रं चेति तन्त्रद्वयपरं व्याख्यातम् । लक्ष्मणेन तु महामायाशम्बराख्यमेकं तन्त्रमित्युक्तम् । अर्थरत्नावल्यां तु द्वयमपि नोक्तम्" इति ।

(नि० षो०, पृ० २२–२३)

मनोरमायां त्वेतत्स्तोत्रव्याख्यारम्भे नित्याषोडशिकार्णवे महात्मभिः काश्मीरादिभिर्व्याख्यातत्वात् सैव व्याख्या स्वेन लिख्यत इति वदता सुभगानन्दनाथेन पाठभेदो नास्तीति ध्वनितम्" (नि० षो०, पृ० १६–१७) इति च ।

भास्कररायेण स्वीयनित्याषोडशिकार्णवटीकायामुल्लिखितानां टीकाकर्तॄणां नामानीमानि–(१) लक्ष्मणः, (२) गौरीकान्तः, (३) शिवानन्दनाथः, (४) विद्यानन्दनाथः (५) शङ्करानन्दनाथः, (६) श्रीहर्षदीक्षितः ।

(६) स्वच्छन्दतन्त्रं नेत्रतन्त्रमिव सर्वथा कौलिकं तन्त्रमिति न शक्यते वक्तुम् । यद्यपि निःसन्देहं तत्रापि कुलाचारचर्चा क्रियत एव, जयरथकृतव्याख्यानुसारं कुलदर्शनं सर्वोत्कृष्टमिति स्वीक्रियते च । यथाह—

…………शैवाद् वामं तु दक्षिणम् ।
दक्षिणात्परतः कौलं कौलात्परतरं नहि ॥

(स्व० तं०, भा० ४, ५४–५५)

इदं नेत्रतन्त्रात् पूर्वभावि । यथाह जयरथो नेत्रतन्त्रटीकायाम्—

“भैरवागमेषु दक्षिणस्रोतःसमुत्थेषु स्वच्छन्द–चण्ड–त्रिशिरोभैरवादिषु भेदितं भेदसंहारित्वेन दीप्तविशिष्टरूपतया प्रतिपादितम्” (ने० तं०, भा० १, २२५) इति ।

अस्य प्राथमिक आकारः सुमहान् सिद्धयोगीश्वरीतन्त्रवच्छतकोटिश्लोकप्रविस्तर आसीत् । मुद्रितं स्वच्छन्दतन्त्रं तस्यैव सूक्ष्मीकृतं रूपम् । यथाह—

शतकोटिप्रविस्तीर्णं भेदानन्त्यविसर्पितम् ।
चतुष्पीठं महातन्त्रं चतुष्टयफलोदयम् ॥ इति ।

(स्व० तं०, भा० १, ६)

अस्य समयः

अधोलिखितकारणेभ्य इदमीशवीयद्वितीयशतकान्तरभावि—(१) इदं लकुलीशप्रचालितं लकुलीशपाशुपतदर्शनमुल्लिखति । लकुलीशश्च शिलालेखाद्याधारेण ईशवीयद्वितीयशतके समभूदिति निर्णीतं मयैव भास्कर्यास्तृतीयभागे लकुलीशपाशुपतदर्शनेतिहासव्याख्यावसरे । (२) अत्र लकुलीशशिष्यस्य मुसुलेन्द्रस्य, (३) कामशास्त्र-चित्रशास्त्रयोश्चाप्युल्लेखा उपलभ्यन्ते । यथाह—

मौसुले कारुके चैव मायातत्त्वं प्रकीर्तितम् ।
श्रीलकुलेशशिष्येण मुसलेन्द्रेण कारोहावतीर्णेन । इति ।

(स्व० तं०, भा० ६, ५२–५३)

"सर्वाभरणसंयुक्तैः कामशास्त्रसुपेशलैः" इति,

(स्व० तं०, भा० ५, ५१)

"रचितैश्चित्रशास्त्रज्ञै रत्नचूर्णसमुज्ज्वलैः" इति च ।

(स्व० तं०, भा० ५, २४१)

(७) नेत्रतन्त्रं मृत्युञ्जयतन्त्रमित्यपराभिधं स्वच्छन्द-चण्ड-त्रिशिरोभैरवतन्त्रेभ्योऽपरभावि, यतोऽत्रोपर्युक्ततन्त्रानुसारं मृत्युजिद्वर्णनं क्रियते । एतद्विषयकं प्रमाणवाक्यं पूर्वपृष्ठे प्रदत्तमेवेति न भूयो दीयते । तोतुल-क्रियाकालगुणोत्तरादितन्त्राण्यस्मात् पूर्वभवानीति क्षेमराजव्याख्यातोऽवगम्यते । यथाह—"विस्तरोऽन्यत्र वर्णितः" ।

"अन्यत्र श्रीतोतुलक्रियाकालगुणोत्तरादौ" (ने० तं०, भा० २, १६६) इति ।

इदं तन्त्रं नेत्रतन्त्रमिति नाम्नोच्यते, यतोऽत्र भगवतः शिवस्य तृतीयनेत्रस्य दार्शनिकं रहस्यं स्फुटीकृतम् । एवं चास्य मृत्युजिन्नामकरणमिदं यदिदं तं पन्थानं दर्शयति यदनुसरणेन मृत्युः शक्यते जेतुम् । यथाह—

यत्तदापोमयं देव चक्षुः सर्वत्र दृश्यते ।
तस्मादग्निः कथं रौद्रं उत्पन्नः कालदाहकः ॥ इत्यादि,

(ने० तं०, भा० १, १२)

"मृत्योरुत्तारयेद्यस्मान्मृत्युजित्तेन कीर्तितः" इति च ।

(ने० तं०, भा० २, २६७)

इदमेकादशाध्याये ऊर्ध्वाम्नायानुसारं द्वादशे चाध्याये कुलाम्नायानुसारं पूजाविधिं वर्णयति । अतोऽत्रास्य कौलतन्त्रेषूल्लेखः कृतः ।

(८) तन्त्रराजतन्त्रं न केवलं नित्याषोडशिकार्णवव्याख्यानावसरे समुल्लिखितेभ्यश्चतुष्षष्टितन्त्रेभ्यः परं नित्याविवरणपरेभ्यः सुभगानन्दनाथकृतमनोरमाख्यटीकायामुट्टङ्कितेभ्योऽधोलिखितनवतन्त्रेभ्योऽप्यनन्तरं ग्रथितम् । यथाह—

भगवन् सर्वतन्त्राणि भवतोक्तानि मे पुरा ।
नित्यानां षोडशानां च नव तन्त्राणि कृत्स्नशः ॥

तत्र सर्वतन्त्राणि नित्याषोडशिकोक्तरुद्रयामलादिचतुःषष्टि मुख्यानि तन्त्राणि। नवतन्त्राणि सुन्दरीहृदय-नित्याषोडशिकार्णव–चन्द्रज्ञान–मातृकातन्त्र–सम्मोहनतन्त्र-वामकेश्वर-बहुरूपाष्टक-प्रस्तारचिन्तामणि-मेरुप्रस्तराख्यानीति (तं० रा०, २)।

नेदं किमपि स्वतन्त्रं तन्त्रमपि तु नित्याविषयकेषु नवतन्त्रेषु पृथक्-पृथक् प्रतिपादितानां विषयाणामेकत्र यथोचितक्रमेणैकत्र सङ्ग्रहमात्रम्। यथाह :—

तेषामन्योन्यसापेक्ष्याज्जायते मतिविभ्रमः।
तस्मात्तु निरपेक्षं मे तन्त्रं तासां वद प्रभो॥ इति॥

(तं० रा०, २)

केषाञ्चन मते

चतुःषष्ट्या तन्त्रैः सकलमभिसन्धाय भुवनं
स्थितस्तत्तत्सिद्धिप्रसवपरतन्त्रः पशुपतिः।
पुनस्त्वन्निर्बन्धादखिलपुरुषार्थैकघटना-
स्वतन्त्रं ते तन्त्रं क्षितितलमवातीतरदिदम्॥

इत्यस्मिन्नानन्दलहर्या एकत्रिंशत्तमे श्लोके स्वतन्त्रशब्देन पञ्चषष्टितमं तन्त्रराजतन्त्रं शङ्कराचार्यस्याभीष्टमासीत्, यत उपरिलिखिततन्त्रराजश्लोके प्रयुक्तो निरपेक्षशब्दः स्वतन्त्रपर्यायः, परं भास्करराय इदं मतं न स्वीकरोति, मनुते तु यत्स्वतन्त्रपदेन वामकेश्वरीतन्त्रमभिहितम्, तन्त्रराजस्य नित्याषोडशिकार्णवाश्रितत्वेन स्वतन्त्रतन्त्रत्वाभावात्।

अभिनवगुप्ताचार्यमते तन्त्रराजतन्त्रं कौलतन्त्रोपदिष्टां बहुविधरहस्यचर्यापरम्परास्वेकां परम्परां वर्णयति। अस्यां परम्परायां देवीयामल-माधवकुलनिर्दिष्टयोः रहस्यचर्याक्रमयोः सामञ्जस्यं कृतम्। माधवकुलञ्च जयरथानुसारं तन्त्रराजतन्त्रस्यैकस्यांशस्यैव नाम। नित्यातन्त्राणि देवीयामलं च सर्वसम्मतानि कौलतन्त्राणि, अतः तन्त्रराजतन्त्रं कौलतन्त्रम्।

कौलसिद्धान्तप्रतिपादयितारः काश्मीरिकाः लेखकाः

(१) ईश्वरशिवः – अयं काश्मीरराजस्यावन्तिवर्मणो मन्त्रिणा सूरनाम्ना संस्थापितस्य सूरमठस्याधिपतिरासीत्। अवन्तिवर्मा च ईशवीयनवमशते काश्मीरं शशासेति सुविदितम्। अतः स ईशवीयनवमशतभव ऊरीक्रियते। यथाह :—

श्रीसूरमठाधिपतेर्लेभे गुरुवरपरम्परोपनतम् ।
चक्रमिदमीश्वरशिवात् पूर्वाचार्योऽस्मदीय एव पुरा ॥

(वा० तं०, ४८)

अयं वामकेश्वरमतस्योपरि एकां टीकां लिखितवान्, यथा विशदीभवत्यधोलिखिताद् जयरथवचनात् ।

हकारेणान्वितं कुर्यादिति श्रीमदीश्वरशिवाचार्यः । इति ।

(वा० म० टी०, ४७)

अयमपरेण कौलाचार्येण शङ्करराशिना सह सर्वतः प्रथमं कौलदर्शनं कश्मीरे प्रचारयति स्म । यथाह :—

अस्य दर्शनस्यैतदेवाचार्यद्वयं काश्मीरेष्ववतारकम् । इति ।

(वा० म०, ४८)

अयमेकमपरं ग्रन्थं रसमहोदधिनामकं यस्मिन् चक्रखचनप्रकाराः निर्दिष्टा आसन् लिलेख । यथाह :—

स एव रसमहोदधिश्लोकानां साक्षात् प्रवर्तयिता । इति ।

(वा० म०, ४८)

अन्ये कौलतन्त्राणामुपरि टीकालेखकाः, स्वतन्त्रग्रन्थकाराः प्रचारकाश्च येषां नामानि जयरथः कीर्तयति त इमे :—

(२) शङ्करराशिः, (३) विश्वावर्तः, (४) दीपिकानाथः, (५) कल्याणवर्मा, (६) अल्लटः, (७) कल्लटः ।

शम्भुनाथः अभिनवगुप्ताचार्यस्य कुलदर्शनगुरुः

कुलदर्शनोद्भवसमयनिर्धारणावसरे शम्भुनाथविषये किञ्चिदुक्तम् । इह एतावदेव वक्तव्यं यत् त्र्यम्बकसन्तानपरम्परायां ग्रहेषु भास्कर इव स मुख्यतमः सुमतिशिष्येष्वग्रिमश्चासीत् । अयमुद्धरणमात्रेण ज्ञातं तन्त्रसद्भावशासननामकं ग्रन्थं व्यलिखत्; जालन्धरपीठे भगवतीनाम्न्या दूत्या सह न्यवसत् । काश्मीरिकेभ्यः कुलदर्शनप्रतिपादकेभ्यः सन्तोषमलभमानोऽभिनवगुप्तः कुलदर्शनमध्येतुं कुलाचारं च सम्यगवगन्तुं जालन्धरस्थमेनमुपससार । यथाह :—

श्रीत्र्यैयम्बकसन्तान-विततामम्बरभास्करः ।
दिनरात्रिक्रमं मे श्रीशम्भुरित्थमपप्रथत् ॥ इति ।

(तं० आ०, आ० ६, ७७-८)

श्रीमत्सुमतिसंशुद्धसद्भक्तजनदक्षिणः ।
शम्भुनाथः प्रसन्नो मे भूयाद्वाक्पुष्पतोषितः ॥ इति ।

(मा० वि० वा०, १)

तुलामेलकयोगः श्रीतन्त्रसद्भावशासने ।
य उक्तः शम्भुनाथेन स मया दर्शितः क्रमात् ॥ इति च ।

(तं० आ०, आ० ३०, २१४)

अष्टादश ईशवीयशते काश्यां कुलदर्शनपरम्परा

(१) नरसिंहयज्वा—"कदा सकुलाचारं कुलदर्शनं काशीं प्रससार" इति तु नास्ति विदितम्, परमस्य सत्ता अष्टादश ईशवीयशत आसीदित्यत्र नास्ति सन्देहलेशोऽपि । यतो भास्कररायस्तदानीं काश्यां न्यवसदित्यग्रे निर्णेष्यते । नरसिंहयज्वा च भास्कररायस्य गुरुरासीदिति सोऽपि तस्मिन्नेव ईशवीयशतेऽभूदिति तु मन्तव्यमेव । भास्कररायकृतादुल्लेखादिदं ज्ञायते, यत्स ललितासहस्रनाम्न उपरि एकां परिभाषां व्यरचयत् । यथाह :---

श्रीगम्भीरविपश्चितः पितुरभूद्यः कोनमाम्बोदरे
विद्याष्टादशकस्य मर्मभिदभूद्यः श्रीनृसिंहाद् गुरोः ।
यश्च श्रीशिवदत्तशुक्लचरणैः पूर्णाभिषिक्तोऽभवत्
स त्रेता त्रिपुरा त्रयीति मनुते तामेव नाथत्रयीम् ॥

गुरुचरणसनाथो भासुरानन्दनाथो
विवृतिमतिरहस्यां वीरवृन्दैर्नमस्याम् ।
रचयति ललिताया नामसाहस्रिकाया
गुरुकृत-परिभाषाः संविवृण्वन्नशेषाः ॥ इति ।

(ल० ना० स०, टी०, १)

नरसिंहयज्वा नृसिंहानन्दनाथेत्यपरनामा स्वपरिभाषादौ मङ्गलाचरणं कुर्वन्, ग्रन्थप्रयोजनं च निर्दिशन् त्रिपुरां कुलनिधिं तस्याश्च परमशिवेन सामरस्यं वक्ति, कौलिकप्रमोदं च ग्रन्थस्य

प्रयोजनमुद्घोषयति। कौलानां दृशि त्रिपुराया महत्त्वं नित्याषोडशिकार्णवप्रसङ्गे प्रदर्शितमेव, शिवशक्तिसामरस्यरूपं च परमं षट्त्रिंशत्तत्त्वोत्तीर्णं सप्तत्रिंशं तत्त्वं कुलदर्शने इत्यग्रे विवरीष्यते। अतो ललितासहस्रनाम्नः कौलग्रन्थत्वं निर्विवादम्। यथाह —

त्रिपुरां कुलनिधिमीडेऽरुणश्रियं कामराजविद्धाङ्गीम्।
त्रिगुणैर्देवैर्निनुतामेकान्तां बिन्दुगां महारम्भाम्॥
ललितानामसहस्रे छलार्णसूत्रानुयायिन्यः।
परिभाषा भाष्यन्ते संक्षेपात् कौलिकप्रमोदाय॥

(ल०ना०स०, २-३)

(२) भासुरानन्दापरनामा भास्कररायः स्ववचनानुसारं सौभाग्यभास्करनाम्नीं ललितानामसहस्रटीकां वैक्रमे पञ्चाशीत्यधिके सप्तदशशते[1] आश्विनशुक्लनवम्याम्, तदनुसारमष्टाविंशत्यधिके ईशवीयसप्तदशशते, तथैव पञ्चपञ्चाशदधिके षोडशशते शाके फाल्गुणकृष्णत्रयोदश्यां शिवरात्रौ सेतुबन्धनाम्नीं नित्याषोडशिकार्णवटीकां समापयत्। यथाह :—

श्रीविश्वामित्रवंश्यः शिवभजनपरो भारती सोमपीथी
काश्यां गम्भीरराजो बुधमणिरभवद् भास्करस्तस्य सूनुः।
मोदच्छाया[1]मितायां शरदि शरद्दतावाश्विने काल्युक्ते
शुक्ले सौम्ये नवम्यामतनुत ललितानामसाहस्रभाष्यम्॥ इति।

(ल० ना० स०, २४०)

क्षेत्रे श्रीसप्तकोटीश्वरपुरि शिवरात्रौ शके शर्मचापे
नित्याषोडश्युदन्वत्परतटगतये सेतुमेतं न्यबध्नात्॥ इति च।

(नि० षो० अ०, ३५०)

उपरिलिखितयोर्ग्रन्थसमाप्त्यब्दयोर्विवरणस्य शुद्धता भास्कररायशिष्यस्य जगन्नाथापरनाम्न उमानन्दनाथस्य स्वीयनित्योत्सवनामकस्य ग्रन्थस्य समापनसमयनिर्देशेन समर्थ्यते। यथाह :—

त्र्यन्ततत्त्वशीलनदलितजगच्छास्त्रजालमोहेन।
भारत्युपाख्यभास्करमखिदेशिकलब्धदेक्षनाम्नाऽयम्॥
आम्नायतन्त्रजालालोकपरेणार्थसम्प्रदायजुषा।
ललितापदाब्जरोलम्बेन जगन्नाथपण्डितवरेण॥

---

१. संवत् १७८५

कल्यब्देषु रसार्णवकरिवेद[1]मितेष्विह व्यतीतेषु ।
नव्यः क्रोधनशरदि न्यबन्धि नित्योत्सवः शिवप्रीत्यै ॥ इति ।

(नि० उ०, १७३)

अद्य गतकल्यब्दः पञ्चाशच्छताधिकः षट्षष्टितमः (५०६६), ईशवीयाब्दश्च एकोनविंशतिशताधिकः पञ्चषष्टितमः (१९६५)। पूर्वसंख्यातः परां संख्यां वियोज्य एकत्रिंशच्छताधिका एकसंख्या (३१०१) लभ्यते । अत इदमायाति यद् ईशवीयाब्दसंख्याया एकत्रिंशच्छताधिकामेकसंख्यां संयोज्य कल्यब्दसंख्या लभ्यते। एवञ्च यदि सप्तदशशताधिका पञ्चसप्ततिसंख्या (१७७५) एकत्रिंशच्छताधिकया एकसंख्यया (३१०१) संयोज्यते, तर्हि जगन्नाथपण्डितेन उपरिलिखितश्लोके प्रदत्ता कल्यब्दसंख्या लभ्यते। अत इदं निश्चितं यन्नित्योत्सवसमापनाब्द ईशवीयः सप्तदशशताधिकोऽष्टाविंशतितम एव (ई० १७२८)।

जगन्नाथपण्डितः स्वीये भास्करविलासकाव्ये सविस्तरं भास्कररायजीवनं वर्णयति, तदुल्लिखितानामष्टात्रिंशद्ग्रन्थानां च नामान्युल्लिखति । तत्सर्वं तत एवावधार्यम् ।

सौभाग्यभास्करोल्लिखिता इमास्तत्कृतयः —

१. वरिवस्यारहस्यम्, पृ० ६, ७५, १७१ ।

२. छन्दोभास्करः, पृ० ३६, १३७, १६८, १७१ ।

३. मीमांसकवादकौतूहलम्, पृ० ५७ ।

४. शिवस्तवः, पृ० ५६, ८५, ८७, २३१, २३२ ।

५. भावनोपनिषद्भाष्यम्, पृ० ७१ ।

६. देवीस्तवः, पृ० १३७ ।

नित्याषोडशिकार्णवव्याख्यायामुल्लिखितास्तत्कृतयः ।

१. सौभाग्यभास्करः, पृ० १४, २६, ६०, ३४४ ।

२. वरिवस्यारहस्यव्याख्या, पृ० १६० ।

३. वरिवस्याप्रकाशः, पृ० ३०३ ।

४. शिवस्तुतिः, पृ० २५३ ।

५. वृत्तचन्द्रोदयः, पृ० १४४ ।

---

१. ४८७६ ।

भास्कररायः सम्पूर्णे भारते भ्रमणमकरोत्, वसुमत्यां दक्षिणहैदराबादराज्यान्तर्गतायामेकं मठं प्रत्यष्ठापयत्, तत्र शुकानन्दनामानं स्वशिष्यं मठाधीशपदे न्ययोजयच्च।

तदनन्तरभाविनां परम्परागतानां शिष्याणां नामानीमानि —

१. देशिकानन्दः, शुकानन्दपुत्रः।

२. यज्ञेशानन्दः, शुकानन्दप्रपौत्रः।

३. धर्मानन्दः।

४. धीरानन्दः।

५. भूमानन्दः।

६. अम्बानन्दः।

इमे चत्वारः शुकानन्दवंश्या नासन्। अम्बानन्देन च सह मम सम्मेलनं कश्मीरे जातम्। तस्माच्च गुरुपरम्परागतं कौलज्ञानं मयोपलब्धम्।

७. काशीस्थ-राजकीय-संस्कृत-विद्यालयस्य अधुना विश्वविद्यालयरूपे परिणतस्य प्राध्यक्षः खिस्ते इत्युपाह्वो नारायणशास्त्री अम्बानन्दस्य शिष्य आसीत्।

७. बटुकनाथशास्त्री नारायणशास्त्रिपुत्रो वाराणसेय-संस्कृत-विश्वविद्यालयेऽध्यापक-पदमलङ्कुर्वाणोऽधुनाऽपि कुलमार्गमनुसरति।

इत्थमीशवीयपञ्चमशतकादारभ्याद्यावधि कुलाचारपरम्परा अविच्छिन्ना आस्ते। अस्य प्रचारो न केवलं कामरूपे, दक्षिणभारते, जालन्धरे, कश्मीरे काश्याञ्चासीद्, अपि तु भारता-द्बहिश्चीनदेशेऽपि।

कुलाचारविषयकभ्रान्तिनिरसनम्

कुलाचारे मद्यपानस्य मांसाशनस्य मैथुनस्य च विहितत्वात्तद्विषये साधारणलोकानां कौलरहस्यमविदुषां महती जुगुप्सा वर्तते। तदज्ञानदूरीकरणाय इदमवश्यं विवेक्तव्यम् "कुलाचारा-नुष्ठाने कोऽधिकारी?" "किमर्थमिदमनुष्ठीयते?" "कदेदं कार्यम्?" इति।

अधिकारिलक्षणानि

(१) परकाष्ठाप्राप्तनिर्विकल्पदशाधिशायी एवात्राधिकारी, न साधारणो जनः। यथाह —

अथ सर्वाप्युपासेयं कुलप्रक्रिययोच्यते।
तथा धाराधिरूढेषु गुरुशिष्येषु योचिता॥

तथा धाराधिरूढेष्वित्यनेन परकाष्ठाप्राप्तनिर्विकल्पदशाधिशायितया रूढप्रायता-मभिदधता अधिकारिभेदोऽप्युपक्षिप्त इति ।

(तं० आ०, आ० २९, श्लो० १-२)

(२) राजयोगनिपुण एवात्राधिकारी । राजयोगहठयोगयोश्चायं पारस्परिको भेदः । हठयोगानुसारं प्राणाधीनं मनः, राजयोगानुसारं तु मनोऽधीनाः प्राणाः । प्रथमे योगी हठात् प्राणान् मध्यधाम्नि प्रवेश्य तत्रैव मनो नयति, द्वितीये मनोनुसारिणः प्राणाः । मनसि च मध्यनाड्यां प्राप्ते प्राणाः स्वत एव तदनुगच्छन्ति । यथोक्तम् —

मनो यत्र विलीयेत पवनस्तत्र लीयते ।
पवनो लीयते यत्र मनस्तत्र विलीयते ॥ इति ।

(ह० यो० प्र०, १७९-८०)

(३) भैरवं देवं यष्ट्वा मन्त्रतर्पणं च यथोक्तविधिना कृत्वैव मद्यपानं कुल-यागाङ्गत्वेनादिष्टम् , लौल्यादिना तु मद्यपायी नरकभाक् । यथाह —

अयष्ट्वा भैरवं देवमकृत्वा मन्त्रतर्पणम् ।
पशुपानविधौ पीत्वा वीरोऽपि नरकं व्रजेत् ॥ इति ।

(तं० आ०, आ०, २९, पृ० ११)

(४) भैरवतादात्म्यापन्नत्वाद् दिव्यवपुरेवात्राधिकारी । यथाह —

अदिव्यवपुषा क्रियमाणं यागादि फलदायि न स्यादित्यत्र साधकेन स्वात्मनि भैरवीभावो भावयितव्य इत्याह—

तत्रोक्तमन्त्रतादात्म्याद् भैरवीभावमानयेत् । इति ।

(तं० आ०, आ० २९, श्लो० २२)

(५) परतत्त्ववेत्ता कृतागमाभ्यासः क्रोधलोभमदमोहरागमायाविवर्जित एवात्राधिकारी, न त्वितरः । यथाह —

परब्रह्मण्यवेत्तारोऽगमागमविवर्जिताः ।
लोभमोहमदक्रोधरागमायाजुषश्च ये ॥
तैः साकं न च कर्तव्यमेतच्छ्रेयोऽर्थिनात्मनि ।

(तं० आ०, आ० २९, श्लो० २८९–९०)

कुलाचारानुष्ठाने मकारत्रयोपयोगप्रयोजनानि

(१) प्रथमं प्रयोजनं मनःस्थैर्यपरीक्षणम्। रहस्यमये कुलाचारानुष्ठाने मकारत्रयस्य मद्यमांसमैथुनरूपस्योपयोगो न साध्यरूपेण, अपि तु साधनरूपेण राजयोगिनो मनस्तस्य वशे सर्वथा विद्यते न वेति परीक्षितुमादिष्टः। यथाह —

अत्र निर्विकल्पवृत्तीनां महात्मनां ज्ञानिनामेवाधिकारो येषां स्ववृत्तिप्रतिक्षेपेण संविदद्वैते एव किमेकाग्रीभूतं चेतो न वेति प्रत्यवेक्षामात्रे एवानुसन्धानम्। यदभिप्रायेणैव

न चर्या भोगतः प्रोक्ता ख्याता कामसुरूपिणी।
स्वचित्तप्रत्यवेक्षातः स्थिरं किं वा चलं मनः॥
इत्याद्युक्तम्। इति।

(तं० आ०, आ० २९, श्लो० १०२)

(२) द्वितीयं प्रयोजनं परकौलदशाप्राप्तिर्यस्यां शिवशक्तिसामरस्यरूपस्य विश्वमय-विश्वोत्तीर्णरूपाभ्यां भिन्नस्यैतदवस्थाद्वयहेतुभूतस्य सर्वथागलितद्वैतभावस्य जगदानन्दस्यानुभवः। यथोक्तम् —

इत्थं यामलमेतद् गलितभिदासंकथं यदेव स्यात्।
क्रमतारतम्ययोगात् सैव हि संविद्विसर्गसंघट्टः॥
तद्ध्रुवधामानुत्तरमुभयात्मकजगदुदारसानन्दम्।
नो शान्तं नाप्युदितं शान्तोदितसूतिकारणं परं कौलम्॥ इति।

(तं० आ०, आ० २९, श्लो० ११५–६)

(३) तृतीयं प्रयोजनम् योगिनीभूसंज्ञकस्य अभिनवगुप्तसदृशस्य पुत्रस्योत्पादनम्। स्त्रीपुंसोः सङ्गमकाले तन्मनःस्थानां विचाराणां भाविन्याः सन्ततेरुपरि महान् प्रभाव इति तु सर्वैः स्वीक्रियत एव। यथाह —

आहाराचारचेष्टाभिर्यादृशीभिः समन्वितौ।
स्त्रीपुंसौ समुपेयातां तयोः पुत्रोऽपि तादृशः॥ इति।

(भा० प्र०)

अतः कुलाचारप्रतिपादयितारो यादृश्य आहाराचारचेष्टा योगिनीभूसुतोत्पत्त्यर्थमावश्यक्यस्ता निर्दिशन्त आनन्दरूपस्यात्मनः स्वस्वरूपमभिव्यञ्जयितुमानन्दव्यञ्जकयोर्मद्यमांसयोरुपयोगमानन्दव्यञ्जकतामात्रपरतया, न तु गर्धेन आदिष्टवन्तः। यथाह —

आनन्दो ब्रह्म परमं तच्च देहे त्रिधा स्थितम् ।
उपकारि द्वयं तत्र फलमन्यत्तदात्मकम् ॥

(तं० आ०, आ० २९, श्लो० ९७–८)

यथा चाह जयरथस्तट्टीकायाम् —

"तत्रेति त्रयाणां मध्याद् द्वयं मद्यमांसलक्षणम्, अन्यदिति मैथुनम् । मद्यमांसपानाशन-प्रवर्धितधातुर्हि रममाण आनन्दमियादित्युक्तमुपकारीति" इति । तथैव —

कुलमार्गानुप्रविष्टेन सर्वथा स्वात्मानन्दव्यञ्जकतामात्रपरतया सेव्यम्, न तु गर्धेन । तथात्वे ह्यस्य लौकिकेभ्यः को विशेषः स्यात् ? यदाहुः—

ब्रह्मण्यानन्दाख्यं रूपमतो यत्समाश्रयवशेन ।
लभ्यत एव तदखिलं समाहरेद्विषयगर्धनिर्मुक्तः ॥

(तं० आ० टी०, आ० २९, पृ० ६७)

एवमभिव्यक्तानन्दौ स्त्रीपुंसौ रागमोहादिपरिशुद्धौ क्रमशः शक्त्या शिवेन च स्वतादात्म्यं कुर्याताम्, येन सिद्धयोगिनीप्रायपितृमेलकसमुत्थो योगिनीभूः सुतो जायेत । यथोक्तम् —

शिवशक्त्यात्मकं रूपं भावयेच्च परस्परम् ।
न कुर्यान्मानवीं बुद्धिं रागमोहादिसंयुताम् ॥
ज्ञानभावनया सर्वं कर्तव्यं साधकोत्तमैः । इति ।
तादृङ्मेलककलिकाकलिततनुर्यो भवेद् गर्भे ।
उक्तः स योगिनीभूः स्वयमेव ज्ञानभाजनं भक्तः ॥ इति च ।

(तं० आ० टी०, भा० १, पृ० १४)

कौलिकवैदिकयोरविरोधः

कुलार्णवतन्त्रं न केवलं धार्मिककृत्येभ्यो बहिर्मद्यपानं निषेधति, अपि तु तद्दर्शनं तत्समाघ्राणञ्च पातके मनुते, तदर्थं प्रायश्चित्ते च निर्दिशति । पशुहननानुमन्तारं मांसस्य क्रेतारं विक्रेतारं संस्कर्तारं खादयितारञ्च घातककोटौ निक्षिपति । यथाह —

सुरादर्शनमात्रेण कुर्यात् सूर्यावलोकनम् ।
तत्समाघ्राणमात्रेण प्राणायामत्रयं चरेत् ॥ इति ।

(कु० अ०, अ० २, १२८)

अनुमन्ता विशसिता निहन्ता क्रयविक्रयी ।
संस्कर्ता चोपहर्ता च खादिताष्टौ च घातकाः ॥ इति च ।

(कु० अ०, अ० २, १३३)

तथापि सर्वस्यापि कर्मण उद्देश्याश्रयं वर्जनीयत्वं मत्वा राजयोगिभिरनुष्ठीयमानेषु कुलाचारेषु मद्यमांसोपयोगं शास्ति, यथा वेदे सौत्रामण्यां सुरापानमन्यत्र च सोमपानं पितृदैवत-यज्ञेषु पशुहिंसनञ्च विहितम् । यथाह —

यथा क्रतुषु विप्राणां सोमपानं न दूषितम् ।
अलिपानं तथा कार्यं समये भोगमोक्षदम् ॥ इति ।

(कु० अ०, अ० ५, ८६)

पितृदैवतयज्ञेषु वेदे हिंसा विधीयते ।
आत्मार्थं प्राणिनां हिंसा कदाचिन्नोचिता प्रिये ॥ इति ।

(कु० अ०, अ० ५, ४०)

सेवते मधुमांसानि तृष्णया चेत् स पातकी ।
मन्त्रार्थस्फुरणार्थं च मनःस्थैर्याय हेतवे ॥
भवपाशनिवृत्त्यर्थं मद्यपानं समाचरेत् । इति च ।

(कु० अ०, अ० ५, ८२–३)

कुलाचारानुष्ठानं तथैवातीव दुष्करं भयानकञ्च यथा कृपाणधाराया उपरि गमनम्, व्याघ्रस्य कर्णेन ग्रहणम्, भुजङ्गस्य वा हस्ते धारणम् । अत इदमतीव सावधानतया तेनैव राजयोगिनाऽनुष्ठेयम्, यस्य वशे मनः सर्वथा वर्तते; यो मद्यमांसोपभोगेनेन्द्रियेषूत्प्रेरितेषु रमणी-सान्निध्याच्च कामभावनायामत्यर्थमुद्दीपितायां विषयानन्दे पूर्णतयाऽनुभूयमानेऽपि क्षणेनैव विषयेभ्यो मनः प्रत्याहृत्य सुषुम्णायां प्रवेश्य परतत्त्वसाक्षात्करणे समर्थः । यथोक्तम् —

कृपाणधारागमनाद् व्याघ्रकर्णावलम्बनात् ।
भुजङ्गधारणान्नूनमशक्यं कुलसेवनम् ॥ इति ।

(कु० अ०, अ० २, १२३)

एवमुपर्युक्तदृशा नास्ति कौलवैदिकयोर्धार्मिककृत्यार्थं मद्यमांसाद्युपयोगे काचन विमतिः ।

दार्शनिकविवरणम्

कुलदर्शनं सम्यगवबोद्धुमिदमवश्यं स्मरणीयम्—

(अ) कुलदर्शनप्रतिपादयितारः क्रमप्रत्यभिज्ञाख्येऽपरेऽपि द्वे दर्शने प्रत्यपादयन् ।

सोमानन्दो न केवलं कुलदर्शनस्य सर्वतोऽधिकं प्रामाणिकं ग्रन्थं परात्रिंशिकेति नामानं व्याचख्यौ, परं प्रत्यभिज्ञादर्शनप्रतिपादनपरां शिवदृष्टिमपि लिलेख, क्रमदर्शनगुरुपरम्परायां च सुविख्यातो गुरुर्बभूव ।

उत्पलाचार्योऽपि कुलदार्शनिकविषयेषु स्वमतानि प्रकटीचकार । उदाहरणतः क्षोभाधारभूताया योनेर्विषये तन्मतमभिनवगुप्तपादैः स्पष्टमुल्लिखितम् । यथाह —

यदैक्यापत्तिमासाद्य तदिच्छा कृत्तिनी भवेत् ।
क्षोभाधारमिमं प्राहुः श्रीसोमानन्दपुत्रकाः ॥

यथा च विवृतं जयरथेन —

"तमेतं क्षोभस्य संवित्स्वातन्त्र्यस्याधारं विषयं श्रीसोमानन्दस्यानुकम्प्याः पुत्राः— श्रीमदुत्पलदेवप्रभृतयः शिष्याः प्राहुः, आचक्षत इत्यर्थः" इति ।

(तं० आ०, आ० ३, श्लो० ८४–५)

अभिनवगुप्तो न केवलं स्वीयतन्त्रालोक एव अनुपाय–शाम्भव–शाक्तनाम्नस्त्रीन् मोक्षोपायान् क्रमशो विवृण्वानः प्रत्यभिज्ञा–कुल–क्रम–दर्शनान् प्रतिपादयामास; अपि तु उत्पलाचार्यकृत–ईश्वरप्रत्यभिज्ञाकारिकां तद्विवृतिं च स्वीयटीकयोः ईश्वरप्रत्यभिज्ञाविमर्शिनी–ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनीनाम्न्योः प्रत्यभिज्ञादर्शनम्, परात्रिंशिकाविवरणे कुलदर्शनं क्रमस्तोत्रे च क्रमदर्शनं पृथक् पृथग् विववार । अतः कुलदर्शनप्रतिपादने सोमानन्दाभिनवगुप्तौ क्रम–प्रत्यभिज्ञादर्शनविचारधाराभिस्तत्र तत्र प्रभावितौ स्पष्टं लक्ष्येते ।

(आ) अतीव क्लिष्टं कुलदर्शनम् । इदं चाभिनवगुप्तपादानां जीवनचरितस्योपरि दृष्टिपातेन बुध्यते । अभिनवगुप्तो हि काश्मीरिकेभ्यः स्वगुरुभ्यः कुलदर्शनस्य सार्वांशिकं विवरणं सन्तोषकरमलभमानः शम्भुनाथपादेभ्यस्तदध्येतुं रहस्यचर्यां च सम्यगवबोद्धुं कश्मीराज्जालन्धरं जगाम । अस्मिन्नानार्थकाः कुल-अकुल-अनुत्तरादयः शब्दा बहुशः प्रयुज्यन्ते । बिन्दुनादादीनां दर्शनान्तरासाधारणानां गहनविषयाणां चर्चा प्राधान्येन क्रियते । मायादयश्च दर्शनान्तर-

साधारणाः शब्दा दर्शनान्तराभ्युपगतेभ्योऽर्थेभ्यो भिन्नेष्वर्थेषु प्रयुज्यन्ते। अत एतदवबोद्धुं महतश्चित्तैकाग्र्यस्यावश्यकता।

कुलदर्शनस्य दर्शनान्तरेभ्यो वैलक्षण्यम्

दर्शनान्तराणि बौद्धवेदान्तादीनि सर्वविषयपरित्यागरूपं सन्यासं मोक्षमार्गमाहुः। तानि भोगमोक्षयोः सार्वांशिकं विरोधमुद्घोषयन्ति; भोगं मोक्षपरिपन्थिनं मन्वते, परं कुलदर्शनं भोगं न केवलं मोक्षपरिपन्थिनं नोरीकरोति, अपि तु मोक्षावाप्तौ सोपानभूतमिति प्रदर्शयति। यथा साहित्यविदो रङ्गमञ्चोपरि प्रत्यक्षमुपस्थापितः साधारणीभूतो विषयः सहृदये प्रेक्षितरि साधारणीभूतरूपायां प्रमात्रवस्थायां सञ्जातायामानन्दमभिव्यनक्तीति स्वीकुर्वन्ति, तथैव कुलाम्नायविद आदियागापरनामकस्य कुलयागस्यानुष्ठानम्, यस्मिन् मद्यमांसादीनामिन्द्रिय-विषयाणामुपयोग आदिष्टः, यस्मिन् विषया नोपेयभूता, अपि तु उपायभूता एव। अत एव यस्मिन् विषयसंसर्गो न पापावहः, तमनुष्ठातारमानन्दस्वरूपां मोक्षावस्थां नयति, यो विषयै-र्विषयानन्दे उद्भाविते विषयानुपेक्ष्य आनन्दरूपे स्वस्वरूपे प्रतिष्ठीभवितुं शक्नोति। एवमिदं दर्शनं भोगमोक्षयोर्विरोधमपाकृत्य तयोः सामञ्जस्यं साधयति सिद्धान्तयति च।

इदं भोगमोक्षयोः सामञ्जस्यमभिनवगुप्तचित्रे सम्यक् प्रतिबिम्बितम्, यस्मिन् शिवरसकरकं पूर्णताम्बूलपेटीं च बिभ्रत्योः पार्श्वस्थितयोर्दूत्योः सेवया सङ्गीतस्य श्रवणेन नृत्यस्य दर्शनेन धूपमाल्याद्याघ्राणनेन मृदुललिमतलस्वर्णपीठासनस्य स्पर्शेन च जनितविषयानन्दोऽभिनवगुप्तो विषयांशमपास्य स्वात्मविश्रान्तिरूपं शुद्धमानन्दमनुभवन्नानन्दान्दोलिताक्षः चित्रितः।

प्रतिपाद्यविषयपरिच्छित्तिः

काश्मीरदार्शनिकैः परात्रिंशिकाया विशिष्टमध्ययनं दार्शनिकदृशा कृतम्। तेषु द्वावेव प्रधानौ—सोमानन्दः, अभिनवगुप्तश्च। उभावपि परात्रिंशिकाया उपरि भिन्ने टीके व्यलिखिताम्। तस्यां कुलदर्शनस्य त्रयः प्रधानांशाः प्रतिपादिताः—(१) अनुत्तरस्य स्वरूपम्। (२) बिन्दुरूपिण्या मयूराण्डरसन्यायानुसारमनुत्तरेणैकरूपायाः परापरपर्याया अनुत्तरायाः स्वरूपम्। (३) अकारादिं-हान्तानां देवनागरीवर्णानां क्रमिको विकाशः, तेषां कुलदर्शनस्वीकृततत्त्वव्रातपरतया व्याख्यानं च। अभिनवगुप्तः स्वयमेव कथयति यत् कुलदर्शनस्य मुख्यतया प्रतिपाद्या विषयाः परात्रिंशिकाया आद्ये श्लोकचतुष्टये एव व्याख्याताः। यथाह—

'अनुत्तरं कथम्' इत्यादिसार्धश्लोकनिगमितेन प्रश्नेन 'शृणुदेवि' इत्यादिना सार्धश्लोक-निर्णीतेन चोत्तरेण, अनुत्तरपदप्राप्तिवशाविष्टजीवन्मुक्तभावानां कृतकृत्यता, अतस्तावन्मात्र एव दृढप्रतिपत्तिपवित्रीकृतहृदयैर्विश्रमणीयम्, इत्युद्भुजाः फूत्कुर्मः । इति ।

(प० त्रिं० वि०, पृ० ६६—७)

इमे एव विषयाः शाम्भवोपायप्रतिपादनपरे तन्त्रालोकस्य तृतीयाह्निके कुल-प्रत्यभिज्ञा-दर्शनसाधारणेन बिम्बप्रतिबिम्बवादेन सह स्पष्टतरं व्याख्याताः । अतः समयस्य स्वल्पत्वा-दिमानेव विषयान् एतद्ग्रन्थद्वयं प्राधान्येनाश्रित्य व्याचिख्यासामि ।

अपरं च यद्यप्यद्यत्वे आगमदर्शनानभिज्ञैर्वैयाकरणदर्शनं वेदान्तदर्शनाभिन्नमिति मन्वानैर्वैयाकरणदर्शनप्रतिपादका वाक्यपदीय–लघुमञ्जूषादयो ग्रन्था वेदान्तदार्शनिक-प्रक्रिययैव व्याख्यायन्ते, तथापि—

अध्याहितकलां यस्य कालशक्तिमुपाश्रिताः ।
जन्मादयो विकाराः षड् भावभेदस्य योनयः ॥इति।

"स्वातन्त्र्यशक्तिः कालः" इत्यादीनां च वाक्यानामुपरि दृष्टिपाते क्रियमाणे, इदं सुस्पष्टीभवति यद् भर्तृहरिर्न वेदान्ती, अपि तु स्वातन्त्र्यवादी; यथा प्रतिपादितं मया—"स्वातन्त्र्य-वादी भर्तृहरिः" इति शीर्षके व्याख्याने । तथा च नागेशभट्टः शब्दब्रह्मप्रतिपादने न सर्वथा वेदान्तप्रक्रियामाश्रयते, अपि तु वैयाकरणदर्शनस्य विभिन्नांशव्याख्याने शैवतान्त्रिक-प्रक्रियामवलम्बते इतीयं विचारधारा लघुमञ्जूषाया उपरि कुञ्जिकाटीकाकर्तुर्दुर्बलाचार्यस्य कलाख्यटीकाकर्तुश्च बालम्भट्टस्य समयादेव प्रचलिता आसीत्, यथा विशदीभवति टीकोद्धृतेभ्यः प्रपञ्चसार-शारदातिलकादिशैवागमप्रमाणवाक्येभ्यः । इमामेव परम्परामनुसरद्भिः पूज्यवर्यै-र्महामहोपाध्यायैः श्रीगोपीनाथकविराजमहोदयैः, पण्डित-सभापति-उपाध्यायरचिताया रत्नप्रभाख्याया लघुमञ्जूषाटीकाया अग्रलेखे स्पष्टमुक्तं यद् भर्तृहरिमतं सम्यगवबोद्धुं शैवागमाध्ययनमत्यावश्यकम् । पण्डितसूर्यनारायणशुक्लमहाभागश्च स्वीयायां वाक्यपदीय-ब्रह्मकाण्डटीकायां नागेशभट्टमतमुद्धरन् मुक्तकण्ठमुद्घोषयति :—

"स चायं पन्था न वाक्यपदीयकारानुगतः, किन्तु तन्त्रशास्त्रानुगतः" इति ।

(वा० प०, ब्र०, पृ० ६७)

अतः कुलदर्शनव्याख्यावसरे इदं प्रतिपिपादयिषितं यत् कुलदर्शनस्य नागेशोपरि कियान् प्रभाव आपतितः ? केष्वंशेषु नागेशमतस्य कुलदर्शनेन साम्यं वैषम्यं वा ? किं तत्रैतिहासिकं

शास्त्रीयं वा प्रमाणम् ? के ते कौलग्रन्थाः शैवग्रन्था वा येषां विशिष्टः प्रभावो लक्ष्यते ? इदं सर्वं मनसि निधाय (क) अनुत्तराया बिन्दुरूपिणीत्वम्, अथ च परावाग्रूपत्वम्; (ख) बिन्दुनादयोः स्वरूपं तयोश्च पारस्परिकः संबन्धः; (ग) पुरुषस्य षोडशकलत्वम्; (घ) सोमानन्दसमये कश्मीरे प्रचलितस्य भर्तृहरिमतस्य स्वरूपम्; (ङ) सोमानन्दकृतं तत्समीक्षणम्; (च) तस्य नागेशोपरि प्रभावः; (छ) नागेशस्योपर्यद्वैतवेदान्तस्य प्रभावः, शैवागमप्रभावात्ततो भेदश्च इत्यादयो विषया यथावसरं विवेचनार्थमुपस्थापयिष्यन्ते ।

(१) अनुत्तरम्

कुलदर्शनेऽनुत्तरस्याभ्युपगमः कुलदर्शनं प्रत्यभिज्ञादर्शनादुत्पलदेवप्रतिपादिताद् विशेषयति । प्रत्यभिज्ञादर्शने षट्त्रिंशदेव तत्त्वानि स्वीकृतानि, भास्करकण्ठानुसारं च उत्पलाचार्यः शिवपरमशिवयोः शिवमहेश्वरयोर्वा ऐक्यं स्वीचकार । यथाह :—

"तत्त्वतः शिवपरमशिवयोरैक्यमेव; तथापि स्वरूपनिर्देशाभिप्रायेण अनाश्रितशिवत्वेन कथनम्, व्यापकत्वाभिप्रायेण परशिवत्वकथनम्" इति ।

(भा० भा० २, पृ० २१२)

परमभिनवगुप्तः परात्रिंशिकामनुगच्छन् प्रत्यभिज्ञादर्शनव्याख्याने सप्तत्रिंशं तत्त्वमनुत्तराभिधं स्वीकरोति । एवं कुर्वाणः स भास्करकण्ठोद्धृतमागमवाक्यं हृदये निदधाति स्म । यथा—

"यत्परतत्त्वं तस्मिन् विभाति षट्त्रिंशदात्म जगत्" इति ।

(भा० भा० २, पृ० २११)

अनुत्तरशब्दस्य भिन्ना अर्थाः

(अ) उपर्युक्तवाक्यानुसारमनुत्तरशब्दस्य विग्रह एवं 'न विद्यते उत्तरम्—अधिकं यतः' इति । इदं निरर्गलस्वप्रकाशस्वरूपम् । अस्मिन् सर्वेषां तत्त्वानां ताद्रूप्येणावस्थितिः । तत्त्वान्तराणि तदेवानुभान्ति । एवं च स्वेभ्यस्तस्यौत्कर्ष्यं व्यञ्जन्ति । न च तत उत्कृष्टमधिकं वा किञ्चनास्ति, अत एव परं तत्त्वमनुत्तरमिति व्यपदिश्यते ।

(आ) न विद्यत उत्तरं प्रश्नप्रतिवचो रूपं यत्रेति विग्रहानुसारमनुत्तरं तत्तत्त्वं यद्विषये कोऽपि प्रश्नो नापि किञ्चन उत्तरं सम्भवति ।

(इ) उत्तरणम् उत्तरः भेदवादिनामपवर्गः, स यत्र नास्ति तदनुत्तरम् । यतो हीदं तत्परं तत्त्वम्, यद् आणवकार्ममायीयरूपाणां सर्वेषां पाशानां सर्वथोच्छित्तिरूपपरमोक्षप्राप्तवभिव्यज्यते, भेदवादिनामपवर्गस्तु नियतिक्षेत्रान्तर्गत एव । अतोऽनुत्तरं तदभावरूपम् ।

(ई) उत् ऊर्ध्वं तरणम् उत्तरः, ऊर्ध्वतरणक्रमः । यथा योगिनो नाभिहृदयकण्ठतालु-ब्रह्मरन्ध्रभैरवविलेषु वर्तमानेषु स्वाधिष्ठानादिनामसु षट्सु चक्रेषु क्रमशो मनः समाधाय उर्ध्वमूर्ध्वं गच्छन्ति । अनुत्तरं तद् यस्मादूर्ध्वं गमनं नास्ति । नास्ति उत्तरः—उर्ध्वतरणक्रमो यस्मात् ।

(उ) उत्तरन्ति यस्मादसौ उत्तरो बन्धः । नास्ति उत्तरो बन्धो यत्र तदनुत्तरम् । एवं च अनुत्तरं यत् तत्सर्वबन्धविनिर्मुक्तम् ।

(ऊ) उत्तरणम् उत्तरः कस्माच्च न मोक्षः । अनुत्तरं तद् यस्माद् मोक्षो नास्ति, नास्ति उत्तरो मोक्षो यस्मात् ।

(ऋ) उत्तरं शब्दप्रयोगः, एवं च अनुत्तरं तद् यत्रायं स ईदृक् तादृग् इत्यादि-शब्दप्रयोगः, तदाहिता च परिच्छित्तिर्नास्ति । अलक्ष्यं निर्विकल्प्यं चेदं तत्त्वम् ।

(ॠ) उत्तरशब्दः पश्चाद्भाव्यपरपर्यायः । तथा च पश्यन्तीमध्यमावैखर्य उत्तरा इत्युच्यन्ते । एवं चानुत्तरं तत् परसमाधावनुभूयमानं तत्त्वं यस्मिन् पश्यन्त्यादयो वाच उद्भूत-रूपेण न भवन्ति ।

(ए) 'नुत्' शब्दः, नोदनं नुत्—इति विग्रहे प्रेरणार्थकाद् नुद् धातोः "अन्येभ्योऽपि दृश्यते" (३ - २ १७८) इति पाणिनिसूत्रानुसारं क्विप्प्रत्यये तस्य च सर्वलोपे सिध्यति । तथा च 'प्रेरणम्' अस्यार्थः । तरशब्दश्च तरणं तरः—इति विग्रहे प्लवनतरणार्थकात् 'तॄ' धातोः 'ॠदोरप्' (३ - ३ · ५७) इति सूत्रानुसारम् अप्प्रत्यये कृते सिध्यति । एवं च नुदा तरो यत्र तद् नुत्तरम्, न नुत्तरम्, अनुत्तरम् इति विग्रहानुसारम् अनुत्तरं तत् तत्त्वम्, यत्र अधोभूमिकातस्तरणं परप्रेरणया न भवति । यदि वयमिमं काश्मीरशैवसिद्धान्तं स्मरामो यद् दीक्षायामनुग्रहोन्मुखो गुरुः स्वामात्मशक्तिं शिष्ये संचार्य तमूर्ध्वार्ध्वभूमिकाः प्रति प्रेरयति, तदा एतस्मिन् प्रसंगे अनुत्तरशब्दार्थः स्पष्टीभविष्यति । एवं चानुत्तरं तत्तत्त्वं यं प्रति परप्रेरणं न सम्भवति, तथा शून्यदशातो विषुवद्दशां प्रति । दीक्षयाप्यप्राप्यमिदं तत्त्वमित्यर्थः ।

(ऐ) अननम् अन् इति विग्रहे प्राणनार्थकात् 'अन्' धातोः पूर्ववत् क्विप्प्रत्यये तस्य च सर्वलोपे 'अन्' इति सिध्यति । तथा च अननं प्राणनं जीवनं जीवः, स च शून्य इत्युच्यते । यथाह :—

एवं शून्य एवाहन्ता अक्षचक्रोद्दलिता जीवनम्, इति स शून्य एव जीवः संसरति ।

(भा० भा० २, पृ० २६३)

यतः परः प्रकाश एव परमार्थतः सर्वेषां जीवानां जीवनम्, अतः परः प्रकाशोऽपि शून्य इत्यभिधीयते । यथाह :—

यन्नाम हीदं मातृमानमेयत्रयात्मविश्वाभेदेनावभासमानं प्रकाशतत्त्वम्, इच्छादि-शक्त्यविशेषितम्, तदेव स्वस्वातन्त्र्यात् स्वात्मनि स्वाविभागेनावस्थितं विश्वात्ममेयमवभिभासयिषया आत्मनः पृथक्कृत्य सर्वस्मादुत्तीर्णोऽहमित्यामर्शनेन सकलभावशून्यत्वाद् निरावरणरूपतया शून्यप्रमाता इत्यागमेष्वाम्नातः । शून्यत्वं चात्र सकलभावक्षयात्, न तु संविदोऽपि; तथात्वे च सर्वमनेलमूकं स्यात् । उक्तं चान्यत्र—

सर्वालम्बनधर्मैश्च सर्वतत्त्वैरशेषतः ।
सर्वक्लेशाशयैः शून्यं न शून्यं परमार्थतः ॥ इति ।

(प० त्रि० टि०, पृ० २६)

एवं च अनः सर्वेषां जीवनरूपस्य सकलभावशून्यत्वेन शून्यरूपस्य परप्रकाशस्योत्तरत्वं प्राधान्यं यत्र तदनुत्तरम् । यथाह तत्रैव—

तस्यैव (अनः) उत्तरत्वं सर्वतः परमार्थतया आधिक्यं यत्र—भैरवैकमयत्वात् ।

अनेन शून्यशब्दव्याख्यानेन बौद्धाभ्युपगतशून्यवादात् काश्मीरशैवदार्शनिकस्वीकृतस्य शून्यवादस्य भेदः स्पष्टीक्रियते ।

(ओ) अनुत्तरपदस्य 'अस्य या नुत् तस्याः तरः प्लवनं सर्वोपरिवृत्तित्वं यत्र तत्' इति विग्रहेऽयमर्थो निःसरति—अवर्णवाच्यायाः 'अनुत्तरा' इति प्रसिद्धनाम्न्याः शक्तेर्विसर्गोन्मुख-तायाः प्राधान्यं यत्र तद् अनुत्तरम् । इदमेवं विशदीकर्तुं शक्यते ।

देवनागरीलिप्याः प्रथमो वर्णः अकारः अनुत्तरम् अनुत्तरां चाभिदधाति, ययोस्तथैवैकरूप्यम्, यथा अकारद्वयस्य 'अतो गुणे' इति सूत्रेणैकरूपीकृतस्य एकरूपता । तत्र च कदाचित् प्रकाशरूपस्य अनुत्तरस्य प्राधान्यम्, यथा उपर्येव प्रदर्शितम् । कदाचन च विमर्शरूपाया अनुत्तरायाः प्राधान्यं भवति यथा प्रकृते । अनुत्तरा च मायोत्तीर्णा, अमायीया, महाप्रकाशरूपानुत्तरविश्रान्ता, नैसर्गिकी, श्रुतिष्वकीर्तिता, निस्तरंगचिदुदधिस्वात्मचमत्काररूपा, परिपूर्णाहन्तायाः परिच्छिन्ना-हन्तायाश्च भूमिः शुद्धाशुद्धोभयरूपां सृष्टिं स्वस्या विसृजति । एवं चावर्णवाच्याया अनुत्तराया नुदो विसर्गौन्मुख्यस्य तरः प्लवनं सर्वोपरि वृत्तित्वं यत्र तदनुत्तरमित्यर्थो निःसरति । यथाह—

" 'अ' इति च या इयम् अमायीयाश्रौतनैसर्गिकमहाप्रकाशविश्रान्तनिस्तरङ्गचिदुदधि-स्वात्मचमत्काररूपा शाक्तोल्लासमयविश्वामर्शनरूपपरिपूर्णाहंभावप्रथमपर्यवसानोभयभूमिगा कला, तस्या एव वक्ष्यमाणनयेन या इयं 'नुत्' विसर्गान्तता तस्या एव 'तरः' प्लवनं—सर्वोपरिवृत्तित्वं यत्र" इति ।

(प० त्रि० वि० पृ० २७–८)

एवमन्येऽपि बहवोऽर्था अनुत्तरशब्दस्य अभिनवगुप्तपादैः प्रदत्ता ये मया स्वीयस्य अभिनवगुप्तनामकस्य आंग्लभाषायां लिखितस्य ग्रन्थस्य द्वितीयसंस्करणे षट्त्रिंशदधिकषट्शत-पृष्ठादारभ्य त्रिचत्वारिंशदधिकषट्शतपर्यन्तभागे प्रदत्ताः । इह तु विस्तरभिया नोल्लिख्यन्ते ।

अनुत्तरपदस्योक्तविवरणेभ्य इदं स्पष्टीभवति, यदिमेऽर्थाः कुलदर्शनाभ्युपगतजगत्सृष्टि-सिद्धान्तस्य, परयोगिना पराकाष्ठायां यत्तत्त्वमनुभूयते तद्विषयकसिद्धान्तस्य, प्रमाणमीमांसासिद्धान्तस्य चाधारभूमयः । जगत्सृष्टिसिद्धान्तदृष्ट्या इदमनुत्तरं तद् यद् अनुत्तरानाम्न्या शक्त्या अभिन्नम्, यदन्तः सर्वमपि भावजातं सृष्टौ महाप्रलये च वर्तते, यतः सर्वं प्रभवति, येन सर्वं तत्त्वत एकात्म, यत् सर्वस्य तात्त्विकं स्वरूपम् । यत् सर्वदा भासमानमपि परिमितप्रमातारं प्रति स्वस्वातन्त्र्येण न प्रकाशते । यथाह—

यत्र स्थितमिदं सर्वं कार्यं यस्माच्च निर्गतम् ।
तस्यानावृतरूपत्वान्न निरोधोऽस्ति कुत्रचित् ॥ इति ।

आवरकत्वेन निरोधकाभिमतोऽपि हि तदावरणादिस्वातन्त्र्येण प्रकाशमानो दृक्क्रियात्मकः परमेश्वर एव । इति ।

(प० त्रि० वि०, पृ० ८८)

योग्यनुभवनीयतत्त्वसिद्धान्तदृष्ट्या इदमनुत्तरं तत् तत्त्वं यस्मिन्ननुत्तरा अनुत्तरे निमग्ना यस्यां च परिमितः प्रमाता निमग्नः । प्रमाणमीमांसासिद्धान्तदृष्ट्या इदं सर्वेषां ज्ञानानामनिवार्यतया आवश्यकी पृष्ठभूमिः । मनोवैज्ञानिकज्ञानमीमांसादृष्ट्या द्वयोः सविकल्पकज्ञानयोर्मध्ये यद्भासते यस्य भासनात् तयोः पारस्परिकं पृथक्त्वं भाति तदिदमेवानुत्तरम्, यथा पूर्वमनुत्तरशब्दार्थ-व्याख्यानस्य 'ऐ' भागे वर्णितम् । तथाहि—

इदं तु सर्वसम्मतं यत्सविकल्पकज्ञानात् पूर्वं निर्विकल्पकज्ञानमवश्यंभावि । निर्विकल्पे च तेषां सर्वेषां ज्ञानांशानां सत्ता परस्पराविभागेन भवति, ये समनन्तरभाविविकल्पज्ञाने पारस्परिक-वैविक्त्येन भान्ति । निर्विकल्पकज्ञाने भाविविकल्पज्ञानांशानां तथैव सत्ता भवति यथा

चित्रज्ञाने तेषां सर्वेषां रङ्गाणां सत्ता भवति, ये चित्रज्ञाने भासन्ते। यथा वा केनचित् पर्वतशिखरात् कस्मिंश्चिन्नगरेऽवलोक्यमाने आलोचयितुर्ज्ञाने गृहवृक्षमन्दिरतडागादीनां सर्वेषां सत्ता भवति ये मेचकबोधे भासन्ते। ते द्वे निर्विकल्पकज्ञाने ये सविकल्पके द्वे ज्ञाने जनयतः परस्परतो भिन्नेऽवश्यमभ्युपेये, सविकल्पकज्ञानयोः परस्परं भिन्नत्वात्। एवं च भिन्नयो-र्द्वयोर्ज्ञानयोरन्तरालमनपह्नवनीयम्, अन्यथा ज्ञानयोर्द्वित्वं न शक्यते वक्तुम्। तच्चान्तरालं शून्य-मनुत्तरसंवित्स्वरूपं यत् पूर्वोक्तांशे वर्णितम्। यथाह—

उभयोश्च ज्ञानयोरन्तरालमनपह्नवनीयं ज्ञानयोर्भेदादेव। तच्च संविदात्मकमेव।

(प० त्रि० वि० पृ० १०६)

२ अनुत्तरा

अनुत्तरपदव्याख्याया औ—भागे अनुत्तरायाः स्वरूपं स्वल्पमुक्तम्। अनुत्तरा सा अनुत्तरेऽविभागेन वर्तमाना शक्तिः, यस्यां सर्वमपि वाच्यवाचकात्मकं विश्वं तथैव वर्तते यथा मयूराण्डरसे भिन्ना रङ्गाः। यस्याश्च सर्वं भावजातं तथैवोच्छलति यथा समुद्रात्तरङ्गाः। वाच्य-सृष्टिसिद्धान्तदृष्ट्या इयं कौलिकी शक्तिरित्युच्यते। पश्यन्तीमध्यमावैखर्यभिधानां वाचां मूलत्वेन सर्ववागुत्तीर्णत्वेन चेयं 'परावाक्' इत्युच्यते। परः प्रकाशो न जडो मण्यादिप्रकाशवत्, अपि तु स्वात्मपरामर्शी, एवं च चेतनः। अतो वेदान्तिनां जडब्रह्मवादभिन्नं चेतनपरतत्त्ववादसिद्धान्तं दृढं स्थापयितुमेकस्यैव तत्त्वस्य यदा काल्पनिकं विभजनं क्रियते, तदा यः प्रकाशाद्भिन्न-श्चित्यंशो विमर्श इत्युच्यते, स इयमेव। एवमेव विभिन्नान् प्रयोजनान् मनसि निधाय कालकर्षिणी पराप्रतिभा इत्यादयः शब्दा अनुत्तरां परामृष्टुं प्रयुज्यन्ते।

अनुत्तरा पराप्रतिभा परावाक् च

साहित्यशास्त्रवित्सु प्रतिभा सुप्रसिद्धा। सा खलु 'अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा' (ध्व० ९२) इति 'वर्णनीयवस्तुविषयनूतनोल्लेखशालित्वम्' (ध्व० ३१७) इति चोच्यते। तन्निष्ठमेव महाकवीनां महाकवित्वम्। अस्या एव कारणादुत्तमकाव्यानां ध्वनिप्रधानानामानन्त्यम्। यथाह—

न काव्यार्थविरामोऽस्ति यदि स्यात् प्रतिभागुणः।इति।

(ध्व० ५३७)

अनेनानन्त्यमायाति कवीनां प्रतिभागुणः। इति।

(ध्व० ५२२)

काव्यं तु जातु जायेत कस्यचित् प्रतिभावतः । इति च ।

(ध्व० लो० ६७)

इयमेव कविं काव्यसंसारनिर्माणक्षमं विधत्ते । यथाह —

अपारे काव्यसंसारे कविरेकः प्रजापतिः ।
यथास्मै रोचते विश्वं तथेदं परिवर्तते ॥ इति ।

(ध्व० ४९८)

इयं स्वतन्त्रा, न प्रकृत्यनुसारिणी । इयं जडांश्चेतनीकरोति, चेतनांश्च जडीकरोति । यथाह —

भावानचेतनानपि चेतनवच्चेतनानचेतनवत् ।
व्यवहारयति यथेष्टं सुकविः काव्ये स्वतन्त्रतया ॥ इति ।

(ध्व० ४९८)

यथैव कविगतेयं नवनवोल्लेखशालिनी, तथा सहृदयगतेयं प्रतिभा उल्लिखितमर्थं सहृदय-मानसचक्षुषः पुरा वाच्यलक्ष्यार्थद्वारेण झटित्येवोद्भासयति । यथाह —

यथा पदार्थद्वारेण वाक्यार्थः संप्रकाशते ।
वाच्यार्थपूर्विका तद्वत् प्रतिपत्तस्य वस्तुनः ॥ इति ।

(ध्व० १००)

प्रतिपत्तृप्रतिभासहकारित्वं ह्यस्माभिर्द्योतनस्य प्राणत्वेनोक्तम् । इति च ।

(ध्व० लो० ९८)

इयं वाक्यस्फोटं प्रतिपादयता भर्तृहरिणा 'प्रतिभा वाक्यार्थः' इति वदता समभ्युपगता यतो वाक्यार्थः श्रोतारं प्रति तथैव भाति यथा ध्वन्यर्थः । यथाह —

विच्छेदग्रहणेऽर्थानां प्रतिभान्यैव जायते ।
वाक्यार्थ इति तामाहुः पदार्थैरुपपादिताम् ॥ इति ।

(वा० प०, का० २, श्लो० १४५)

नागेशेनापीयं स्वीकृता 'प्रतिभाविषयत्वाच्च प्रतिभा वाक्यार्थः' (ल० मं० ३९७) इति कथयता । यतो वाक्यार्थः श्रोतृगतप्रतिभाया विषयः ।

कुलदर्शनप्रतिपादिता परा प्रतिभा न केवलं कविप्रतिभातो यावत् परावाचोऽप्यभ्यधिका । कविप्रतिभा केवलमपूर्वकाव्यवस्तुनिर्माणक्षमा, इयं तु सर्ववस्तु निर्माणक्षमा । परस्यां वाचि

केवलं वर्णा अकारादयोऽसामयिकेन अकृत्रिमेण संविन्मयेन रूपेण, एवं च भेदस्योच्छूनत्वात् परापरा रूपा पश्यन्ती नाम्नी वाग् भेदस्य क्रमेण स्फुटतरत्वात् स्फुटतमत्वाच्च मध्यमावैखरीनाम्न्यौ वाचावपि तदैक्यरूपेण वर्तन्ते। परं पराप्रतिभा वाच्यवाचकावुभावपि स्वाभेदेन क्रोडीकृत्य तिष्ठन्ती स्वस्याः प्रतिभासयति। इयमेव अनुत्तरापरनाम्नी पराप्रतिभा यदा विश्लिष्य पश्यन्त्यादिकारणत्वेनोच्यते, तदा परा वागित्युच्यते। यथाह —

अनन्यापेक्षिता यास्य विश्वात्मत्वं प्रति प्रभोः।
तां परां प्रतिभां देवीं संविदन्ते ह्यनुत्तराम्॥ इति।

(तं० आ० भा० २ पृ० ७४)

अमीषां वर्णानां परावाग्भूमिरियमिह निर्णीयते, यत्रैवैषामसामयिकं नित्यमकृत्रिमं संविन्मयमेव रूपम्, संविन्मये च वपुषि सर्वसर्वात्मकता सततोदितैव, सा च परमेश्वरी पराभट्टारिका तथाविधनिरतिशयाभेदभागिन्यपि पश्यन्त्यादिकाः परापराभट्टारिकादिस्फाररूपा अन्तःकृत्य तत्तदनन्तवैचित्र्यगर्भमयी, नहि 'तत्र यन्नास्ति तत् क्वाप्यस्ति' इति न्यायम्। परामृशत च प्रथमां प्रतिभाभिधानां संकोचकलङ्ककालुष्यलेशशून्यां भगवतीं संविदम्। तथाहि—यत्किञ्चित् चरमचरं च तत् पारमार्थिकेनानपायिना रूपेण वीर्यमात्रसारात्मना तदुद्भविष्यदीषदस्फुटतमेषदस्फुटतरेषदस्फुटादिवस्तुशतसृष्टिकालोपलक्ष्यमाणतत्तदनन्तवैचित्र्यप्रथोन्नीयमानतथाभावेन संविदि भगवद्भैरवभट्टारिकात्मनि तिष्ठत्येव। इति च। (प० त्रि० पृ० १०२–३)

स्फारक्रमे अनुत्तरा बिन्दुरूपिणी

नागेशभट्टः स्फोटाख्यं शब्दब्रह्म प्रतिपादयन्नेकं प्रमाणवाक्यमुल्लिखति, यत्र शब्दब्रह्मकारणं बिन्दुरूपिणी प्रकृतिः स्वीकृता। यथाह —

क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणम्।
प्रकृतेर्बिन्दुरूपिण्याः शब्दब्रह्माभवत् परा॥ इति।

(ल० मं० पृ० ४१)

बिन्दुरूपिणी अनुत्तरैवाऽस्मिन् पद्ये परामृष्टेति प्रतिभाति। अतोऽस्या विवेचनमावश्यकं नागेशभट्टमतं सम्यगवबोद्धुम्।

अकारादयो वर्णाः तत्संगठनरूपाः शब्दा वाक्यानि च पश्यन्त्यादिक्रमेणानुत्तराया एतस्मिन् प्रसङ्गे परावागित्यभिहितायाः स्फुरन्ति। न केवलम् अकारादिहकारान्तो देवनागरी-

वर्णक्रमो यावत् तत्परामर्शनीयः पदार्थक्रमोऽप्यनुत्तराऽभिन्नायाः स्वतन्त्राया अनुत्तराया एव स्फारक्रमः ।

यथा वेदान्तिनो नामरूपात्मकं जगदिति मन्वते, तथैव शैवा विश्वस्य वाच्यवाचकात्मना द्विधा अवभास इति मन्वानाः प्रकाश एव प्राधान्येन वाच्यात्मविश्वरूपत्वेन परिस्फुरति विमर्शश्च तत्तदनुत्तरानन्दाद्यामर्शात्मना अकारादिवर्णात्मना चोदेतीति सिद्धान्तयन्ति । परामर्शोदयक्रमो वर्णोदयक्रमश्चैवम् ।

अकारोऽनुत्तरम्

यथा नन्दिकेश्वरः स्वीयनन्दिकेश्वरकाशिकायां पाणिनीयचतुर्दशमाहेश्वरसूत्रस्थवर्णान् दार्शनिकतत्त्वपरत्वेन व्याचख्यौ, तथा कौला देवनागरीवर्णमालास्थान् अकारादिक्षकारपर्यन्तान् पञ्चाशद्वर्णान् कुलदर्शनाभ्युपगततत्त्वपरतया व्याख्यायन्ति । एवं यथा नन्दिकेश्वरोऽकारं ब्रह्मरूपं कथयति, तथैव कौला अकारम् अनुत्तररूपं कथयन्ति । अनुत्तरं च तत्त्वं पूर्वं व्याख्यातम् ।

आकार आनन्दः

शिवरूपेऽनुत्तरे शक्तिरूपायां चानुत्तरायां स्पन्दे स्वात्मोच्छलत्तारूपे स्वातन्त्र्यादुद्भूते तयोः परस्परं संघट्टे आनन्दवाचक आकारस्तथैवोदेति यथा अकारद्वयस्य 'अकः सवर्णे दीर्घः' इति सूत्रानुसारं सवर्णदीर्घे कृते आकारो जायते ।

इच्छा इकारः

इच्छाशक्तिवाचक इकारः समनन्तरोक्तरूपे संघट्टे चितः प्राधान्याद् यो यं परस्य प्रमातुः सिसृक्षात्मा परामर्श उदेति सेयमिच्छाख्या शक्तिः । अस्या वाचक इकारः । इयं सर्वथा बाह्यपदार्थसंसर्गरहिता बहिरौन्मुख्यमात्ररूपिणी स्रष्टव्यानारूषितेच्छामात्ररूपा ।

ईशनम् ईकारः

इयमेव बहिर्मुखी इच्छाशक्तिर्यदा एषणीयविषयारूषितत्वात् प्रक्षुब्धरूपतां श्रयति, तदा ईशनशक्तिस्तद्वाचकश्च ईकार उदेति ।

उन्मेष उकारः

प्रक्षुब्धरूपत्वात् पूर्वं व्यतिरिक्तविमृश्याभावात् स्वात्ममात्रनिष्ठो योऽनुत्तररूपः केवलः परामर्श आसीत्, स एवान्तर्विजिज्ञास्यतया इष्टस्य विश्वस्याद्यपरिस्पन्दरूपे उन्मेषे जाते ज्ञानशक्त्यपरपर्यायेण उन्मेषरूपेण भासते । उन्मेषवाचकश्च उकारः ।

ऊनता ऊकारः

ज्ञातव्यविश्वोन्मेषस्य प्राधान्ये ज्ञाने च तदपेक्षया अप्राधान्ये ज्ञानस्य ज्ञानमात्रतायामून-त्वस्य अपूर्णत्वस्य भासनम् ऊनताशक्तिः । ऊनतावाचकश्च ऊकारः ।

कुलदर्शनानुसारमुपर्युक्तं परामर्शषट्कं मुख्यम् । अतस्तद्वाचकानां षण्णां स्वराणां प्राधान्यम् । सर्वेऽन्ये परामर्शा एतेषां मौलिकानां परामर्शाणामन्योन्यं प्रमेयेण वा संसर्गादुदियन्ति । कुलदर्शने यत्परं तत्त्वं प्रतिपादितं तदुपेतुं क्रमेणाश्रयणीयानि बहूनि साधनानि प्रतिपादितानि कुलागमानां योगपादेषु चर्यापादेषु च । तत्र मननार्थं बहवो मन्त्रा निर्दिष्टा येषु विचित्रो वर्णानां संघट्टो यः साधारणजनदृष्टौ निरर्थक इव प्रतिभाति, परन्तु रहस्यसंप्रदाये इमे वर्णा तत् प्रतीकयन्ति यदुपरि साधकेन मन एकाग्रीकरणीयम्, येन च स्वात्मतादात्म्यं संपादनीयम् । एषां वर्णसंघट्टानां तथैव साङ्केतिकत्वं यथा वैदिकसंप्रदाये 'ओम्' इत्यस्य । अतो वर्णानां विभिन्नपरामर्शद्योतकत्वाभ्युपगमस्य रहस्यं बोद्धुमिदं सम्यग् मनसि निधेयम् ।

ऋ ॠ ऌ ॡ षण्डवर्णचतुष्टयम्

कुलसंप्रदायानुसारं रकारः अचिरद्युतिभासिनीं ज्वलनशक्तिं लकारश्च धरात्मिकां स्थैर्यशक्तिं द्योतयति । एवं च इच्छाशक्तिरूपस्य इकारस्य रकारेण संयोगे ऋकारः लकारेण च संयोगे ऌकारः । इह रलयोः श्रुतिमात्रम्, न तु साक्षाद् व्यञ्जनवत् स्थितिः । न हि श्रुतिरेव वर्णः । अत एव 'नरसिंहवज्जात्यन्तरमिदम्' इति महाभाष्यकारः । अतश्च अक्षुब्धा ज्वलनशक्त्याच्छुरिता इच्छा ऋ, क्षुब्धा तु तथाच्छुरिता ॠ । एवमेव अक्षुब्धा स्थैर्यशक्त्याच्छुरिता ऌ, क्षुब्धा तु तथाच्छुरिता ॡ । इदं वर्णचतुष्टयं बीजयोनिरूपस्वरव्यञ्जनोभयच्छायाधारित्वाद् नपुंसकत्वेन व्यपदिश्यते ।

ए ऐ ओ औ शक्तिपञ्चकसंघट्टवाचकाः

आनन्दशक्तिः "आनन्दं ब्रह्मणो रूपम्" इत्युक्त्या चिदव्यतिरिक्तैव । अतोऽस्याः शक्तिषु न पृथग्गणनम् । अतः अनुत्तरा-इच्छा-ईशन-उन्मेष-ऊनतानाम्न्यः पञ्चशक्तयोऽस्मिन् प्रसङ्गे विवक्षिताः । एवं च अनुत्तराविभक्ताया अनुत्तराया इच्छया ईशनेन वा व्यतिमिश्रणे तत्संघट्ट-द्योतक एकारः । तथैव उन्मेषस्य ऊनताया वा संघट्टे ओकारः । तस्या एव प्ररूढौ एकारेण भूयः संघट्टे ऐकारः, ओकारेण संघट्टे औकारः । इमानि सन्ध्यक्षराण्युपरि निर्दिष्टशक्तिसंघट्ट-वाचकानि । इमाः सर्वाः शक्तयस्तत्संघट्टाश्च अनुत्तारायाः स्फाराः । इमे संयुक्ताः स्वराः क्रिया-शक्तेर्यथाक्रमम् अस्फुटं स्फुटं स्फुटतरं स्फुटतमं च रूपं व्यञ्जन्ति ।

बिन्दुः शिवो बिन्दुरूपिणी अनुत्तरा च

अनुत्तरस्य अनुत्तरायाश्च प्रकाशस्य विमर्शस्य च वा अप्रविभागरूपं परं तत्त्वं स्वतन्त्रो महेश्वरः। अनुत्तरा च गर्भीकृतानन्तशक्तिः। सर्वाः शक्तयस्तस्या एव स्फाराः, एवं च तद्रूपा एव। प्रकाशविमर्शयोः पारस्परिको भेदो विश्लेषणपरया विकल्पबुद्ध्यैव क्रियते, न तु स पारमार्थिकः। शक्तिशक्तिमतोश्च वह्निदाहकयोरिव पारस्परिकोऽभेदः। एवं च स्वतन्त्रो महेश्वरः शक्तीनां प्रसारणे संहरणे च स्वतन्त्रत्वाद् अपरितात्मकः, नियतरूपानुपग्रहाद् अनवच्छिन्न-स्वभावः। वेदान्तिनां ब्रह्म इव न महेश्वरः कूटस्थः, अपि तु स्वतन्त्रः। स्वातन्त्र्यं चानन्तस्य तदभेदेन वर्तमानस्य शक्तिव्रातस्य यथेच्छं स्वात्मनो भेदेनावभासने स्वात्मनि च लयीकरणे अप्रतिहतं सामर्थ्यम्। यदि नाम महेश्वरः प्रतिनियतेन केनचिद्रूपेण घटादिवदवतिष्ठेत्, तदास्य माहेश्वर्यं संविद्रूपत्वं च न स्यात्। इदमेवास्य माहेश्वर्यं संविद्रूपत्वं च यत्तत्तदनियतवाच्यवाच-कात्मना परिस्फुरणम्। संविद इदमेव रूपमनुभवसिद्धम्। संविद्रूपा वयं न केवलं स्वात्मनोऽनु-भवामः, अपि तु स्वतन्त्रविकल्पादौ स्मरणादौ च स्वातन्त्र्येण तांस्तान् विषयान् वासनारूपेण स्वात्माऽभेदेन वर्तमानान् भिन्नतया स्वात्मसूल्लिख्य हर्षविषादाद्यनेकाकारान् स्वात्मनोऽनुभवामः। अयं खलु स्वात्मस्वभावः सर्वविदितः। अयमेव परिनिष्ठितरूपेभ्यः स्वानुभवरहितेभ्यः स्वत एव विभिन्नान् रूपान् धारयितुमसमर्थेभ्यो घटादिभ्यो जडपदार्थेभ्यो जीवत आत्मनो मुख्यो भेदः।

उपर्युक्तं सर्वं मनसि निधाय शैवा महेश्वरो बिन्दुरिति सिद्धान्तयन्ति। वेत्ति इति बिन्दुः। विदिक्रियायां स्वतन्त्रः परप्रमात्रैकरूपो महेश्वरः। इदमेवास्य बिन्दुत्वं यत्स्वात्म-परामर्शित्वम्, प्रमाणप्रमेयाद्याश्रयभूतायां क्रियाशक्तौ तत्तद्वैचित्र्यात्मना स्फुरन्त्यामपि दर्पण-नगरन्यायेन परमार्थतोऽवच्छेदशून्यपूर्णप्रकाशत्वम्।

बिन्दुस्वरूपे एवं निर्धारिते अनुत्तरा परापर्याया "बिन्दुरूपिणी" इति शैवमतं सुस्पष्टं भवति। तथा हि। समनन्तरोक्तरूपा अनुत्तरशक्तिः स्वस्वातन्त्र्याद् ग्राह्यग्राहकात्मकं भावजातं स्वस्यामभेदेन वर्तमानं सर्ववेद्यतया अवतिष्ठमानं कुर्वाणा अपि बिन्दुरूपिणी—वेत्तीति बिन्दुः, विदिक्रियायां स्वतन्त्रः परः प्रकाशः, तस्य रूपम् अविभागः परः प्रकाशः, तदेव विद्यते यस्याः सा। एवंरूपेण स्फुरन्ती अपि परप्रकाशस्वभावैव सती स्वरूपान्न प्रच्युता भवतीत्यर्थः। यथाह —

अत्रानुत्तरशक्तिः सा स्वं वपुः प्रकटस्थितम्।
कुर्वत्यपि ज्ञेयकलाकालुष्याद् बिन्दुरूपिणी॥ इति।

(तं० आ०, भा० २, पृ० ११६)

अनुत्तरापरपर्यायो विमर्शश्च प्रकाशस्य स्वभावः। यथाह —

स्वभावमवभासस्य विमर्शं विदुरन्यथा।

प्रकाशोऽर्थोपरक्तोपि स्फटिकादिजडोपमः॥ इति।

(भा० भा० १, पृ० २४१)

उपर्युक्तविवरणम् "क्रियाशक्तिप्रधानायाः" इत्यादि नागेशोद्धृतस्य पद्यस्यार्थं स्पष्टीकरोति। बिन्दुर्वर्णमालायाम् ए ऐ ओ औ इति स्वरचतुष्टयस्यानन्तरमायाति। इदं च स्वरचतुष्टयं क्रियाशक्तेरस्फुटं स्फुटं स्फुटतरं स्फुटतमं च रूपं क्रमशो व्यनक्तीत्युक्तं प्राक्। एवं च बिन्दु-पर्यन्तं स्फुरणे अनुत्तरशक्तिः क्रियाशक्तिप्रधाना। सैव च पश्यन्त्यादिरूपेण स्फुरन्ती 'परावाक्' इत्युच्यते। परा च शैवनये न केवलं शब्दरूपिणी यथा वैयाकरणानां नये, ये अर्थं शब्दस्य विवर्तं मन्वते, अपि तु शब्दार्थोभयरूपिणी। शैवनये हि परातः पश्यन्त्यादीनां भेदः, न नाभि-हृत्-कण्ठदेशगतवायुजनितरवाभिव्यक्तिकृतः। यथाह —

"तदेव नाभिपर्यन्तमागच्छता तेन वायुना अभिव्यक्तं मनोमात्रविषयः पश्यन्ती" इत्यादि।

(ल० मं० १४७-८)

अपि त्वर्थस्य शब्दात् क्रमिकविकाशकृतः। यथाह —

"तृतीयस्यां (पश्यन्त्याम्) त्वभिधानयोर्ग्राह्यग्राहकगतयोरभिधेययोश्च ग्राह्यग्राहकगतयोर्यथा-स्वं यः क्रमो देशतः कालतश्च संभवति········प्रसेवक इव तमन्तर्लीनं क्रमलक्षणं विभाग-माच्छाद्य आस्ते" इत्यादि।

(ई० प्र० वि० वि० भा० २, १८६)

इत्थं शैवनये परा "शब्दशब्दार्थकारणम्"। बिन्दुरूपिण्या अनुत्तराया परां प्रति कारणत्वं तु तथैव यथा फुल्लपुष्पं प्रति कलिकायाः; यतः सृष्ट्युन्मुखी एवानुत्तरा 'परा' इत्युच्यते। अत एव 'बिन्दुरूपिण्याः' इत्यत्र "जनिकर्तुः प्रकृतिः" (१-४-३०) इति सूत्रानुसारं पञ्चमी संगच्छते। अत एव च 'बिन्दुरूपिण्याः' इति विशेषणस्य 'प्रकृतेः' इति विशेष्यं युक्तिसंगतम्।

अतः सांख्यवेदान्तप्रक्रिये आश्रित्य यदनधीतशैवागमैर्व्याख्यातृभिर्विवरणमस्य शैवागमपद्यस्य कृतं तच्चिन्त्यम्। यथाह —

"मायानुपहितं ब्रह्म निर्गुणम्, मायोपहितं सगुणम्; तच्च ब्रह्म जगदुपादानमिति मते तदेव बिन्दुशब्दवाच्यम्, प्रकृतेरुपादानत्वे तु सैव बिन्दुः" इत्यादि।

(ल० मं० कुं० ५१)

वर्णमालाद्योतितानि पञ्चत्रिंशत् तत्त्वानि

कौला उद्घोषयन्ति यत्तैरभ्युपगतानि तत्त्वानि तेषामाविर्भावक्रमं च वर्णमालैव द्योतयति। तथाहि—अकारादि-विसर्गान्तं शिवतत्त्वम्। कादि-ङान्तं धरादि-नभोन्तं भूतपञ्चकम्। चादि-ञान्तं गन्धादि-शब्दान्तं तन्मात्रपञ्चकम्। टादि-णान्तं पादादि-वागन्तं कर्माक्षपञ्चकम्। तादि-नान्तं घ्राणादि-श्रोत्रान्तं बुद्धिकरणपञ्चकम्। पादि-मान्तं मनोऽहंकार-बुद्धि-प्रकृति-पुरुषाख्यं पञ्चकम्। यादयो वकारान्ताः (यरलवाः) राग-विद्या-कला-मायाख्यानि तत्त्वानि। शादि-क्षान्तं महामाया-विद्या (शुद्धविद्या)-ईश्वर-सदासिव-शक्त्याख्यं तत्त्वपञ्चकम्।

कुल-प्रत्यभिज्ञादर्शनयोस्तत्त्वसंख्याविषये भेदः

इदमिहावधेयम्—प्रत्यभिज्ञादर्शने शिवादिक्षित्यन्तानि षट्त्रिंशत्तत्त्वानि परिगणितानि। अनुत्तरश्च उत्पलाचार्येण न स्वीकृतः। न च महामाया पृथक् तत्त्वरूपिणी स्वीकृता, अपितु विद्यातत्त्वांशभूतैवाभ्युपगता। परिमितात्मनः परिच्छेदकैः राग-विद्या-कलारूपैः कौलाभ्युपगतैस्त्रिभि-र्नियति-कालरूपं तत्त्वद्वयमपरं संयोज्य शिवं चानुत्तराद्भिन्नरूपं प्रकाशप्रधानं स्वीकृत्य षट्त्रिंश-त्तत्त्वानीति सिद्धान्तितम्।

कुलदर्शने तु शिवमनुत्तराभिन्नं प्रकाशविमर्शसामरस्यरूपं स्वीकृत्य नियतिकालौ च पृथग् न निरूप्य महामायायाश्च शुद्धविद्यातत्त्वान्तर्भावं न मत्वा पञ्चत्रिंशदेव तत्त्वानि निर्दिष्टानि।

कौलाद्वैतविवेचनम्

अकारादिक्षकारान्तायां वर्णमालायां पञ्चाशद्वर्णाः। उपर्युक्तविवरणानुसारं प्रत्येकमेकं भिन्नं तत्त्वं द्योतयति। अतः प्रश्नोऽयं जागर्ति किमेतेषु प्रत्येकं सत्यम्? ओमिति चेत्, कथं कौलाभ्युपगतोऽद्वैतसिद्धान्तः शक्यते परिरक्षितुम्? कौल इत्थमुत्तरयति—

सर्वं वस्तु चिन्मयमेवेति शैवशिद्धान्तः। तथा च वर्णमालायाः पञ्चाशद्वर्णा-स्तत्संख्याकान् मौलिकान् परामर्शान् द्योतयन्ति। न च ते सर्वथा स्वतन्त्राः। ककारादि-क्षान्ता वर्णा व्यञ्जनानीति तु सर्वविदितम्। विमृश्यतां व्यञ्जनशब्दार्थः। व्यज्यते इति व्यञ्जनमित्युच्यते। यद् व्यज्यते तद् व्यञ्जकान्तरेव भवति। तथा च व्यञ्जनाख्यं वर्णजातं सर्वमुदयात्पूर्वं "स्वरमयम्" स्वराणामेवान्तःशक्तिरूपेणावस्थितम्। अत एव तद्वर्णजातं बहिरभिव्यज्यते, न त्वपूर्वतया उत्पाद्यत इति हेतोर्व्यञ्जनमित्युच्यते पूर्वमपि स्वरात्मना तथावस्थानात्। यथाह —

इत्थं यद्वर्णजातं तत्सर्वं स्वरमयं पुरा।
व्यक्तियोगाद् व्यञ्जनं तत्स्वरप्राणं यतः किल ॥ इति ।

(तं० आ० भा० २, पृ० १७६)

स्वरेष्वपि अन्त्या ऋकरादि-विसर्गान्ता दश स्वराः सन्धिरूपाः। तेषु स्वरव्यञ्जनसन्धि-रूपा ऋकारादयश्चत्वारः, अन्त्यौ च बिन्दुविसर्गरूपौ द्वौ। स्वरद्वयसन्धिरूपा एकारादयश्चत्वारः। आद्येषु षट्सु स्वरेषु दीर्घास्त्रयः स्वरा ह्रस्वेभ्यस्त्रिभ्य उदियन्तीति पूर्वमेव प्रतिपादितम्। यथाह —

अनुत्तरं परामृश्य परामर्शकभावतः।
संघट्टरूपतां प्राप्तं भोग्यमिच्छादिकं तथा ॥ इति ।

(तं० आ० भा० २, पृ० १८३)

यथा च व्याख्यातं जयरथेन —"अकारद्वयसंयोगादाकारलक्षणं भोग्यं जातमिति तात्पर्यम्" इत्यादि ।

एवमपि त्रिकाभ्युपगमादद्वैतं न सिध्यतीति चेत्, उच्यते, अकार-इकार-उकाररूपं वर्णत्रय तद् द्योतितम् अनुत्तरा-इच्छा-उन्मेषरूपं शक्तित्रयं च न स्वतन्त्रम्, अपि तु इच्छा-उन्मेष-रूपं शक्तिद्वयमनन्तशक्त्यविभागरूपायाः स्वातन्त्र्यशक्तेः स्फारः। इयं केषुचन प्रकरणेष्वनुत्तरा इति व्यपदिश्यते। अनुत्तरा चानुत्तरेण, तथैवैकरूपा यथा 'शकन्धुः' इत्यत्र शकशब्दान्त्यस्य अन्धुशब्दाद्यस्य च अकारस्य "शकन्ध्वादिषु पररूपं वाच्यम्" इति वार्तिकानुसारमैकरूप्यम्। एवं चानुत्तरमेवैकं तत्त्वं तद्वाचकश्च अकार एवावशिष्यते, तथा च अद्वैतसिद्धिः। इदं च— "अकारो वै सर्वा वाक्" इति वदद्भिर्वेदानुयायिभिरपि स्वीक्रियते।

बिन्दोर्नादो जीवकला

वेत्तीति बिन्दुः प्रकाशरूपः परः प्रमाता इत्युक्तं प्राक्। अयं विमर्शाभिन्नतया वर्तमानः परः प्रकाशो न केवलं परामर्शनीयविश्ववैचित्र्यात्मना परिस्फुरति यावत् तत्तत्परामर्शात्मना अकारादिवर्णरूपेणापि। तथा चायं बिन्दुस्तत्तत्परामर्शात्मतामुल्लिलासयिषुर्नादात्मकशब्दरूपेण परिस्फुरति। तथा हि—शब्दयति = स्वाभेदेन विश्वं परामृशतीति शब्दः, परावाग्रूपो विमर्शः। स च नादात्मकः, नदति सर्वेषां जीवकलात्वेन परिस्फुरतीति यावत्। अयं नाद आगमेषु 'अ'

स्वरत्वेन व्यपदिश्यते यस्य सर्वेऽपरे वर्णाः स्फाराः। यथाह —"अकारः सर्ववर्णानामन्तर्यामितया स्थितः" इति (तं० आ० भा० २, पृ० १२०)।

अयमेव नादरूपोऽकारस्तत्तत्परामर्शरूपाणां सर्वेषां वर्णानां प्राणनरूपत्वेन स्थितः सर्वं वर्णराशिं स्वस्मात् स्फारयति। अथ चायमेव नादः सर्वेषां प्राणिनां सूर्याचन्द्रात्मप्राणापान-प्रवाहरूपतयाप्यवस्थितः। अतः स एव जीवकला इत्यभिधीयते। यथाह—

योसौ नादात्मकः शब्दः सर्वप्राणिष्ववस्थितः।
अधऊर्ध्वविभागेन निष्क्रियेणावतिष्ठते॥ इति।

(तं० आ० भा० २, पृ० ११६)

एवं च कुलदर्शनानुसारं परः प्रमाता प्रकाशविमर्शमयो बिन्दुः। अज्ञजनबोधनाय तस्य काल्पनिके विश्लेषणे क्रियमाणे यो विमर्शभागः, स एव विसिसृक्षा-कौलिकी-परा इत्यादिभिः शब्दैरुच्यते। तथा च सृष्टिक्रमोन्मुखस्य भिद्यमानस्य बिन्दोः सा परा प्रथमः स्फारः। यथाह—

अस्यान्तर्विसिसृक्षासौ या प्रोक्ता कौलिकी परा।
सैव क्षोभवशादेति विसर्गात्मकतां ध्रुवम्॥ इति।

(तं० आ० भा० २, पृ० १३६)

परायाश्च नादो यो जीवकलेत्यप्युच्यते। अयं नादः परायास्तदुपरि वर्तमानत्वात् पराया आसनमित्युच्यते। यथाह—"तदेतत्परं (आसनम्) पश्यन्त्याख्यं ज्ञानशक्तेरेव पर्यन्तधाम नादाख्यरूपमतिक्रमणीयत्वेन स्थितम्" इति (प० त्रिं० १२६)।

पश्यन्ती च सदाशिवाख्यतृतीयतत्त्वरूपिणी। यथाह—

अथास्माकं ज्ञानशक्तिर्या सदाशिवरूपिणी।
वैयाकरणसाधूनां पश्यन्ती सा परा स्थितिः॥ इति।

(शि० दृ० २६)

उपर्युक्तविवरणात् कुलदर्शनस्य नागेशप्रतिपादिताद् वैयाकरणदर्शनाद् भेदः स्फुटी-भवति। नागेशनये नादः परा रवः स्फोटाख्यं शब्दब्रह्म च एकमेव तत्त्वम्। यथाह —

"अस्माद् बिन्दोः शब्दब्रह्मापरनामधेयम्, वर्णादिविशेषरहितं ज्ञानप्रधानं सृष्ट्युपयोग्यवस्थाविशेषरूपं चेतनमिश्रं नादमात्रमुत्पद्यते। एतज्जगदुपादानमेव 'रव' 'परा'-आदिशब्दैर्व्यवह्रियते" इति (ल० मं० १४५)।

परं कुलनये नादः पराया आसनम्, नादमतिक्रम्य परावतिष्ठते। परा अनुत्तरशक्तिरूपिणी, नादस्तु ज्ञानशक्तिप्रधानः पश्यन्तीरूपः, परा तु तदतिक्रान्ता।

षोडशकलः पुरुषः

अद्वैतशैवग्रन्थेषु परात्रिंशिकाविवरणतन्त्रालोकादिषु पुरुषशब्दो महेश्वरार्थे परिच्छिन्नप्रमात्रर्थे च प्रयुज्यते। एवं च पुरुषः षोडशकलः सप्तदशकलश्चोक्तः। यदा पुरुषशब्देन परः प्रमाता महेश्वरो विवक्षितः, तदा वर्णमालायाः षोडशस्वरा अकारादारभ्य अःपर्यन्ताः, ये पूर्वोक्तरीत्या अनुत्तरादिविसर्गान्तानां शक्तीनां तत्सामञ्जस्यरूपसंघट्टानां च द्योतकाः, षोडशकला उच्यन्ते। तासु च विसर्गशक्तिः 'अमृता' इत्युच्यते। यथाह—

स एष परमेश्वरो विसृजति विश्वम्, तच्च कादि-क्षान्तरूपम्-इति एतावती विसर्गशक्तिः 'षोडशी कला' इति गीयते।

पुरुषे षोडशकले तामाहुरमृताह्वयाम्। इति।

(प० त्रिं० १८१)

इदमत्रावधेयम्--अभिनवगुप्तो मुक्तकण्ठं कथयति यदेषा षोडशी कला विसर्गशक्तिरूपा सांख्यवेदान्तदर्शनयोर्नाभ्युपगता। यथाह—"एषा हि न सांख्येया नापि वैदान्तिकी दृक्, अपि तु शैव्येव" इति (प० त्रिं० १८१)।

परिच्छिन्नप्रमात्रर्थे यदा पुरुषशब्दः प्रयुज्यते, तदा पुरुषः सप्तदशकलः कथ्यते। तासु षोडशकलाः प्राणपञ्चकं बुद्धीन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकम् एकं चान्तःकरणम्—इत्येवं परिगण्यन्ते। तत्र चामृताकाररूपिणी चिन्मात्रस्वभावा 'कौलिकी', 'परा' इत्यादिशब्दव्यपदेश्या सप्तदशी कला। इयं सर्वासामन्यासां कलानामाप्यायिनी। षोडशकलाभिरुपहिता चिद् जीवः। यथाह—

कला सप्तदशी यासौ............।
पुरुषे षोडशकले तामाहुरमृताह्वयाम्॥

"इत्याद्युक्त्या अन्तःकरणप्रभृतीनां षोडशानामपि कलानामाप्यायकारित्वाद् नित्योदितत्वेन च अनस्तमितरूपत्वाद् अमृताकाररूपिणी येयं चिन्मात्रस्वभावा 'कौलिकी परा' इत्येवमादि-शब्दव्यपदेश्या हकारार्धाधरूपिणी अमाख्या सप्तदशी कला" इति (तं० आ० भा० २, पृ० १४१)।

एवं शैवदर्शनानुसारं भर्तृहरिणोद्धृतस्य "पुरुषे षोडशकले" इत्यादिमहाभारतवाक्य-स्यार्थः स्पष्टो भवति ।

चित्प्रतिबिम्बं जगत्

अनुत्तराभ्युपगमः कुलदर्शनं दर्शनान्तरेभ्यो विभेदयति । जगद् न ब्रह्मणो विवर्तः, यथा वेदान्तिनये; न प्रकृतेः परिणामः यथा सांख्यनये; न ईश्वरेच्छाजनितं परमाणुसंघातमात्रम्, यथा न्यायवैशेषिकनये; न क्षणिकविज्ञानसन्ततिमात्रं यथा विज्ञानवादिबौद्धनये; अपि त्वनुत्तरेण स्वाविभागेन वर्तमानया स्वस्वरूपभूतया अनुत्तराख्यया स्वातन्त्र्यापरनाम्न्या शक्त्या स्वस्मिन्ना-भासितं प्रतिबिम्बम् ।

शैवानां जगत्सृष्टिसिद्धान्तो ज्ञानमीमांसासिद्धान्तश्च तदीयबिम्बप्रतिबिम्बवादसिद्धान्ता-श्रितः । जगत्सृष्टिसिद्धान्तप्रसङ्गे बिम्बप्रतिबिम्बवादसिद्धान्तेन शैवा इदं स्पष्टयन्ति यत्परतत्त्वस्या-विकारित्वं नैर्मल्यं जगति स्वशक्त्या स्वस्मिन् प्रतिबिम्बितेऽपि तथैव नापगच्छति यथा दर्पणस्य नैर्मल्यं बाह्यवस्तुषु, तस्मिन् प्रतिबिंबितेष्वपि यत् प्रतिबिम्बस्य प्रतिबिम्बग्राहकेण दर्पणादिना नास्ति तात्त्विको भेदः, तथा च चिति प्रतिबिम्बितस्य विश्वस्य नास्ति चितस्तात्त्विको भेदः, चिन्मय-मेव विश्वम् । विश्वं न चितः स्वतन्त्रसत्ताकं यथा प्रतिबिम्बं दर्पणतलात् । प्रतिबिम्बसम्पर्कं बाह्यं वस्तु न प्रतिबिम्बस्योपादानकारणम्, अपि तु निमित्तकारणमेव । अत एव विरही भावनात्मतामा-पन्नेन तीव्रस्मरणेन प्रतिबिम्बसहिष्णौ पुरोवर्तिन्यालोके जनितं दूरदेशस्थाया अपि प्रियायाः प्रतिबिम्बं पश्यति । निमित्तकारणं च न तथा नियतं भवति, यथा उपादानकारणम्; मृण्मयो घटो मृत्तिका-रूपोपादानकारणेन विना न शक्यते घटयितुम्, परं निमित्तकारणेन दण्डेन विनापि हस्तेनैव चक्रं परिचाल्य शक्यते घट उत्पादयितुम्। एवं च बाह्यजगदभावेऽपि तत्प्रतिबिम्बमनुत्तरया जन्यत इति शैवसिद्धान्तः। यथाह—

इत्थं विश्वमिदं नाथे भैरवीयचिदम्बरे ।
प्रतिबिम्बमलं स्वच्छे न खल्वन्यप्रसादतः ॥ इति ।

(तं० आ० भा० २, पृ० ७२)

प्रतिबिम्बं च शैवनये न मिथ्या, यथा जयन्तभट्टादिकाश्मीरिकनैयायिकमते य आहुः। प्रत्यावृत्तैर्नयनरश्मिभिः स्वस्यैव मुखस्य ग्रहणेऽपि दर्पणे मुखमिति भ्रान्तिरियम्, न पुनः सत्यत्वभ्रान्तत्वव्यतिरेकेण तृतीयस्य राश्यन्तरस्य अभावात् प्रतिबिम्बं नाम किंचिदस्तीति। येषां च मतमभिनवगुप्तपादैरेवं निराकृतम् —

विपर्यस्तैस्तु तेजोभिर्ग्राहकात्मत्वमागतैः।
रूपं दृश्यते वदने निजे न मुकुरान्तरे॥ इति।

(तं० आ० भा० २ पृ० १५)

परावाग्विषयके संस्कृतसाहित्येतिहासे नागेशस्य स्थानम्

बहुषु वैयाकरणदर्शनप्रतिपाद्यविषयेषु हरिनागेशयोर्भेद इति तु सुप्रसिद्धम्। एषां भेदानां कारणानि परावाग्विषयकः संस्कृतसाहित्यस्येतिहासः स्पष्टयति। अतस्तदेवाधुना प्रस्तूयते।

(अ) वाक् ऋग्वेदे दशममण्डले वागाम्भृणीसूक्ते जगत्कारणत्वेन एवं च सायणाचार्यानुसारं ब्रह्मरूपत्वेन स्वीकृता। यथा —

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः।
अहं मित्रावरुणोभा विभर्म्यहमिन्द्राग्नी अहमश्विनोभा॥ इत्यादि।

(ऋ० वे०, मं० १०, सू० १२५)

यथा च स्पष्टीकृतं सायणेन —

वागाम्भृणी यद् ब्रह्म जगत्कारणं तद्रूपा भवन्तीति। इति।

एवंविधानि श्रुतिवाक्यानि भर्तृहरिरपि स्वमताधारत्वेन तत्र तत्रोल्लिखति। यथाह — "शब्दस्य परिणामोऽयम्" (वा० प० का० १, श्लो० १२१) इत्यस्य टीकायाम् — "ऋग्वर्णोऽपि "वागेव विश्वाभुवनानि जज्ञे वाच इत्सर्वमृतं यच्च मर्त्यम्" इति।

नागेशभट्टोऽपि—

सूक्ष्मामर्थेनाप्रविभक्ततत्त्वामेकां वाचमभिनिष्यन्दमानाम्।
तामन्ये विदुरन्यामिव च नानारूपामात्मनिं सन्निविष्टाम्॥

इति श्रुतिवाक्यं शक्तिनिरूपणप्रसङ्गे समुल्लिखति।

बृहदारण्यकोपनिषद्यपि "वाग् ब्रह्म" इत्युक्तम्। यथा —

वाग्वै सम्राट् परमं ब्रह्म। इति।

(बृ० आ० अ० ६, ब्रा० १, वा० २)

(आ) नागेशभट्टः स्वीयलघुमञ्जूषायां शब्दब्रह्मनिरूपणादि कुर्वन् शब्दब्रह्म–परा–स्फोट–नाद इति शब्दचतुष्टयमभिन्नार्थकं स्वीकरोति (ल० मं०, पृ० १४१–६, ३७१)। तथा च स्फोटवादे विवृतं स्फोटविषयकं स्वीयं मतं स्फोटायन-ऋषिमतानुसारि इत्युद्घोषयति । यथाह —

वैयाकरणनागेशः स्फोटायन-ऋषेर्मतम् ।
परिष्कृत्योक्तवांस्तेन प्रीयतां जगदीश्वरः ॥ इति ।

(स्फो० वा० १०२)

पाणिनिः "स्फोटायनं अवङ् स्फोटायनस्य" (६–१–१२३) इति सूत्रे कीर्तयति । एवं चायं स्फोटायनः पाणिनिपूर्वभावी ईशापूर्वपञ्चमशतभव इति स्वीकर्तुं शक्यते ।

(इ) पाणिनिगुरुर्नन्दिकेश्वरः स्वीयनन्दिकेश्वरकाशिकायां परापश्यन्त्यादिविषये एवमाह —

सर्वं परात्मकं पूर्वं ज्ञप्तिमात्रमिदं जगत् ।
ज्ञप्तेर्बभूव पश्यन्ती मध्यमावाक् ततः स्मृता ॥

(नं० का० श्लो० ५)

(ई) पतञ्जलिना स्फोटः कण्ठरवेणोपवर्णितः "तपरस्तत्कालस्य" (१–१–६९) इति सूत्रभाष्ये । यथाह—"एवं तर्हि स्फोटः शब्दः" इति ।

(उ) महाभारते आश्वमेधिके पर्वणि ब्राह्मणगीतायामुपलब्धानि–

अविभागा तु पश्यन्ती सर्वतः संहृतक्रमा ।
स्वरूपज्योतिरेवान्तः सैषा वागनपायिनी ॥

इत्यादिवाक्यान्याश्रित्य भर्तृहरिणा व्याकरणदर्शनं स्थापितमिति सर्वविदितमेव ।

(ऊ) 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः" (१-१-५) इति वदन् जैमिनिः शब्दस्य नित्यत्वं शब्दार्थयोः सम्बन्धस्य च नित्यत्वं स्वीकुर्वन्नपि स्फोटं नोरीकृतवान् । शाङ्करभाष्यानुसारं वादरायणोऽपि स्फोटं खण्डितवान् "शब्द इति चेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम्" (ब्र० सू० १-३-२८) इति सूत्रे ।

सांख्यसूत्रकारोऽपि स्फोटं निराकृतवान्—

प्रतीत्यप्रतीतिभ्यां न स्फोटात्मकः शब्दः ।

(सां० सू० ५, ५७) इति सूत्रे ।

नैयायिकास्तु न केवलं स्फोटम्, अपि तु शब्दनित्यत्वमपि न मन्वते ।

एवं वाचो ब्रह्मत्वप्रतिपादनं तद्विषये च मतभेदोऽतीव प्राचीनकालात् प्रचलति स्म इति सुस्पष्टम् ।

ईशवीयनवमशते काश्मीरे प्रसिद्धस्य भर्तृहरिमतस्य स्वरूपम्, नागेशस्य च ततो भेदः

यीत्सिंगनाम्नो चीनयात्रिणो लेखादिदं ज्ञायते यद् भर्तृहरिरेकपञ्चाशदधिकषठशते ईशवीये स्वर्गमगात् । स च वाचः पश्यन्तीमध्यमावैखरीनामानस्त्रयो भेदा इति वैयाकरणदार्शनिकमतं स्थापितवान् । यथाह —

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम् ।
अनेकतीर्थभेदायास्त्रय्या वाचः परं पदम् ॥ इति ।

(वा० प० का० १, श्लो० १४४)

यद्यपि नागेशभट्टो भर्तृहरिः परामपि स्वीकृतवानिति मतं स्थापयति, तथापि तन्मतमुपर्युक्तश्लोकटीकायां यद् भर्तृहरिणा स्वयमेवोक्तं तद्विरुद्धम् । यथाह—

"सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवदनाख्येयपरिमाणा तुरीयेण भागेन मनुष्येषु प्रत्यवभासते" इति ।

एवमेव यन्नागेशभट्टेन वाक्चतुष्टयाभ्युपगमः—

"चत्वारि शृङ्गास्त्रयो अस्य पादाः ।" इति,
"चत्वारि वाक्परिमिता पदानि ।"

इति च वाक्याभ्यां समर्थित इत्युद्घोषितम्, तन्न भाष्यकारसम्मतम्; यतो भाष्यकारः स्वयं चत्वारि इति पदं नामाख्यातोपसर्गनिपातरूपपदभेदचतुष्टयपरत्वेन, न तु परापश्यन्तीमध्यमावैखरीति वाग्भेदचतुष्टयपरत्वेन व्याचख्यौ । यथाह—

"चत्वारि शृङ्गाणि चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च" इति ।

भर्तृहरिरचितवाक्यपदीयस्य काश्मीरिकाध्येतृषु अष्टमशताब्द्यां यथा तन्मतं काश्मीरे प्रचलितमासीत् तस्य प्रतिबिम्बं सोमानन्दकृतशिवदृष्टौ नवमशताब्द्यामुपलभ्यते । तच्चेत्थम्—

(अ) भर्तृहरिनये पश्यन्ती एव सर्वोत्कृष्टा वाक्, पश्यन्ती एव परावाक् । इदमिह स्मरणीयम् । यद्यपि नागेशभट्टः स्वीयमञ्जूषायाम्—स्वरूपज्योतिरेवान्तः परा वागनपायिनी । इति ।

इति पाठमुल्लिखति, तथापि महामहोपाध्यायपण्डितगङ्गाधरशास्त्रिसंस्कृते सटीकवाक्यपदीये—

स्वरूपज्योतिरेवान्तः सैषा वागनपायिनी ।

इति पाठः समुपलभ्यते । अयमेव पाठः सूर्यनारायणशास्त्रिकृतब्रह्मकाण्डटीकायां (पृ० ११६) तथा काश्मीरिकरामकण्ठविरचिते रत्नत्रये (पृ० ३२) मुद्रितः । शिवदृष्टिटिप्पणे तु "सूक्ष्मा वागनपायिनी ।" इति पाठः प्रदत्तः । भर्तृहरिणा स्वीकृतः पाठः "सैषा वागनपायिनी" इत्येवासीत् । यथा स्पष्टीभवति तत्कृतटीकायाम् —"सैषा त्रयी वाक् चैतन्यग्रन्थिविवर्तवदनाख्येय-परिमाणा" इति (वा० प० टी०, पृ० ५७)।

(आ) भर्तृहरिरनुमानस्य प्रामाण्यं नाभ्युपगच्छति । यथाह—

अवस्थादेशकालानां भेदाद्भिन्नासु शक्तिषु ।
भावानामनुमानेन प्रसिद्धिरतिदुर्लभा ॥
हस्तस्पर्शादिवान्धेन विषमेऽप्यनुधावता ।
अनुमानप्रधानेन विनिपातो न दुर्लभः ॥ इति ।

(वा० प० का० १, श्लो० ३२, ४२)

(इ) पश्यन्तीरूपं ब्रह्म सर्वदेहव्यापकत्वेन स्थितं भोक्तृरूपत्वेनावस्थितं ज्ञेयरूपशून्यं चैतन्यमात्रं जीवात्मेत्युच्यते । अयमात्मा भोगायतनावस्थितो भोग्यं भुङ्क्ते । यथाह—

स एवात्मा सर्वदेहव्यापकत्वेन वर्तते ।
अन्तःपश्यदवस्थैव चिद्रूपत्वमरूपकम् ॥ इति ।

(शि० दृ० आ० २, श्लो० ३)

(ई) पश्यन्तीरूपं शब्दतत्त्वमनाद्यनन्तं ब्रह्म विश्वार्थभावेन विवर्तते, तदसत्यरूपमात्मनि उपगृह्णाति आभासयति । असत्यविभक्तान्यरूपोपग्राहिता हि विवर्तः । विवर्तस्य कारणं सद्भ्या-मनिर्वचनीया अनाद्या अविद्या या मायेत्यप्युच्यते ।

(उ) भर्तृहरिः पश्यन्तीरूपे ब्रह्मणि लीलां क्रीडां वा न मनुते । यथाह—

ज्ञातान् सृजत्यसौ तान्वा नेति ज्ञातेष्वदर्शनम् ।
अज्ञातेषु न सृष्टिः स्यादिष्टं क्रीडादिकं न च ॥ इति ।

(शि० दृ० आ० २, श्लो० २५)

(ऊ) अविद्योपशमाद् अक्षादिवृत्तौ विरतायां देशकालक्रमे च संहृते ग्राह्यग्राहकाकार-रहितं शुद्धं पश्यन्तीरूपमभिव्यज्यते । अतः शुद्धपश्यन्तीरूपप्राप्तिरेव मोक्षः ।

(ऋ) सोमानन्दसमये भर्तृहर्यनुयायिभिः पश्यन्तीस्फोटयोरैक्यं न स्पष्टमभ्युगतम् । यथाह—

स्फोट एव हि पश्यन्ती तदन्या वा द्वयं भवेत् । इति ।

(शि० द० आ० २, श्लो० ५८)

तथ्यं त्विदं यत्तदानीन्तनाः केचन भर्तृहर्यनुयायिनः स्फोटं पश्यन्त्या भिन्नमभ्युपजग्मुः । यथाह—"अन्ये वैयाकरणा एव स्फोटादन्यदेव शब्दात्मानं नित्यमिच्छन्ति" इति (शि० द० पृ० ८७) ।

(ॠ) इन्द्रियग्राह्यं जगत् पश्यन्तीविवर्तः । यथाह—

घटादिरूपैर्व्यावृता गृह्यते चक्षुरादिना । इति ।

यथा च व्याख्यातमुत्पलदेवपादैः —"परतोऽपि बाह्यार्थवासनया अविद्यारूपया क्रमेण घटपटाद्याकारैर्विवृता सैव वाक् चक्षुरादीनां ग्राह्यभावमापद्यते" इति (शि० द० आ० २, श्लो ७) ।

पश्यन्तीसमालोचना

शब्दब्रह्म ग्राह्यग्राहकविभागरहितं देशकालादिक्रमशून्यमेकमविभक्तं परं तत्त्वं पश्यन्ती-रूपमिति वैयाकरणसिद्धान्तः । परं सर्वथा विभागरहितं परं तत्त्वं पश्यन्तीरूपमिति वचः पूर्वापरविरुद्धं युक्तिशून्यं च । तथाहि पश्यन्तीशब्दः शतृप्रत्ययान्ताद् दृश्धातोर्निष्पन्नो वर्तमानकालभाविनीं दृशिक्रियामभिदधाति । सकर्मकश्च दृशिधातुः । ततश्च दृशिक्रियाकर्मणा केनचिदवश्यं भाव्यम् । किं तत्कर्म ? बाह्यं जगदिति चेत्, अपरः प्रश्नो जागर्ति, किं तत्सत्यमसत्यं वा ? सत्यत्वे विवर्तवाद-परित्याग आपतति; असत्यत्वे असत्यदर्शिन्याः पश्यन्त्याः सत्यत्वं दुरुपपादम् । अन्यच्च पश्यन्ती अविभागेति वैयाकरणाभ्युपगमः । कर्मसम्बद्धाया दृश्यदृष्टृविभागयुक्तायास्तस्या अविभागत्वकथनं तेषां विवेकराहित्यमेव द्योतयति । कर्मसम्बन्धोऽविद्याकारणादिति चेत्, उच्यताम्—अविद्या सत्या असत्या वा ? सत्या इति चेत्, स्वदर्शनक्षतिः, अविद्या-ब्रह्मरूप-सत्यद्वयाभ्युपगमापातात्; असत्या इति चेन्न, भवाभावयोरिव सत्यासत्ययो रूपश्लेषमयस्य सम्बन्धस्य

दुरुपपाद्यत्वात् । सत्यासत्योभयकोटिविलक्षणेति चेन्न, एतादृशस्यान्यस्य कस्यचन वस्तुनोऽननुभूयमानत्वात् । आदौ बहिर्भावान् सृजति, पश्चात् सृष्टांस्तान् पश्यतीति चेत्, सत्या पश्यन्ती असत्यान् भावान् सृजतीति विचित्रोक्तिः । अपरं च उच्यतां ज्ञातान् सृजत्यज्ञातान् वा ? ज्ञातान् सृजतीति चेन्न, सृष्टेः पूर्वमलब्धसत्ताकानां ज्ञानस्यासंभवात् । अज्ञातान् सृजतीति तु स्वदर्शनविरुद्धं क्रियायाः ज्ञानपूर्विकात्वस्वीकारात् । किमर्थं सा सृजतीत्यपि दुरुपपाद्यं लीलाक्रीडादेरस्वीकारात् । विस्तृतसमालोचनाजिज्ञासुभिः शिवदृष्टेर्द्वितीयमाह्निकमवलोकनीयम् ।

नागेशस्योपरि शिवदृष्टिप्रभावः

उपर्युक्तसमालोचनादिप्रभावितो नागेशः सोमानन्दकालीनेभ्यो भर्तृहरिमतप्रतिपादकेभ्यो भिन्नं स्वीयं मतं स्थापितवान् । भेदश्च निम्नाङ्कितेष्वंशेषु ।

१. पश्यन्त्युपरि परा ।

२. परास्फोटयोरैक्यम् ।

३. सगुणब्रह्मसृष्टौ परास्थानम् ।

४. सगुणब्रह्मणि लीला ।

कौलदर्शनस्य नागेशीयवैयाकरणदर्शनोपरि प्रभावः

नागेशभट्टः प्रलयानन्तरभाविनि सृष्टिक्रमे शब्दब्रह्मरूपस्य स्फोटस्य स्थानमेवं निर्दिशति —

१. प्रलयावस्थायां भोक्तृभोग्यरूपं सर्वं जगद् मायायां लीनं भवति । माया च ईश्वरे लीयते । तदानीमन्तर्लीनमाय ईश्वर एवावतिष्ठते ।

२. अपरिपक्वप्राणिकर्मसु कालवशात् परिपक्वेषु कर्मफलदानाय ईश्वरे स्वभावत एव इच्छा जागर्ति, सा च एष्टुः पृथगिवाभाति । एवं च इच्छैष्टारौ मायापुरुषपर्यायौ प्रादुर्भवतः ।

३. ततो भगवति सिसृक्षा जायते, इयमेव मायावृत्तिरित्युच्यते ।

४. ततो बिन्दुर्जायते, सोऽयं चित्-चिदचित्-अचित्-रूपकार्यबिन्दु-नाद-बीजाविभागरूपः, अत एव 'अव्यक्तः' इत्युच्यते ।

५. बिन्दोर्नाद उत्पद्यते । नाद एव वैयाकरणानां शब्दब्रह्म । इदमनेकव्यक्त्यभिव्यंग्यशब्दजातिरूपम् । अस्मिन्नकारादीनां वर्णानां जाताविव व्यक्तीनां पारस्परिकविभागेनावस्थानं न भवति । इदं ज्ञानशक्तिप्रधानम् । इदं शक्तस्येश्वरस्य सृष्ट्युपयोग्यवस्थाविशेषरूपम् । इदं जगदुपादानम्, तच्छब्दब्रह्म यद् एवमभिव्यनक्ति स्वप्रतिष्ठम्, अस्य आधारान्तरं नास्ति, न

चास्मिन् कश्चन स्पन्दः। इदं शान्तं ब्रह्म। इदमेव 'परा वाक्' इत्युच्यते। इदमेव तद् ब्रह्म यद् भर्तृहरिर्वाक्यपदीयप्रथमश्लोके "अनादिनिधनं ब्रह्म" इत्यादौ परामृशति।

६. अयं नादः सर्वव्यापकः। एवं च मूलाधारेऽपि वर्तते। तत्र पवनोऽप्यस्ति। यदा वक्तरि विवक्षा जागर्ति, विवक्षाकृतः प्रयत्नश्च मूलाधारस्थपवनेन संयुनक्ति, तदा तदनुसारं चलन् पवनः नादं शब्दब्रह्मापरपर्यायमभिव्यनक्ति।

७. तदेव ब्रह्म नाभिपर्यन्तमागच्छता वायुना अभिव्यक्तं पश्यन्तीत्युच्यते, हृदयपर्यन्तमागच्छता वायुनाभिव्यक्तम् मध्यमा, एवं कण्ठदेशपर्यन्तमागतेन वायुनाभिव्यक्तं वैखरीत्युच्यते। परा सूक्ष्मतमा मनसोऽप्यविषया समाधौ अविकल्पकज्ञाने भासते। पश्यन्ती सूक्ष्मतरा मनोविषया; एवं च योगिनां समाधौ सविकल्पकज्ञानगम्या। मध्यमा वाक् सूक्ष्मा बुद्धिग्राह्या च। अस्यां बुद्धिस्तत्तदर्थविशेषं तत्तच्छब्दविशेषं चोल्लिखति। इदं सर्वं नागेशभट्टेन लघुमञ्जूषायां प्रतिपादितम् (ल० मं०, पृ० १४१-१४६)।

क्वायं सृष्टिक्रमो नागेशेनोपलब्धः

नागेशकालीनसंस्कृतसाहित्यस्योपरि दृष्टिपाते क्रियमाणे स्पष्टमस्य प्रश्नस्योत्तरं समुपलभ्यते। नागेशः पण्डितराजजगन्नाथकृतस्य रसगंगाधरस्योपरि एकां टीकां लिखितवान्। अयं पण्डितराजः शाहजहांनामकस्य यवनशासकस्य (१६२८-१६६६ ईशवीये) समसामयिक इति तु सुप्रसिद्धमेव। जयपुरेतिहासे इदमुपलभ्यते यन्महाराजो जयसिंहश्चतुर्दशाधिके सप्तदशशतके ईशवीये (१७१४) अश्वमेधयज्ञं कृतवान्। इयं च जनश्रुतिरद्यापि प्रचलति यन्नागेशोऽश्वमेधे उपस्थातुमामन्त्रितो जयसिंहेन। उत्तरितं च तेन—अहं क्षेत्रसंन्यासं गृहीत्वा काश्यां स्थितोऽस्मि, अतस्तां परित्यज्यान्यत्र गन्तुं न शक्नोमीति। अतः स्पष्टं यन्नागेशश्चतुर्दशाधिकसप्तदशशतके ईशवीये काश्यां क्षेत्रसंन्यासिरूपेण निवसतिस्म।

ईशवीयसप्तदशशतके अष्टादशशतके च काश्यां कुलागमानां महान् प्रचार आसीत्। न केवलं ललितासहस्रनाम-नित्यातन्त्रादीनां प्रसिद्धकौलग्रन्थानामुपरि विस्तृतटीकानां लेखको गम्भीररायपुत्रो भास्कररायः काशीमलंकरोति स्म, यावत् तस्य गुरुर्नृसिंहयज्वा ललितासहस्रनामपरिभाषालेखकस्ततः पूर्वं कुलधर्मं दर्शनञ्च प्रचारयति स्म। भास्कररायस्य जीवनसमयविषये नास्ति कश्चन सन्देहः। स स्वयमेव सौभाग्यभास्करनाम्न्याः स्वीयाया ललितासहस्रनामटीकायाः सेतुबन्धाभिधाया नित्यातन्त्रटीकायाश्च तिथ्यौ लिखितवान्। इदं सर्वं पूर्वमेव विवेचितम्।

सौभाग्यभास्करलेखनात्पूर्वं स बहूनन्यान् ग्रन्थान् लिखितवान् यथा स्पष्टं तत्र तेषां नामोल्लेखात्। यथा—"तदिदमस्माभिर्वरिवस्यारहस्य एव विद्यान्तरेषु तदसामञ्जस्यप्रदर्शनपूर्वं निरूपितम्" इति (सौ० भा०, पृ० ६)।

एवं नागेशभट्टसमये काश्यां कौलसिद्धान्तस्य प्रचारे प्रदर्शिते "किमासीत् कश्चन कौलसिद्धान्तस्य प्रभावो नागेशस्योपरि" इति प्रश्नस्य स्पष्टमुत्तरमुपलभ्यते, यदि क्रियते तुलना नागेशभट्टस्वीकृतस्य सृष्टिक्रमस्य भास्कररायप्रदत्तेन सृष्टिक्रमेण। तत्र न केवलं विचारसाम्यम्, अपितु शब्दसाम्यमपि। क्रियतां लघुमञ्जूषायां नागेशोक्तसृष्टिक्रमस्य सौभाग्यभास्करे भास्करोक्त-सृष्टिक्रमेण तुलना, अवलोक्यतां च शब्दसरणेः प्रायिकमेकविधत्वम्। अस्मिन् प्रसङ्गे ये शब्दा नागेशभास्कररायोक्त्योः साधारणास्ते भिन्नाक्षरैर्मुद्र्यन्ते। भास्कररायवाक्यान्येवम्—

प्रलये सृज्यमानप्राणिकर्मणामपरिपाकदशायां तादृशकर्माभिन्नमायावच्छिन्नं ब्रह्म घनीभूतमित्युच्यते। **कालवशात् कर्मणां परिपाके** सति विनश्यदवस्थः परिपाकप्रागभावो विचिकीर्षेत्युच्यते। ततः परिपाकक्षणे **मायावृत्ति**रुत्पद्यते। तादृशं परिपक्वकर्माकारपरिगणित-मायाविशिष्टं ब्रह्म **अव्यक्तपदवाच्यम्**। अत एव तस्योत्पत्तिरपि स्मर्यते, 'तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम' इति। स एव जगदङ्कुरकन्दरूपत्वाद् **बिन्दुपदेन** व्यवह्रियते। तदुक्तं **प्रपञ्चसारे** "विचिकीर्षुर्घनीभूता सा चिदभ्येति बिन्दुताम्" इति। अस्माच्च कारणबिन्दोः सकाशात् कार्यबिन्दुः, ततो नादः, ततो बीजमिति त्रयमुत्पन्नम्। तदिदं परसूक्ष्मस्थूलपदै-रप्युच्यते। **चिदंशः चिदचिन्मिश्रोंऽशोऽचिदंशश्चेति** तेषां रूपाणि.....................।
सोयमविभागावस्थः कारणबिन्दुः। अयमेव यदा कार्यबिन्द्वादित्रयजननोन्मुखो भिद्यते तद्दशायामव्यक्तः **शब्दब्रह्माभिधेयो रवस्त्रोत्पद्यते**। तदप्युक्तम्—

बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्।
स रवः श्रुतिसम्पन्नैः शब्दब्रह्मेति गीयते॥ इति।

सोयं रवः कारणबिन्दुतादात्म्यापन्नत्वात् **सर्वगतोऽपि** व्यञ्जकयत्नसहकृतपवनवशात् **प्राणिनां मूलाधार एवाभिव्यज्यते**।......................तदिदं कारणबिन्द्वात्मकम् **अभिव्यक्तं शब्दब्रह्म स्वप्रतिष्ठतया निष्पन्दं** तदेव 'परावाक्' **इत्युच्यते। अथ तदेव नाभिपर्यन्त-मागच्छता तेन** पवनेन अभिव्यक्तं विमर्शरूपेण **मनसा युक्तं** सामान्यस्पन्दप्रकाशरूपकार्य-बिन्दुमयं **सत् पश्यन्ती वाग् उच्यते** इत्यादि (सौ० भा०, पृ० ६६)।

इदमिहावधेयम्—(अ) लघुमञ्जूषायां सौभाग्यभास्करे चोद्धृतम्—"तस्माद्बिन्दोर्भिद्यमानात्" इत्यादि पद्यं किंचित् पाठभेदेन शारदातिलके समुपलभ्यते यथा —

भिद्यमानात् पराद्बिन्दोरव्यक्तात्मा ततोऽभवत् ।
शब्दब्रह्मेति तं प्राहुः सर्वागमविशारदाः ॥ इति ।

(ल० मं० क०, पृ० १७८)

(आ) अयमेव सृष्टिक्रमो नित्याशोडषिकार्णवे अंशतः प्रदत्त उपलभ्यते । यथाह —

त्रिपुरा परमाशक्तिराद्या ज्ञानादितः प्रिये ।
स्थूलसूक्ष्मविभेदेन त्रैलोक्योत्पत्तिमातृका ॥
कवलीकृतनिःशेषतत्त्वग्रामस्वरूपिणी । इति ।

(नि० षो० अ०, पृ० १३४–५)

यथा स्पष्टीकृतं भास्कररायेण स्वीयसेतुबन्धटीकायाम् । यथाह —

"सर्वस्य जगतः प्रलयकालस्यावधिपर्यन्तं हि विनष्टप्राणिनां कर्माणि सूक्ष्मरूपेणान्तर्निगीर्य एकमेवाद्वितीयं ब्रह्म तिष्ठति । तत्परिपाकवैचित्र्यादेव हि सिसृक्षादिरूपा ब्रह्मशक्तिः पूर्वमव्यक्ततया स्थिताऽपि तदा व्यक्तीभवति ।..................इयं शक्तिरिच्छारूपाऽपि निर्विषयकचिन्मात्रभवत्वात् तद्रूपापि .... सेयं शक्तिः सृक्ष्यमाणसूक्ष्मत्रैलोक्यस्थूलत्रैलोक्ययोरुत्पत्तौ मातृका तज्जनिकेति यावत् ।.........केचित्तु त्रैलोक्यं विद्याकूटत्रयं तदुत्पादिका मातृका स्थूलसूक्ष्मभेदेन वैखरीमध्यमादिभेदेन द्विविधा ज्ञानादितो हकाररूपशिवाद् जातेत्यर्थ इत्याहुः" इति (नि० षो० अ० पृ० १३४) ।

इदमिह स्मर्तव्यं यत् (क) नागेशप्रयुक्तो मायाशब्द इच्छापरपर्यायत्वेन लघुमञ्जूषाटीकाकारैर्दुर्बलाचार्यप्रभृतिभिर्गृहीतः । यथा कुञ्जिकायाम्—

अद्वितीयस्य ब्रह्मणः क्रीडाया असंभवाद् इच्छोत्पद्यते । सैव माया । तदुक्तं काशीखण्डे—

यदेकलो न शक्नोषि रन्तुं स्वैरं चर प्रभो ।
तदिच्छा तव योत्पन्ना सैषा शक्तिरभूत्तव ॥
त्वमेको द्वित्वमापन्नः शिवशक्तिप्रभेदतः । इति ।

(ल० मं० कु० १०४)

इत्थमिदं स्पष्टीभवति यत् "मायापुरुषौ प्रादुर्भवतः" इति नागेशवाक्ये मायापुरुषशब्दाभ्याम् इच्छेष्टारौ अभिप्रेतौ । (ख) उपरि निर्दिष्टस्य नित्याशोडषिकार्णवीयग्रन्थभागस्य परापश्यन्तीमध्यमावैखरीरूपेणापि व्याख्यानमासीत् ।

(ग) बिन्दुनादबीजविषयिणी विचारधारा शैवागमेष्वेवोपलभ्यते। अद्वैतवेदान्तप्रतिपादकः शङ्कराचार्योऽपि तत्र तत्र बिन्दुनादविषयिणीं वार्तां कुर्वन् शैवागमानेवाश्रयति। यथा स्पष्टीभवति सुरेश्वराचार्यकृताद् मानसोल्लासाख्य-श्रीदक्षिणामूर्तिस्तोत्रवार्तिकाद् रामतीर्थयतिकृताया वृत्तान्ताख्यटीकायाश्च। तथाहि सुरेश्वराचार्यो दक्षिणामूर्तिस्तोत्रस्थस्य

भूरम्भांस्यनिलोऽनलोम्बरमहर्नाथो हिमांशुः पुमान्
इत्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात् परस्माद्विभोः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये॥

इति नवमश्लोकस्य व्याख्यां कुर्वन् लिखति—

षट्त्रिंशत्तत्त्वरूपासु परमेश्वरमूर्तिषु।
प्रत्यक्षेणोपलभ्यन्ते सर्वैरप्यष्टमूर्तयः॥

अस्योपरि टीकां कुर्वन् रामतीर्थयतिरेवमाह—"षट्त्रिंशतत्त्वानि शैवागमे प्रसिद्धानि" इति (द० मू० स्तो० १५२)।

तानि चैवं परिगणयति—"षट्त्रिंशत्तत्त्वानि द्वीतीयश्लोकोल्लासे विवृतानि, पञ्च भूतानि, पञ्च प्राणाः, चतुर्दशेन्द्रियाणीति चतुर्विंशतिः। महान्, कालः, प्रधानम्, माया, विद्या, पुरुष इति षट्। बिन्दुनादौ शक्तिशिवौ शान्तातीताविति षट्" इति (द० मू० स्तो०, पृ० १५४)।

तत्रस्थस्यैव "बीजस्यान्तरिवाङ्कुरो जगदिदम्" इत्यादिद्वितीयश्लोकस्य व्याख्यायां मानसोल्लासे इदं पद्यमुपलभ्यते—

बिन्दुनादौ शक्तिशिवौ शान्तातीतौ ततः परम्।
षट्त्रिंशत्तत्त्वमित्युक्तं शैवागमविशारदैः॥ इति।
(द० मू० स्तो०, पृ० ५७)

रामतीर्थयतिश्च स्वटीकायामेतदेवं विवृणोति—"बिन्दुः सर्वाधिष्ठानं सदाशिवाख्यं निर्गुणं तत्त्वम्। नादः प्रणवात्मना सर्वार्थस्फारकत्वेनाभिव्यक्तं तस्यैव रूपान्तरम्" इति।

(घ) यदि प्रपञ्चसारः शङ्कराचार्यस्य कृतिरित्यभ्युपगम्यते तर्हि तेन नादबिन्द्वादयो

मुक्तकण्ठं स्वीकृता इति शक्यते वक्तुम्। यतस्तत्र सृष्टिक्रमे बिन्दुनादयोः स्थानमित्थं निर्दिष्टम् —

प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम। … … … …
… … … … … … … … … …

स्वसंवेद्यस्वरूपा सा दृश्या देशिकदर्शितै (ता ?) ॥
प्रधानमिति तामाहुर्या शक्तिरिति कथ्यते।
… … … … … … … … … …

प्रलये व्याप्यते तस्यां चराचरमिदं जगत्।
सैव स्वां वेत्ति परमा तस्या नान्योऽस्ति वेदिता ॥
सा तु कालात्मना सम्यग् मयैव ज्ञायते सदा।
… … … … … … … … … … …

प्रकृतेश्च क्वचित् कालो विकृतिं प्रतिपादयेत् ॥
सा तत्त्वसंज्ञा **चिन्मात्रा** ज्योतिषः सन्निवेस्तदा।
विचिकीर्षुर्घनीभूता क्वचिदभ्येति बिन्दुताम् ॥
कालेन भिद्यमानस्तु स बिन्दुर्भवति त्रिधा ॥
स्थूलसूक्ष्मपरत्वेन तस्य त्रैविध्यमिष्यते।
स बिन्दुनादबीजत्वभेदेन च निगद्यते ॥
बिन्दोस्तस्माद्भिद्यमानाद्रवोऽव्यक्तात्मकोऽभवत्।
स रवः श्रुतिसंपन्नैः शब्दब्रह्मेति गीयते ॥ इति।

(प्र० सा०, पृ० २–५)

अस्योद्धरणस्य भिन्नाक्षरेषु मुद्रिता भागाः सम्यगवलोक्यन्ताम्। ते स्पष्टयन्ति यदिहोपात्ता प्रकृतिर्न सांख्याभ्युपगता इव अचेतना, किन्तु चित्स्वरूपा स्वां वेत्ति च। अत एव वेदान्ताभ्युपगतमायया अस्या अभेदो न शक्यते स्वीकर्तुम्।

(ङ) नित्याषोडशिकार्णवे च पराविषयिणी बह्वी चर्चा विद्यते। यथा—

वन्दे तामहमक्षय्याम् आकाराक्षररूपिणीम्।
देवीं कुलकलोल्लोलप्रोल्लसन्तीं परां शिवाम् ॥ इति।

(नि० षो० अ०, पृ० १८)

अस्य च श्लोकस्य काश्मीरिकं विवरणं भास्कररायेण स्वटीकायामुल्लिखितमेवम् —

"कुलं शरीरं पृथिव्यां लीयमानत्वात् । कला एकदेशः । उल्लोलमूर्ध्वोर्ध्वं प्रोल्लसन्ती वैखर्यात्मनेत्यर्थः । इति तु काश्मीरिकाः" इति ।

अतः परैव वैखरीरूपेणोल्लसतीत्ययं विचारो नागेशेनात एव गृहीत इति प्रतिभाति ।

(च) "एषा (एवं) सा परमा शक्तिः" इत्यादि (नि० षो० अ० १३६) भागम् जयरथः "अकुलस्यास्य देवस्य" (तं० आ०, भा० २, पृ० ७७) इत्यस्य टीकायामुद्धरति । अतोऽभिनवोक्ता परा नित्यास्वरूपिणी इति स्पष्टं भवति ।

(छ) शैवनये सृष्टिर्द्विविधा–शुद्धा अशुद्धा च । शुद्धसृष्टेः कर्ता शिवः । अशुद्धायाश्चानन्तः । पूर्वा कर्मानपेक्षिणी, अपरा कर्मानुकूला । यथाह —

मन्त्रमहेश्वराणां प्रथमः, अन्यत्रानन्तशब्दवाच्यः सितेतरम्–अशुद्धमध्वानम्, इह अस्मद्दर्शने सृजति–मायासंक्षोभपुरःसरं कलादिक्षित्यन्तेन वैचित्र्येणावभासयति बहिरित्यर्थः । तदुक्तम् —

ईश्वरेच्छावशादस्य भोगेच्छा संप्रजायते ।
भोगसाधनसंसिद्ध्यै भोगेच्छोरस्य मन्त्रराट् ॥
जगदुत्पादयामास मायामाविश्य शक्तिभिः । इति ।

तथा—

शुद्धेऽध्वनि शिवः कर्ता प्रोक्तोऽनन्तोऽसिते प्रभुः । इति ।

(तं० आ०, आ० ६, पृ० ५५–६)

नागेशभट्टः शैवाभ्युपगतां शुद्धसृष्टिं सर्वथा उपेक्षते । मायीयाम् अशुद्धां सृष्टिमेव स्वीकरोति । एवं शुद्धं मायापरिच्छेदरहितं निर्गुणम्, मायापरिच्छिन्नं जगत्कारणं सगुणं च ब्रह्माभ्युपगच्छति । माया च न ब्रह्मणः स्वभावः । यथाह —

"आध्यासिकसंबन्धेन तस्या नित्यसंबद्धत्वाद् विष्णौ तत्स्वभावारोपः" इति ।

(ल० मं० २६६)

(क) मायाया ब्रह्मणा आध्यासिकसंबन्धं वेदान्तप्रभावात्, (ख) ईश्वरे इच्छाजागर्ति प्रपञ्चसारप्रभावात्, (ग) सिसृक्षारूपां मायावृत्तिं ललितासहस्रनामटीकाप्रदत्तसृष्टिक्रमप्रभावात्, (घ) बिन्दोः सिसृक्षारूपमायावृत्त्युद्भवम्, (ङ) अव्यक्तपर्यायं बिन्दुम्, (च) बिन्दोर्नादं तस्य च मूलाधारे सत्तां प्रपञ्चसारललितासहस्रनामटीकयोः प्रभावादेकीकृत्य नागेशेन वैयाकरणदर्शनं स्थापितम् । नागेशस्वीकृतो बिन्दुर्नानुत्तरास्वरूपः, अपि त्वशुद्धसृष्टिक्रमगतः ।

नागेशनये परा बिन्दुरूपिणी बिन्दूद्भवा वा ?

परमलघुमञ्जूषायां परा बिन्दुरूपिणी स्वीकृता, यथा स्पष्टीक्रियतेऽधोलिखितेनोद्धरणेन —

"शब्दब्रह्मरूपा स्पन्दशून्या बिन्दुरूपिणी परावागुच्यते" इति ।

(प० ल० मं०, पृ० १०)

इदं मतं शैवागमसमर्थितम् । शैवागमेषु पराया बिन्दुपर्यायत्वेन स्वीकारात् । यथाह —

शब्दतत्त्वमयोघोषा वाग् ब्रह्मकुण्डलिनी ध्रुवम् ।
विद्याशक्तिः परा नादो महामायेति देशिकैः ॥
बिन्दुरेव सामाख्यातो व्योमानाहतमित्यपि । इति ।

(र० त्र०, पृ० ३०)

परं लघुमञ्जूषायामिदं वाक्यमुद्धृतम् —

क्रियाशक्तिप्रधानायाः शब्दशब्दार्थकारणम् ।
प्रकृतेर्बिन्दुरूपिण्याः शब्दब्रह्माभवत् परा ॥ इति ।

(ल० मं०, पृ० ४१)

अस्मिन् वाक्ये परा बिन्दोरभवदित्युच्यते । अतोऽयं प्रश्नो जागर्ति किं नागेशमते बिन्दुरूपिणी बिन्दूद्भवा वा परा । पूर्वमेकस्मिन् प्रसङ्गे मयोक्तं यन्नागेशः प्रमाणवाक्यमुद्धरन् तस्य स्वोक्तांश एव प्रामाण्यं स्वीकरोति, न सर्वांशे । एवं च प्रकरणस्योपरि दृष्टिपाते कृते इदं स्पष्टीभवति यदिह नागेशः "सर्वे च शब्दाः सर्वार्थवाचकाः" इति, तदनुसारं च "नित्यः शब्दार्थसम्बन्धः" एवञ्च "उभयरूपा परा" इति च मतं स्थापयति । प्रकरणं चेत्थम् —

"सर्वैरर्थैः सर्वेषां शब्दानां संबन्धः, ईश्वरसङ्केतस्तु प्रकाशकः । अत एव नित्यः शब्दार्थसंबन्धः (वा० प० १, २३) इति तान्त्रिका इति । सर्वैरर्थैः सर्वशब्दानां संबन्धश्च योगिगम्य एव तेषां योगबलेनोभयरूपपराप्रत्यक्षात्, युक्तं चैतद् एकस्यैव स्फोटस्य शब्दब्रह्मरूपस्य शब्दतदर्थोभयोपादानत्वेनोभयरूपतया उभयोरपि तत्कार्ययोरुभयरूपत्वात्" इति ।

अत इदं चेत्स्वीक्रियते यदुपर्युक्तश्लोकस्थपराया उभयरूपत्वसमर्थनांश एव प्रामाण्यं नागेशसम्मतम्, तर्हि नागेशमते परा न बिन्दुरूपिणी इत्यायाति ।

अस्य श्लोकस्योक्तांश एव प्रामाण्यं नागेशसम्मतमित्यस्य समर्थनमस्मिन् प्रसङ्गे प्रदत्तेन द्वितीयेनोद्धरणेन क्रियते । तच्चैवम् —

श्रुतिश्च —

सूक्ष्मामार्थेनाप्रविभक्ततत्त्वामेकां वाचमभिनिष्यन्दमानाम् ।
तामन्ये विदुरन्यामिव च नानारूपामात्मनि सन्निविष्टाम् ॥ इति ।
(ल० मं०, पृ० ४१)

एतस्मिन्नेव प्रसङ्गे पराभ्युपगमसमर्थकतया मन्यमानं भर्तृहरिणा 'पश्यन्त्या मध्यमायाश्च' इति कारिकायाः स्वीयटीकायामुद्धृतम्—

'स्वरूपज्योतिरेवान्तः सैषा वागनपायिनी'

इति महाभारतस्य अश्वमेधपर्वणि ब्राह्मणगीतायां स्थितं वाक्यमेवमुल्लिखति —

स्वरूपज्योतिरेवान्तः परावागनपायिनी । इति ।
(ल० मं०, पृ० ४२)

परन्तु सृष्टिक्रमवर्णनावसरे बिन्दोर्नादमात्रमुत्पद्यते यत् 'रव' 'परा'–आदिशब्दैर्व्यवह्रियते इति वदन् नाद-रव-परा-शब्दानेकार्थान् मन्यमानः परां स्पष्टमेव बिन्दूद्भवां मनुते । यथाह –

"अस्माद्बिन्दोः शब्दब्रह्मापरनामधेयम्, वर्णादिविशेषरहितम्, ज्ञानप्रधानम्, सृष्ट्युपयोग्यवस्थाविशेषरूपम्, चेतनमिश्रम्, नादमात्रमुत्पद्यते । एतज्जगदुपादानमेव 'रव' 'परा'-आदिशब्दैर्व्यवह्रियते" इति (ल० मं०, पृ० १४५)

किं नागेशो विरुद्धभाषी नो चेत् कथं लघुमञ्जूषास्थमतस्य परमलघुमञ्जूषाप्रोक्तेन संगतिरिति विवेचनीयं विद्वद्भिः । एवं प्रतिभाति यत् परमलघुमञ्जूषायां भास्कररायेण प्रभावितो बिन्दुनादयोस्तादात्म्यमभ्युपगत्य परां बिन्दुरूपिणीं प्रोक्तवान् । भास्कररायो ह्येवमाह —

'सोयं रवः कारणबिन्दुतादात्म्यापन्नत्वात् सर्वगतोऽपि व्यञ्जकयत्नसंस्कृतपवनवशात् प्राणिनां मूलाधार एवाभिव्यज्यते" इति ।

नागेशो भगवति लीलां स्वीकरोति न वा ?

सृष्टिक्रमे 'भगवतोऽबुद्धिपूर्विका सृष्टिर्मायापुरुषौ' इति वाक्यस्य व्याख्याने कुञ्जिकायामिदमुक्तम्—"अबुद्धिः अविद्या परस्येश्वरस्य स्वभावो लीलेति चोच्यते" इति । रत्नप्रभायाञ्च "अविद्या परमेश्वरस्य स्वभावः लीला चेति पर्यायाः" इत्युपलभ्यते । तदनन्तरम् "अद्वितीयस्य ब्रह्मणः क्रीडाया असम्भवाद् इच्छोत्पद्यते सैव माया" इति । यद्यबुद्धिर्लीला, तर्हि कथं

क्रीडाया असम्भवः शक्यते वक्तुम् ? लोकवत्तु लीलाकैवल्यम्" (२, १, ३३) इति वेदान्तसूत्रे क्रीडाया लीलारूपत्वस्वीकारात् ।

अपरञ्च यदि भगवत इच्छैव माया तर्हि वेदान्तिस्वीकृतो मायावादः कथं नागेशस्योपरि आरोपयितुं शक्यते, यथाऽस्मिन्नेव प्रसङ्गे कुञ्जिकाटीकायामुक्तम् —"तथा च रज्जूरगादिवद-पृथग्भूतानामात्मन्यध्यस्तानां वियदादीनां शुद्धे ब्रह्मणि लयो भवति" इति (पृ० १७१–२) ।

तथैव च मायाशब्दे वेदान्तिस्वीकृतमायापरत्वेन व्याख्यायमाने शब्दब्रह्मणो मायाकार्य-त्वापत्तिः । एवं च मायीयत्वात्तद्विलोपापत्तिर्दुर्वारैव ।

एवंविधा अन्येऽपि बहवः प्रश्ना एतस्मिन् प्रसङ्गे उत्तिष्ठन्ति । कथं ते समाधेया इति विचारणीयं विशिष्टैर्विद्वद्भिः ।

नागेशनये सत्ता महासत्ता च

यथा स्फोटो द्विविधः—आन्तरो बाह्यश्च । तथैव सत्ताऽपि द्विविधा—आन्तरी बाह्या च । अर्थश्च प्रतिभारूपः, प्रति-बोद्धुराभिमुख्येन विषयतया भानात्, परन्त्वाभिमुख्येन भानं द्विधा भवति—बौद्धसत्तासमाविष्टेन बाह्यसत्तासमाविष्टेन च रूपेण । वैयाकरणानां नये वाच्योऽर्थो बौद्ध एव, न बाह्यः; 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेन बाह्यसत्ताऽभाववतः शशविषाणा-देरपि प्रातिपदिकसंज्ञाविधानस्वीकारात्, अन्यथा 'प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे प्रथमा' इत्यनेन पदिकार्थमात्रे प्रथमानापत्तेः शशशृङ्गं नास्तीत्यादिप्रयोगासंभवात् ।

एवं बौद्धसत्तासमाविष्टेनार्थेन संबन्धात् शशशृङ्गादिशब्दानामर्थवत्त्वसाधनेऽपि अभाव-शब्दस्य कथं प्रातिपदिकसंज्ञेति प्रश्न उत्तिष्ठति ? किम् अभावशब्दश्रवणे सत्ता प्रतिभाति ? 'ओम्' इति न शक्यते वक्तुम्, सत्ताया अभावप्रतियोगित्वात् ।

अतो जातेः शब्दशक्यत्वं सिद्धान्तयन्ति वैयाकरणाः । तथाहि 'शतशो गौः' इत्युक्ते शुक्लादिविशेषानवगमपूर्वकं सामान्यस्य शब्दतोऽवगतेर्जातिः शब्दशक्या । यथाह भाष्यकारः 'सरूपाणामेकशेष एकविभक्तौ' इति सूत्रे —

"अव्यपवर्गगतेश्च मन्यामहे आकृतिरभिधीयते, नहि 'गौः' इत्युक्ते व्यपवर्गो गम्यते 'शुक्ला' 'नीला' इत्यादि" इति (ल० मं०, ४६३ ।)

अथ च —

"कथं पुनर्ज्ञायते एकाऽऽकृतिरिति, प्रख्याऽविशेषात् । नहि 'गौः' इत्युक्ते विशेषः प्रख्यायते 'शुक्ला' 'नीला' इति" (ल० मं०, पृ० ४५२)

वैयाकरणाः—

व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः ।
रूपहानिरसंबन्धो जातिबाधकसंग्रहः ॥

इति नैयायिकोक्तान् जातिबाधकान् न स्वीकुर्वन्ति । जातावपि जातिं मन्वते । यथोक्तम्—

संयोगिद्रव्यभेदेन देशे च परिकल्पिते ।
तेषु देशेषु सामान्यमाकाशस्यापि विद्यते ॥ इत्यादि ।

(वा० प०, कां० ३, स० १, का० १५)

तथा च 'निस्सामान्यानि सामान्यानि' इत्यनादेयमिति मतं स्थापयन्तः, 'भेदप्रतीतावपि अन्वयिरूपं जातिः' इत्येवं जातिं लक्षयन्तः, यथा रुचक-स्वस्तिक-कुण्डलादिविकारभेदेऽपि सुवर्णमित्येवानुयायि रूपं सत्यम्, तथैवैव जातिर्महासत्ताख्या ब्रह्मस्वभावा सर्वासु गोत्वादिजातिष्वनुगता तस्यामेव च सर्वे शब्दा वाचकत्वेन वर्तन्ते इत्यभ्युपगच्छन्ति, प्रातिपदिकमात्रवाच्या च सा 'प्रातिपदिकार्थः सत्ता' इति वृद्धसिद्धान्तात् । एवं चाभावस्यापि महासत्तया अवियोगाद् महासत्तारूपार्थवत्त्वात् प्रातिपदिकत्वमिति वैयाकरणानामुत्तरम् 'अभावस्य कथं प्रातिपदिकसंज्ञा' इति पूर्वोक्तस्य प्रश्नस्य । यथाह —

संबन्धिभेदात् सत्तैव भिद्यमाना गवादिषु ।
जातिरित्युच्यते तस्यां सर्वे शब्द व्यवस्थिताः ॥ इति ।

(वा० प० कां० ३, स० १, का० ३३)

इयं महासत्ता प्रत्यवमर्शात्मनश्चितेः पर्यायत्वेनाभिमता अद्वैतशैवसिद्धान्तप्रासादस्य आधारशिलाभूता शैवाद्वैतं पश्चाद् भाविटीकाकारव्याख्यातात् शाङ्कराद्वैताद् विभेदयति । यथाह –

चितिः प्रत्यवमर्शात्मा परा वाक् स्वरसोदिता ।
स्वातन्त्र्यमेतन्मुख्यं तदैश्वर्यं परमात्मनः ॥
सा स्फुरत्ता महासत्ता देशकालाविशेषिणी ।
सैषा सारतया प्रोक्ता हृदयं परमेष्ठिनः ॥ इति ।

(भा० भा० १, पृ० २५०–५५)

यथा च स्पष्टीकृतवान् भास्करकण्ठः —"अत एव वेदान्तिभिरपि सत्तामात्रमेव ब्रह्मणो रूपमुक्तम्, यत्तु ते विमर्शासहिष्णुत्वमस्य कथयन्ति तदन्यत् किञ्चिदेव" इति (भा० भा० १, पृ० २६०)

वैयाकरणस्वीकृता महासत्ता सर्वत्रान्वयिनी महाजातिः, जातीनामपि जातिर्ब्रह्मैव। परमयं महासत्तापदस्यार्थो न यौगिकः, अपि तु रूढः। शैवास्तु महासत्तापदं यौगिकार्थे प्रयुञ्जते। यथाह —

"सत्ता च भवनकर्तृता, सर्वासु क्रियासु स्वातन्त्र्यम्। सा च खपुष्पादिकमपि व्याप्नोतीति महती। देशकालौ सैव सृजतीति ताभ्यां विशेषणीया न भवति, यत्किल येन तुल्यकक्ष्यतया भाति तत्तस्य विशेषणं कटक इव चैत्रस्य। न च देशकालौ विमर्शेन तुल्यकक्ष्यौ भातः, तयोरिदन्तया तस्य च अहन्तया प्रकाशे तुल्यकक्ष्यत्वानुपपत्तेः। एवं देशकालास्पर्शाद् विभुत्वं नित्यत्वं च" इति (भा० भा० १, पृ० २५६–६१)

नागेशमतस्य शाङ्कराद्वैतवादाद् भेदः

नागेशः सर्वथा शाङ्करवेदान्ताद्वैतवादं नानुसरति। (क) शंकरो वैयाकरणाभ्युपगतं स्फोटवादमाचार्यदेशीयमतत्वेनोपस्थापयति अपाकरोति च। यथाह —

"वर्णवादिनो लघीयसी कल्पना स्फोटवादिनस्तु दृष्टहानिदृष्टकल्पना च वर्णाश्चेमे क्रमेण गृह्यमाणाः स्फोटं व्यञ्जयन्ति स स्फोटोऽर्थं व्यनक्तीति गरीयसी कल्पना स्यात्" इति।

(ब्र० सू० शां० भा०, पृ० २५६–६०)

परं नागेशः सुदृढाभिर्युक्तिभिः स्फोटवादं समर्थयितुं महान्तं प्रयत्नं करोति।

(ख) नागेशोऽद्वैतवेदान्त्यभ्युपगताम् अनिर्वचनीयख्यातिं न मनुते। तथाहि— वेदान्तिनये हि सदसद्विलक्षणम् अनिर्वचनीयं जलादि मृगतृष्णिकादावुत्पद्यते, एवं ब्रह्मणि प्रपञ्चः। तन्न, तादृशस्यानिर्वचनीयस्यानुभवविरुद्धत्वात्। नहि तादृग्वस्त्वनुभूयते यत्सदपि नास्ति, असदपि नास्ति। सर्वेषामनुभवानां भावाभावयोरेकस्मिन् कस्मिंश्चिदाश्रितत्वात्। भ्रमस्थले च भातं वस्तु न सदसद्विलक्षणम्, अपि तूभयरूपं सद्भिन्नत्वादसद्रूपम्, असद्भिन्नत्वाच्च-सद्रूपम्; उभयविधव्यवहारस्य दर्शनात्। ननु सत्त्वासत्त्वयोः परस्परविरुद्धत्वादुभयरूपताऽसम्भव इति चेन्न, तद्भिन्नत्वे सत्ति तदभेदेन प्रतीयमानत्वरूपे तादात्म्ये परस्परविरुद्धयोर्भेदाभेदयोरिव अभेदस्याध्यस्तत्वाद्विरोधाभावात्, सदसतोरपि सत्त्वस्याध्यासिकत्वोपगमेन विरोधपरिहार-संभवात्—(ल० मं०, पृ० २२६)।

(ग) एतदनुसारं नागेशनये मायाऽप्युभयरूपिणी। मायाविषये नागेशः परमार्थसार इति नाम्नः शेषलिखितस्य ग्रन्थस्य स्वरचितायां टीकायां सविस्तारं लिलेख इति तस्य लघुमञ्जूषायां स्वोक्त्यैव ज्ञायते। यथाह —"प्रपञ्चितं पूर्वत्र परमार्थसारविवरणे चास्माभिः" इति (ल० मं० ४८०)।

अधोलिखितो भागो मायाविषयकं तस्य मतं विस्पष्टयति —

"यथा स्वप्ने एकस्यैवान्तःकरणस्य विरुद्धानेकपदार्थत्वम्, तथा जागरे मायासहकारेण ब्रह्मणस्तथात्वम्। यथा च जागरेऽप्रतीयमानत्वात् स्वाप्नस्य मिथ्यात्वम्, तथा तुरीयदशायामननुवृत्तेरस्य प्रपञ्चस्य मिथ्यात्वम्। संविदश्च सत्यत्वम्" इति (ल० मं० ४८०)।

क्रियतां दृष्टिपातः 'अननुवृत्तेः' इति शब्दस्योपरि। अयं शब्दो वर्तनं वृत्तिं सतां न प्रतिषेधति, अपि तु अनुवर्तनम्—प्रतीतिं प्रतिभानम्। प्रतीत्यभावश्च नाप्रतीयमानस्य वस्तुनः सर्वथा अभावः कस्यांचन ऊर्ध्वभूमिकायां स्थितेन पुरुषेण अप्रतीयमानस्य वस्तुनोऽधरभूमिकास्थैः प्रतीयमानत्वात्। यथाह —

भ्रमे—यावद्विशेषदर्शनमवाधस्तदनन्तरं च बाधः। प्रपञ्चोऽप्येवमेव। इति।

(ल० मं० २२०)

यथा च व्याख्यातं रत्नप्रभाटीकायाम् —

एवमेवेति—सदसत्ख्यातिरेवेत्यर्थः।

ब्रह्मदर्शनात् प्राक् सत्, तदनन्तरं चासदिति भावः। इति।

(ल० मं० र० २२२)

कुल-वेदान्तदर्शनयोः साम्यवैषम्ये

(क) उपर्युक्तबिम्बप्रतिबिम्बवादस्वीकारात् शैवानामद्वैतवेदान्तिनां चास्मिन्नंशे मतैक्यं यत्परं तत्त्वं जगदुद्भावयत् (सृजत्) अपि स्वरूपान्न च्युतं भवति। शैवाः परतत्त्वस्य स्वरूपतादवस्थ्यं बिम्बप्रतिबिम्बदृष्टान्तेन समर्थयन्ति। यथा दर्पणे सप्रतिबिम्बेऽपि तस्य स्वरूपान्न च्युतिः, तथा परतत्त्वे जगत् स्वस्मिन् प्रतिबिम्बतया धारयति अपि तस्य स्वरूपान्न च्युतिः। दर्पणपरतत्त्वयोश्चायं पारस्परिको विशेषो यद् दर्पणो बाह्यबिम्बे सत्येव तत्संपर्कात् सप्रतिबिम्बो भवति, परतत्त्वं तु बाह्यप्रतिबिम्बसमर्पकबिम्बाभावेऽपि स्वात्मभूतया स्वातन्त्र्यशक्त्या जगद्रूपेण भासते। यथाह —

अन्तर्विभाति सकलं जगदात्मनीह
यद्वद्विचित्ररचना मुकुरान्तराले।
बोधः पुनर्निजविमर्शनसारवृत्त्या
विश्वं परामृशति नो मुकुरस्तथा तु॥ इति।

(तं० आ०, भा० २, पृ० ७३)

परं वेदान्ती जगद् ब्रह्मणो विवर्त इत्यभ्युपगच्छन् जगद्रूपेण विवर्तमानमपि ब्रह्म स्वरूपान्न प्रच्यवते, यथा शुक्तिरज्ञानादिकारणाद् रजतरूपेण भासमानाऽप्यपरिवर्तितस्वरूपैव तिष्ठति।

(ख) वेदान्तिनये विवर्तस्य कारणं सदसद्भ्यामनिर्वचनीया माया। सा च नश्वरी, ज्ञाननिर्वर्त्या च। परं शैवनये।

संविदस्तत्तदाकारतया स्फुरणे न अविद्यादिनिमित्तम्, किन्तु स्वातन्त्र्यम्।

(तं० आ० भा० २, पृ० १०६)

अयमेव वेदान्तिशैवयोः मौलिको भेदः।

यथा वेदान्तिनये ज्ञानं ब्रह्म, तथा शैवनये संवित् परं तत्त्वम्। एकमेवेदं संवित्तत्त्वं वाच्यवाचकात्मना परिस्फुरतीत्यत्र नास्ति विवादः। ज्ञानं प्रकाशरूपम्—इत्यत्राप्यविवादः। प्रकाशरूपं ब्रह्म (संवित् शैवनये) कस्मात् कारणात् तत्तद्रूपेण भाति इत्यस्मिन्नंशे विवादः, वेदान्तिनये माया कारणम्। शैवनये स्वातन्त्र्यं कारणम्।

स्वातन्त्र्यम्—विमर्शः—स्वात्मपरामर्शः, इमे पर्यायाः। स्वप्रकाशायाः संविदो जडाद्वैलक्षण्यदायी स्वात्मपरामर्श एव स्वप्रकाशरूपां संविदं जडप्रकाशरूपान्मण्यादेर्भेदयति। वेदान्तिनां ज्ञानरूपम्। एवञ्च स्वप्रकाशमपि ब्रह्म न स्वात्मपरामर्शि। अतो वेदान्तिनो जडब्रह्मवादिन इत्युद्घोषयन्ति शैवाः।

(ग) वेदान्तिनये माया सदसद्भ्यामनिर्वचनीया, परं शैवनये सा अशुद्धाध्वनि भेदावभासयित्री पारमेश्वरी शक्तिरग्नेर्दाहकत्वशक्तिरिव परेशादभिन्ना। वेदान्तिनां मायावादः शैवैस्तत्र तत्र स्वनिबन्धेषु सविस्तरं समालोचितः। परमिह दिग्दर्शयितुमेकमेव वाक्यमुद्धृयते —

"अन्यस्य तु मायाप्रकृत्यादेः चित्प्रकाशभिन्नस्य अप्रकाशमानत्वेनासत्त्वाद् न क्वचिदपि हेतुत्वम्। प्रकाशमानत्वे तु प्रकाशैक्यात् प्रकाशरूपा चितिरेव हेतुः" इति।

(प्र० हृ०, पृ० २१)।

(घ) यथा वेदान्ती "नामरूपे व्याकरवाणि" इति श्रुतिमनुसरन् जगतो द्विधा विभागं करोति, तथा शैवोऽपि वाच्यवाचकात्मना जगतो द्विधा विभजनीयत्वं मन्यते। यथाह —"इह हि विश्वस्य वाच्यवाचकात्मना द्विधा विभागः" इति (तं० आ० भा० २, पृ० ७४)।

नागेशप्रतिपादितवैयाकरणदर्शनस्य कुलदर्शनेन साम्यं तस्माद्वैषम्यञ्च

(क) नागेशेन शब्दार्थयोराध्यासिकं तादात्म्यमित्ययं सिद्धान्तो न केवलं व्यवहारे, अपि तु शब्दब्रह्मविषयेऽपि स्वीक्रियते। अतस्तन्मते परा शब्दार्थोभयस्वरूपिणी परमार्थतो न अर्थस्य विवर्तरूपत्वात्। विवर्तो हि ज्ञानिदृष्ट्या अध्यस्यते एव। शैवमते परा शब्दार्थोभयरूपा, यथा प्रतिपादितम्—"अनुत्तरा परावाक्" इत्यस्मिन् उपप्रकरणे।

(ख) नागेशमते नाद-रव-पराशब्दाः पर्यायवाचिनः, नाद एव परा। बिन्दोश्च शब्दब्रह्मापरनामधेयं ज्ञानप्रधानं नादमात्रमुत्पद्यते, परं शैवनये अनुत्तरारूपा परा। नादश्च तदधोवर्ती तस्या आसनस्वरूपः, ज्ञानशक्तिप्राधान्याच्च पश्यन्तीरूपः, यथा स्पष्टीकृतमेकस्मिन् "बिन्दोर्नादः जीवकला" इति शीर्षके उपप्रकरणे। यद्यपि तत्र परप्रमातृरूपाद्बिन्दोर्नाद इत्युक्तम्, तथापि बिन्दोः प्रमातृरूपत्वाभ्युपगमात् प्रमातृत्वस्य च प्राधान्येन अनुत्तरापरपर्यायविमर्शरूपत्वात् फलतोऽनुत्तरारूपायाः पराया नाद इत्यायाति।

इमं शैवसिद्धान्तं भर्तृहरिर्जानाति स्म, अन्यमतत्वेन तस्योपन्यासात्। यथाह — "वाक्तत्त्वमेव चितिक्रियारूपमित्यन्ये" इति (वा० प० १-१२७ हरिवृत्तिः)।

क्रियतां भर्तृहर्युक्तेरधोलिखिताभ्यां कारिकाभ्यां तुलना —

चितिः प्रत्यवमर्शात्मा परावाक् स्वरसोदिता। इति।

अथ च (ई० प्र० अधि० १, आ० ५, का० १३)

आत्मात एव चैतन्यं चित्क्रिया चिति कर्तृता। इति। (तत्रैव १२)

उपसंहारः

बहवोऽन्ये कौलदार्शनिकैः सविस्तरं प्रतिपादिता विषयाः, यथा खेचरीसाम्यरूपो मोक्षः, भैरवैकात्म्यरूपा जीवन्मुक्तिः, मुक्तदृष्टो जगत्, शाम्भवो मोक्षोपायः, विस्तरभिया न व्याख्यायन्ते। तदधिजिगमिषवः तन्त्रालोक-तन्त्रसार-परात्रिंशिकाविवरणादिग्रन्थान् परिशीलयन्तु।

॥ इति ॥

डा० कान्तिचन्द्रपाण्डेयविरचितः

शैवदर्शनबिन्दुः समाप्तः।

शैवदर्शनबिन्दावुपन्यस्तानां मतानां सूची (१)

अद्वैत १, ३, २६, ६२, ६५, ७०, १२३, १२४ काश्मीरशैव ६७, ८४, दर्शन ३, १०८, वेदान्त १५, ३४, ८०, १७५, १८२, शैव ६७, ६६, ६७, ६८, ६६, शैवदर्शन ३६, शैवनय ८६, ६१

अद्वैतवाद ६८

अद्वैतवादी ६६, काश्मीरिकशैव ७३, मत ६५

अन्विताभिधानवाद ७६

अभिव्यक्तिवाद ६०

अभिहितान्वयवाद ७६

असत्कार्यवाद १३, ३६

आभासवाद ८०, ८४, ८५

आश्मरथ्य (मत) ५४

ऊर्ध्वाम्नाय १३०

औडुलोमि (मत) ५४

औत्तराम्नाय ११०

कर्तव्यमीमांसा ४१

कश्मीराद्वैत १७

कापालिक ५

कापिल ८३

कारणिक ५

कालमुख ७

काश्मीरशैव १५२

काश्मीरशैव-सिद्धान्त १५१

कुलदर्शन ६५, १००, १०८, १२०, १२१, १२२, १२३, १२४, १२५, १२६, १२७, १२८, १२६, १३०, १३५, १३८, १३६, १४७, १४८, १५०, १५५, १५८, १६१, १६३, १६५, नय १६४, प्रक्रिया १४२, मार्ग १२८ १३०, १४२, १४५

कुलाचार १३२, १४२, १४४, १४६,

कुलाम्नाय १४८

कौल १२२, १३०, १४४, १६१ दर्शन १३८, १७१ धर्म १२६ सिद्धान्त १७३

कौलाद्वैत १६१

कौलिक १४५

क्रमदर्शन ६५, ७७, १००, १०७, १०८, १०६, ११०, १११, ११२, ११५, ११६, १४७, नय १०८, ११३

चिदद्वैत ६५

जगत्सृष्टिसिद्धान्त १६५

जटाधारिशैवमत ७

जडब्रह्मवाद ८०, ६१ १३१

जडब्रह्मवादी १८४

जैन ६, २८

जैमिनीय ६

तान्त्रिक १७८

त्रिक ६०, ११२, १६२

दर्शनद्वैतपाशुपत ३७ लकुलीश ५०, ५३, लकुलीशपाशुपात ४६, शैव ३६

दक्षिणमार्ग १२८

देवीनय ८४

देहात्मवादी (चार्वाक) २५

द्वैत १, ३, ४, ५, ६, १७, २५, २६, ३६, ७०, १०६, १२३, १२४, दर्शन ६३, दृष्टि ११ परम्परा १६, मत ६४ वाद

६५, शैव ७, ६, २७, ६५, शैवसिद्धान्त ७, ८, ६, १०, ११, १३, ६०
द्वैताद्वैत १, ३, ४, ५, ६, ७, १८, २७, ३० ३४, ३६ ५६ ६५ ७० १०६ १२३ १२४, नय ६५ वाद ४०
नन्दिकेश्वरदर्शन ६५ नय ७० सिद्धान्त १०१ नय १६३, १८३, मत १८५
नैयायिक ६, २५, ३७, ६४ ६६, १६८, १८१, १६६,
न्यायदर्शन ६, ६, १३, ७६ सिद्धान्त ८०
न्यायवैशेषिक ३६, ४० ५३, ६१, ६३ नय १६५,
पञ्चकदर्शन ११२
पञ्चकविचारधारा ११२
परमाणुवाद ६
परिणामवाद १३. ४०
पाणिनिनय ७१, ६०
पाणिनीयव्याकरणदर्शन ७६
पातञ्जलदर्शन ४८, ४६
पारमर्ष ८४
पाशुपत ५, ७, १३, १५, २७ ५० द्वैत ५, १५, १६ लकुलीश ५, ६, २७ शैव-दर्शन ५६
पौराणिक २६
प्रज्ञाकरगुप्तमत ३२
प्रतिबिम्बवाद ८१ १६५
प्रत्यभिज्ञा ८, ७७, ८०, १०८, १०६, १२०, दर्शन ७०, ७६, ७८, ७६, ८५, १५० १६१
प्रत्ययवाद ६६
प्रमाणमीमांसा ४१ सिद्धान्त १५३
बादरायणदर्शन ६
बिम्बप्रतिबिम्बवाद १६५, १८३
बौद्ध ६, २५, ५३, ६५ १०५, ११३, ११४ १४८ १५२, १८०, दर्शन ८७, धर्म १२६ नय १६५ मत ७६ ८० ६६
ब्रह्मपरिणामवाद ५६, ५८
ब्रह्मपरिणामवादी ५५, ८८
ब्रह्मवाद ६१, ६६, अभाव ८० शून्य ८१
भर्तृहरिनय ६३, १०३, १६८, मत ७२ ६४, ११२
भेदवाद ६२, ६७
भेदवादी १५१
भेदाभेद ३६, ५४, ५५, ५६, ५७, ११२ अचिन्त्य ५७ भर्तृप्रपञ्चादिप्रतिपादित ५८, लकुलीश ५७, ५६ वाद ३८, ५७, ५८, ६४ ६५,
भेदाभेदवादी ३८, ५६
महाव्रतधर ७
मायावाद ६, ५६, १८०, १८४
मीमांसकसिद्धान्त ७६
यथार्थप्रत्ययवाद ८०
युक्तिवाद ३७, ४१
योग ६, ४६, ५१, ५३, १२०, नय ८८ मत ७
योगाचार ८४
राजयोग ११६, १४३
रामानुजसिद्धान्त ६२
रामानुजीय ६१
लकुलीशदर्शन ३, ४०, ४२ मत ४१, ४५, ५६, सिद्धान्त ४६
लकुलीशपाशुपत ६, ७, ११, २६, ३०, ३३ ३४, ३६, ४०
वर्णवादी १८२
वाच्यसृष्टिसिद्धान्त १५४
बाम १३५, मार्ग ११०, १२८

विवर्तवाद १०४ १७० वादी १०२

विशिष्टाद्वैत ४, २७, ३४, ६२, ६३ रामानुज ६३, ६४, वाद ५८, ६१, ६३, शैव ५६, ६०, ६३

विज्ञानवादी १६, ६२, ६५, ११८, १६५

वेदान्त १६, २५, ५३, ८४, ६६, १०२ १४८, १४६, १५०, १६०, १७६ १७७, १८२, अद्वैत ४०, ८४ १०२, १०३, १०४ दर्शन १६४, १८३ नय ४३, ८६, ६१, ११८, प्रक्रिया ७६, सिद्धान्त ७, ७६, ८६, ६५

वेदान्ति ६८, ७६, ८७, ८८, १५६, १८० नय ८६, ६८, १६५, १८२, १८४,

वैदिक ५४, १०१, १४५ १४६

वैभाषिक ८४, ११८

वैयाकरण ६५, ६६, ७५ ७६, ८३, ६३, १०१, १०२, १०४, १६८, १७०, १७१ दर्शन १६, २२, २४, १४६, १६३ १६६, १७७, १८५, नय ७०, ६२, ६५ ६६, १०३, १०४, १६०, १८०, मत ६४ सिद्धान्त १७०

वैशेषिक ६, १३, २२, ३६, ७६, ८३, ८४, १३३

वैष्णव ६५, ११८,

व्याकरणदर्शन १६७

शक्त्यद्वयवाद १८ वादी ६५

शाक्त १०५, १४७, काश्मीर ६५

शाङ्करवेदान्ताद्वैतवाद १८२

शाङ्करवेदान्ती ५

शिवमत १० शासनपरम्परा ७६

शिवाद्वैत ५६

शून्यवाद ८८, १५२

शून्यवादी ६५

शैव ५, ७, १०१, १०५, ११३ १८४, १८५, अद्वैत १०३, काश्मीर ३८ तान्त्रिकप्रक्रिया १४६ दर्शन ३, २७, ७०, १००, १०७ ११२, १२४, द्वैत १, २, ३, ७, द्वैतविचारधारा ८० द्वैतवादी ६ द्वैत-सिद्धान्त ११ १२, द्वैताद्वैत ७ नय ६३, ६६, ६७, १७७, १८४, १८५, मत १८५ सिद्धान्त ४, ५, ११, १६१, १६५ १८१, १८५, १५६.

शैवाद्वैत ६५, ६६, ६७, ८०, ८१, १८१ काश्मीर ८०, ६३, १०१ दर्शन ६५, ७१

शैवाद्वैतवादी ६

संविदद्वयवाद ८०

सगुणब्रह्मवाद ५६ ब्रह्मवादी ३८

सत्कार्यवाद १३, ३६, ५८, ५६, ६० ६३

सांख्य ६, १३, १४, १७, २०, २५, ४० ४१, ४३, ५३, १७६ दर्शन १६४ नय १६५ प्रक्रिया १६०

सिद्धान्तशैव ८, १३, १४, १५, १६, १८, १६, २१, २२, २३, २४, २५, २६, दर्शन ३, १५, १७

सिद्धान्तशैवमत ११, १४

सेश्वराद्वैत ५६

सौगत ८३

सौत्रान्तिक ८४

स्फोटवाद ११, १८२ सिद्धान्त २३

स्वातन्त्र्यवाद ३७, ३८, ४०, ६७, ६८, ७० ७३, ७५, ७६, ८०, ८१, ८२, ८३, ६३, १०१, १०२, १०३, १०४

स्वातन्त्र्यवादी ६५, ६७, ७०, ७३, ७५, १०१, १४६

ग्रन्थकाराणां सूची (२)

अक्षपाद ७
अघोरशिव २४ (आचार्य) ८, ६, १२,
अभिनवगुप्त २, ३, ५, ७, ८, ६ १०, ११
१३, ७५, ७६, ७७, ७६, ८०, ८१
८५, ८८, ८६, ६०, ६१, ६३, ६७
१०१, १०३ १०७, ११ , १११
११२, ११६, ११७, १२० १२३ १२५
१२६ १३७ १३८ १४७ १४८, १५०
१५३ १६४ १६६
अल्लट १३८
अवतारकनाथ १११
अवैलान १०७
आनन्दगिरि २७
आनन्दतीर्थ ३७
आश्मरयूय ५४, ५७, ५६
ईश्वरशिवाचार्य १३८
उग्रज्योति ८
उच्छुष्म १२५
उज्जट १११
उत्तुङ्गशिव ११, १२
उड्रफ् १०७
उत्पल (आचार्य) ७७, ७८, ८५, १०१
१४७, (देव) १०, १४७, १५०
(पाद) १७०
उद्भट १११
उमानन्दनाथ १४०
औडुलोमि ५४, ५६, ५७
कणभुक् ६
कपिल २८, ८३ १०५
कल्याणवर्मा १३८
कल्लट १०, ७८ १३८
कल्हण ७६
काशकृत्स्न ५४
कुन्नू पिल्लाइ २८
के० वी० पाठक २८
कैयट ६७, ७१, ७३, ७४
कौण्डिन्य ६, १५, २६, ३०, ३१, ३३, ३८
कौशिक २८, २६
क्षेमराज ४, १० ६७ ७७ ७८ १०१,
१०७, ११२
खेटकनन्दन ८
खेटपाल ८
गङ्गानाथझा १, १०७
गिरधरशर्मा १
गुणरत्न २६
गोपीनाथ (कविराज) १०७, १४६
गोविन्दराज १११
गोविन्दानन्द ७, २७
गौडपाद ६५
गौरीकान्त १३५
ग्नोली १०७
चक्रभानु ११०
चैतन्यदेव ५७
जगदीशचन्द्रचटर्जी ४
जगन्नाथ उपाध्याय १०७
जगन्नाथपण्डित १४१
जयन्तचन्द्र ७६
जयन्तभट्ट १६६
जयरथ ३, ४, ६, ७७, १०८, ११०, १११,

जैमिनि १०५, १६७
जैयट ७४
दीपिकानाथ १३८
दुर्बलाचार्य १४६, १७४
दुर्वासस् २, १२४
देवबल ६
नन्दिकेश्वर ६५, ६६, ६९, ७०, १०१ १५७ १६७,
नन्दीश्वर ६६
नागार्जुन ७९, ८७
नागेशभट्ट ६५, ६६, ६७, ९३, ११२, १४९ १५०, १५६, १६०, १६३, १६६ १६७, १६८, १७१, १७२, १७३ १७४, १७७, १७८, १७९, १८० १८२, १८३, १८५
नारद १०५
नारायणकण्ठ ५, १०, १२
नारायणशास्त्री १४२
निम्बार्क ५४ ५६
नृसिंहयज्वा १३९, १७२
नृसिंहानन्द १३९
पञ्चशिख १०५
पतञ्जलि ६६, ७०, ७१, ७३, ७५
पण्डितगङ्गाधरशास्त्री (महामहोपाध्याय) १६९
पण्डितराजजगन्नाथ ८९, १७२
पण्डितसभापति-उपाध्याय १४६
पण्डितसूर्यनारायणशुक्ल १४६
पाणिनि ६६, ६७ ७०, ७१, ७३, ७५ ७९, १०१, १२०, १२२, १५१ १६७
पाराशर २८, २९
पुण्यराज ६५, ७९
पुलस्त्य १०५
११४, ११८, १२०, १२६, १३४, १३५, १३७, १३८, १४५, १६२
प्रज्ञाकरगुप्त ३२
बटुकनाथशास्त्री १५२
बाइर १०७
बादरायण ३ २७ ५८ १६७
बालभट्ट १४६
बृहस्पति ६, १०५
भट्टनायक ७९, ११५
भट्टोजीदीक्षित १२०
भर्तृप्रपञ्च ५५, ५८, ५६
भर्तृहरि १६, २४, २५, ६५, ७२, ७४ ७५, ७६, ९३, ९४, १०१, १०२ १०३, ११२, १४९, १५५, १६६ १६८, १६९, १७१, १७२, १७९ १८५
भार्गव १०५
भावज्ञ ३२
भावबृहस्पति ३२
भावशङ्कर ३२
भावसर्वज्ञ ३१, ३२
भास २८
भासुरानन्द १४०
भास्कर ५५, १३४, कण्ठ ७७, १५० १८१, राय १३०, १३३, १३५ १३७, १३९, १४०, १४१, १७२ १७४, १७७, १७९
भास्कराचार्य ५६
भूतिराज ७९, १०२, तनय ११
भृगु १०५
भोजराज ११, १२, १११
मणिभद्रसूरि ६
मण्डनमिश्र ८०

मधुराज ७७, १२०
महेश्वरानन्द १०३, ११०
माघ १०६
माधव २६, ३१, ३३, ७७
यादव (प्रकाश) ५४, ५५, ५६
याज्ञवल्क्य १०५
योगराज ७७
यीत्सिंग १६८
रत्नकीर्तिः ३२
राजशेखर ५, ६, २७, २६, ३०
रामकण्ठ ४, ६, १०, १६, १६६ (द्वय) १२, (द्वितीय) १०, ११, १२, १३
रामतीर्थ (यति) १७५
रामानुज २७, ३७, ५४, ५५, ५६, ५७, ६०, ६१, ६२
राशीकर ५६
रुरु ८
लकुली २६
लकुलीश २, ३, ७, २७, २८, २६, ३०, ३२, ३३, ३४, ४५, ५७, १३५
लक्ष्मणगुप्त १०
वरदराज ७६
वल्लभाचार्य ६५
वशिष्ठ १०५, १२६
वसुगुप्त ७७ ७८
वाचस्पतिमिश्र ५, २७, ५४, ६४
वार्नेट १०७
विद्यानन्द १०, १२६, नाथ १३५
विद्यारण्य ११
विशुद्ध (भगवान) ३८, (मुनि) ३१
व्याघ्रपाद ६६
व्यासतीर्थ ५५
व्यूलर २६
शङ्कर ६५, ८०, १८२, आचार्य ५, ६, १५, २७, ५५, ७७, १०६, १७५
शङ्करनन्दन ६
शङ्करानन्द १३३ नाथ १३५
शम्भुनाथ १२४, १२५, १३८, १४७
शशाङ्क ७६
शार्ङ्गदेव २६
शिवानन्द ११०, ११२ १२६
शिवानन्दनाथ १३५
शुक्र १०५
शूरवर्म (राजानक) ७६
श्रीकण्ठ २ ३ ४ ५ ८ १० ११ १२ १८ २४ २५ २७ ५६ ६० १०८ १२३
श्रीनिवासाचार्य ५४
श्रीशङ्कुक ७६
श्रीहर्ष ७६
श्रीहर्षदीक्षित १३५
सद्योज्योति ८ ६ ११ १२
सर्वपल्लीराधाकृष्णन् (डाक्टर) ३२
सातकडिमुखोपाध्याय १
सायण ३५, १६६
सिल्वन १०७
सिल्वन्-लेवी २८
सी० डी० दलाल ३१, ३२
सुदर्शनसूरि ५४
सुभगानन्द १३४, १३६
सुरेश्वराचार्य १७५
सूर्यनारायणशास्त्री १६६
सोमदेव १२४, १२५

सोमानन्द २, ३ १० १६ ७६ ७७ ७८ ८० ८५ १०१ १०३ १०४ १११ ११२ १२३ १२४ १४७ १४८ १५० १६८ १७० १७१
स्फोटायन १६७
हरदत्ताचार्य ३१
हरि १६६
हरिभद्रसूरि ५ ६ ७ २७ २९
हेलाराज १० ६५ ७२ ७४ ७५ ७९ १०२

ग्रन्थानां सूची (३)

अंशुमत् (आगम) ३, ४
अचलगन्ध (शिलालेख) ३२, ३३
अजित (आगम) ३, ४
अभिनवभारती ११७
अर्थरत्नावली १३४
अष्टाध्यायी ७५
आगमविवेक ११
आग्नेय (आगम) ७
आश्चर्यसार १२
इण्डियन क्रोनोलाजी २८
ईश्वरप्रत्यभिज्ञा ८५, कारिका ७७, ८५, १४७ टीका ७७ विमर्शिनी २, ६७, १४७, विवृत्ति-विमर्शिनी १४, ७६, ६७ ११७, १४७
उत्तरतन्त्र १२६
उत्फुल्लकमत (आगम) १२७
ऋग्वेद १६६
ऋजुविमर्शिनी १३४
कठोपनिषद् ७०
कलावाद (तन्त्र) १३४
कलासार (तन्त्र) १३४
कामज (आगम) ३
कामशास्त्र ३
कामिक (आगम) ४, ७, १३४
काम्परेटिव इस्थैटिक्स ६०
कारण (आगम) ३, ४,
कारणपदार्थ ३३
कालीकुलम् (आगम) १२७
किरण (आगम) ७
कुब्जिका १७४, १७६, १८०
कुब्जिकामत (तन्त्र) १३४
कुरूपिकामत (तन्त्र) १३४
कुलक्रमोदय (आगम) १२७
कुलगह्वर (आगम) १२७
कुलागम १३२
कुलार्णव (तन्त्र) १३०, १३२
कृष्णयजुर्वेद ३३
क्रमकेलि ११२
क्रमसद्भाव १११
क्रमसिद्धि १११
क्रमसूत्र ११२
क्रमस्तोत्र १११, ११२, १४७
क्रमोद्योत ११२
क्रियाकाल (तन्त्र) १३६
खेचरीमत १२७
गणकारिका ३०, ३१, ३२, ३४ ३८ ४६, टीका ३३, ५१
गायत्रीतन्त्र १०६
गीता ७०
गुणोत्तर (तन्त्र) १३६
गुह्यतन्त्र १३४
चण्ड (तन्त्र) १३५
चन्द्रज्ञान (तन्त्र) १३४, १३७
चन्द्रांशु (आगम) ७
चिन्त्य (आगम) ३, ४
छन्दोभास्कर १४१
ज्ञानार्णव (तन्त्र) ११५, १२६, १३२, १३३
तत्त्वप्रकाशिका ११ टीका १२

तत्त्वशम्बर १३३
तत्त्वसंग्रह ८, १२
तत्त्वत्रयनिर्णय ८, १२, १६
तन्त्रभेद (तन्त्र) १३४
तन्त्रराज (तन्त्र) १२७, १२६, १३६
तन्त्रसद्भाव १३६
तन्त्रसार १८५
तन्त्रालोक ३, ८, ६, ७६, ८१, ६३, १०८
१११, ११८, १२४, १२५ १४७
१४६ १६४ १८५ टीक ७७
तात्पर्यचन्द्रिका ५५
तैत्तिरीयारण्यक ३४, ३५, ३६
तोतुल (तन्त्र) १३६
त्रिशिरोभैरव (तन्त्र) १२७
त्रिशिरोमत (आगम) १२७
दक्षिणामूर्तिसंहिता १३०
दक्षिणामूर्तिस्तोत्रवार्त्तिक १७५
दीप्त (तन्त्र) ३, ४
देवीयामल (तन्त्र) १२५, १२७, १३७
देवीस्तव १४१
ध्वन्यालोकलोचन ७६
नन्दिकेश्वरकाशिका ६६, ६७, ६८ १५७
नादकारिका १०, ११, १६
नारसिंह (तन्त्र) ४, ५, ७
नारायणीयोपनिषद् ३४, ३५
नित्यातन्त्र १२७, १७२, टीका १७२
नित्याषोडशिकार्णव १२६, १३०, १३३,
१३४, १३७, १४० १७४ १७६
निर्मर्यादशास्त्र १२७
निश्वास (तन्त्र) ७
नीलपुराण ७६
नेत्रतन्त्र १३५, १३६
न्यायभूषण ३२
न्यायवार्त्तिक ६४
न्यायसार ३२, टीका ३२
पञ्चशतिकम् ११२
पञ्चार्थभाष्य ३० (दीपिका) ३३
परमलघुमञ्जूषा १७६
परमार्थसार १०७, टीका ७७, विवरण १८३
परमोक्षनिरासकारिका ८, ११
परानन्दतन्त्र १३०
परात्रिंशिका १२६, १४८, १५०, १८५, विवरण
१०७, १४७ १६४ विवृत्ति ८५
पाखण्डापजय १२
पारमेश्वर (तन्त्र) ७
पाशुपतसूत्र १५, ३०, ३३, ३४, ३५, ४०,
४५, ४६, ४६, ५०
पाशुपतसूत्र (टीका) २६, ३१
पाशुपतसूत्र (भाष्य) ३०, ३३, ४८
प्रज्ञालङ्कार ६
प्रत्यभिज्ञाहृदय ६०
प्रपञ्चसार १४६, १७७
प्रमाणवार्त्तिक ३२
प्रस्तारचिन्तामणि १३७
बहुरूपाष्टक (तन्त्र) १३४, १३७
बृहदारण्यक (उपनिषद्) ५५, १६६
ब्रह्मयामल (तन्त्र) १११, १२७, १२६
ब्रह्मसूत्र ५, ५४ टीका ५४, ५५
भक्तप्रकाश १२
भगवद्गीता १२, ५५
भामती ५
भावनोपनिषद्भाष्य १४१
भास्करविलास (काव्य) १४१
भास्कर (भाष्य) ५५, ५९
भास्करी ७७, १३५
भैरवस्तव २
भैरवागम १३५
भैरवाष्टक १३३

भोगकारिका ८, १२
मतङ्ग (तन्त्र) (टीका) ४
मतङ्गपारमेश्वर (आगम) ४
मतङ्गागम (टीका) १०
मद्गीत (आगम) ७
मन्त्रविवेक (टीका) ११
महाकालीमत (तन्त्र) १३४
महातन्त्र १३५
महानयपद्धति ११२
महाभारत १६७, १७६
महाभाष्य ७२, ७४ टीका ७४, ७५ प्रदीप ७४
महामाया (तन्त्र १३३, १३४
महार्थमञ्जरी १०३, ११०, ११२
महालक्ष्मीमत (तन्त्र) १३४
महासम्मोहन (तन्त्र) १३४
महोच्छुष्म १३४
मातृकातन्त्र १३७
माधवकुल (तन्त्र) १२७, १३७
मानसोल्लास १७५
मालिनीविजय (तन्त्र) ११२, १२७, १२८
मालिनीविजयवार्त्तिक ७६, १०८
मालिनीश्लोकवार्त्तिक १२८
मीमांसकवादकौतूहल १४१
मृगेन्द्र-आगम ५, १०
मृगेन्द्रवृत्ति १०
मृगेन्द्रागमवृत्ति (टीका) १२
मृत्युञ्जयतन्त्रम् १३६
मेरुप्रस्तर (तन्त्र) १३७
मोक्षकारिका ८, ६, ११
मौकुट (आगम) ३, ४
याज्ञिकी ३४
यामलाष्टक (तन्त्र) १३४
योगज (तन्त्र) ३, ४
योगसंचर (तन्त्र) १२७
योन्यर्णव (तन्त्र) १२७
रघुवंश २८
रत्नटीका ३१
रत्नत्रय ८, १०, ११, १६, १८, १६६,
टीका १२
रत्नप्रभा ७, १४६, १७६ टीका १८३
रत्नमाता १२७
रसगङ्गाधर १७२
रसमहोदधि १३८
राजतरङ्गिणी ७६
रुद्रयामल (तन्त्र) १२८, १२६
रूपिकामत (तन्त्र) १३४
रौरव (तन्त्र) ७, ८, टीका ८
लघुमञ्जूषा १४१, १४६, १६७, १७२, १७४,
१७६, १८३
ललित (आगम) ७
ललितासहस्रनाम १३६, १७२ टीका १७२,
१७७
ललितासहस्रनामभाष्यम् १४०
लिङ्गपुराण २७, २६, ३०
वरिवस्याप्रकाश १४१
वरिवस्यारहस्य १४१
वरिवस्यारहस्य (व्याख्या) १४१
वाक्यपदीय १०, १६, २४, ७२, ७५, ७६,
७६, १०२, १०३, १४६, १६८
१७२
वागाम्भृणीसूक्त १६६
वातुलतन्त्र १३४
वातुलोत्तर (तन्त्र) १३४
वामकेश्वर (तन्त्र) १३३, १३७, १३८
वामकेश्वरी (तन्त्र) १२८, १३०, १३७
वायुपुराण २७, २६, ३०
वाराही (तन्त्र) १०५, १०६

वारुणी ३४
वासुकि (तन्त्र) १३४
विजय (तन्त्र) ७
विमलामत (तन्त्र) १३४
विष्णुयामल (तन्त्र) १२६
विसर (तन्त्र) ७
वीरावलि (तन्त्र) १२७, १३४
वृत्तचन्द्रोदय १४१
वृत्तान्त (टीका) १७५
वेद १७, ३०, १४६
वेदान्त ८४, ८६, शाङ्कर ५७, ८७
वेदान्तकौस्तुभ ५४
वेदान्तपरिभाषा ८१
वेदान्त (शाङ्कर) ५
वेदार्थसंग्रह ५५
वेरावतप्रशस्ति ३२
वैशेषिक (तन्त्र) १३३, १३४
शम्बरतन्त्र १३३, १३४
शाङ्करभाष्य १६७
शारदातिलक १४६
शारीरकभाष्य (शाङ्कर) ४३
शिवतनुशास्त्र ६
शिवदृष्टि ७८, ८५, १०३, १२३, १४७, १६६, १७१
शिवसूत्र ७८
शिवसूत्रवार्त्तिक ७६
शिवसूत्रविमर्शिनी ७८
शिवस्तव १४१
शिवस्तुति १४१
शैवागम ३०, ७६, ७७, ७८, अद्वैत १२३
श्रीकण्ठभाष्य २७
श्रीजन्या (व्याख्या) १२
श्रीभाष्य (टीका) ५४
श्रुतप्रकाशिका ५४
षडर्धशतिक ११२
षड्दर्शनसमुच्चय ६, २७, ३०
षष्टितन्त्र १०५, १०६
संस्कारकारिका ३२
सनत्कुमारसंहिता १३०
सन्तान (आगम) ७
सम्मोहन (तन्त्र) १३७
सर्वतोभद्र (टीका) १२
सर्वदर्शनसंग्रह २६, ३३, ७७
सर्ववीरमत (तन्त्र) १३४
सहस्र (आगम) ३, ४
सांहिती ३४
सिद्ध (आगम) ७
सिद्धयोगेश्वरीतन्त्र १२७, १२८, १३०, १३४, १३५
सिद्धा (तन्त्र) ११२, १२७
सुन्दरीहृदय (तन्त्र) १३७
सुप्रभेद (तन्त्र) ४
सूक्ष्म (तन्त्र) ३, ४
सूतसंहिता २७, २६
सूतसंहिता (टीका) ११
सेतुबन्ध (टीका) १७२
सौन्दर्यलहरी ७७
सौभाग्यभास्कर १४१, १७२, १७३, १७४
सौरभेय (तन्त्र) ७
स्पन्दकारिका १०, ७८
स्वच्छन्द (तन्त्र) २, ४, ७६, १३५, १३६
स्वतन्त्र (तन्त्र) ५
स्वायम्भुव (आगम) ७
स्वायम्भुवागम (टीका) ८
हार्देश (तन्त्र) १२७
हृद्भेद (तन्त्र) १३४

—×—

उद्धृतवाक्यानां पदानां च सूची (४)

अइउण् १०१
अकः सवर्णे दीर्घः १५७
अकर्तरि च कारके १०६
अकारः सर्ववर्णानाम् ६७, १६३
अकारो ब्रह्मरूपः ६८
अकारो वै सर्वा वाक् १६२
अकुलस्यास्य १७७
अक्रोधोऽप्रमादः ५२
अघोरेभ्यः ३४, ५०
अत इनिठनौ ६०
अतस्तमुपसंहृत्य १२७
अतिमार्गकुलक्रम- १०८
अतो गुणे १२२, १५२
अथ योगमतं ७
अथवास्मद्दृशि ११४
अथ सर्वाप्युपासेयं १४२
अथातः पशुपतेः २७, ४६
अथास्माकं ज्ञानशक्तिः १६३
अथोऽसंस्पर्शिनः ११४
अदृष्टत्वात् प्रतिनिधेः ७४
अद्वैतवासनाविष्टेः १२
अध्याहितकलां यस्य १०१, १०२, १४६
अनन्यापेक्षिता यास्य १५६
अनादिनिधनं ब्रह्म १०३
अनुत्तरं परामृश्य १६२
अनुत्तराद् आदिवर्णात् ६३
अनुमन्ता विश्वसिता १४६
अनेकभावग्रामरूपतया १०२
अनेन विधिना ४६, ५०
अनेनानन्त्यमायाति १५४
अन्तर्विभाति सकलम् १८४
अन्यस्य तु माया १८४
अन्येभ्योऽपि दृश्यते १५१
अन्ये वैयाकरणा एव १७०
अपारे काव्यसंसारे १५५
अपूर्ववस्तुनिर्माणक्षमा १५४
अप्रकृतिरधिष्ठाता ५
अप्रच्युतस्वरूपस्य ५५
अयष्ट्वा भैरवं देवम् १४३
अर्थक्रियाऽपि सहजा ६६
अलिनाथे पुलिन्देति १२५
अवङ् स्फोटायनस्य १६७
अवश्यमेव भोक्तव्यम् २०
अवस्थादेशकालानाम् १६६
अवस्थितेरिति ५४
अविद्यमानं मृतं यत्र १२२
अविधा परमेश्वरस्य १७६
अविभागा तु पश्यन्ती १६७
अव्यपवर्गगतेश्च १८०
अशान्दमर्थज्ञानम् ६४
अशेषतन्त्रसारं तु १२८
अस्ति भाति प्रियं रूपम् ८८
अस्मन्मते तु ६१, ११७
अस्माद् बिन्दोः १६४, १७६
अस्य दर्शनस्यैतदेव १३८
अस्य द्वादश १११
अस्यान्तर्विसिसृक्षासौ १६३
अहं रुद्रेभिर्वसुभिः १६६

अहिंसा ब्रह्मचर्यं च ५२
अत्र सर्वत्र सूत्रेषु ६६
अत्रानुत्तरशक्तिः १५६
अत्रेदं ब्रह्म ३५
आगतं शिववक्त्रात्तु १०६
आजन्ममरणान्तं च १३१
आत्मात एव चैतन्यम् १८५
आत्मेश्वरसंयोगः ४६
आदिरन्त्येन सहेता ६३
आध्यासिकसंबन्धेन १७७
आनन्दसंज्ञकः १२४
आनन्दात्तृप्यते देवी १३२
आनन्दो ब्रह्मणो रूपम् १०८
आनन्दो ब्रह्म परमम् १४५
आम्नायतन्त्र १४०
आश्मरथ्यस्य तु ५४
आहारचारचेष्टाभिः १४४
इं मायामाश्रित्य ६८
इगुपधज्ञाप्रीकिरः कः १२०
इच्छया विस्तरम् ६६
इति नवतितमेऽस्मिन् ७६
इति नादसिद्धिम् १०
इति प्रकटितो मया ७८, ८५
इति मोक्षकारिकायाम् ६
इत्थं चाभिनवगुप्त- ६०
इत्थं यद्वर्णजातम् १६२
इत्थं यामलमेतद् १४४
इत्थं विश्वमिदं नाथे १६५
इत्ययं कथितो लेशात् १२८
इत्यादर्शकार- ३३
इत्येनां गुरुमुख- ११२
इत्येवमहिंसा ३०
इत्येवमसंव्यवहारः ३०
इदं नीलमितीहाऽपि ६८
इदं विकल्पनं शुद्ध- ११८
इन्द्रो वा अग्रे ५०
इह त्रीणि ज्योतींषि ६४
ईशानः सर्वविद्यानाम् ३४, ५१
ईश्वरः कारणम् ३७
ईश्वरेच्छावशादस्य १७७
उच्छुष्मशबरचण्डगु १२६
उभयोश्च ज्ञानयोरन्तरालम् १४५
ऊर्ध्वत्वात् सर्वधर्माणाम् १३०
ऋलक् सर्वेश्वरः ६८
ऋदोरप् १५१
एओङ् ६६
एकत्वं चापृथक्सिद्धिः ६२
एकषष्ठे (प्र)थमे २८
एकस्य तत्त्वादप्रच्युतस्य ७६, १०३
एकोऽपि दोषः १
एतच्च भाष्यम् ७५
एतानि च सम्यगधिगत्य ७८
एतेन ज्ञानार्णवीयवचने १३३
एवं च तन्त्रप्रक्रियोपासन्न- १२०, १२४
एवं च विमर्शनम् ६३
एवं तर्हि स्फोटः शब्दः १६७
एवं मन्त्रफलावाप्तिः १२६
एवंविधम् ११०
एवं शून्य एवाहन्ता १५२
एषा (एवं) सा परमा शक्तिः १७७
एषा हि न सांख्येया १६४
ओमित्येकाक्षरम् ७०
औडुलोमिपक्षे ५४
औत्तराम्नायाद्यशेष ११०
औत्पत्तिकस्तु १६७
कथं पुनर्ज्ञायते एकाऽऽकृतिः १८०

कथं पुनर्ज्ञायते कर्ता ७१
करशुद्ध्यादिविद्यानाम् १२६
कर्मादिनिरपेक्षस्तु ३७
कलावादं कलासारम् १३४
कला सप्तदशी यासौ १६४
कलितासनम् ६
कल्यन्देषु रसार्णव- १४१
कवलीकृतनिःशेष- १७४
कामिकं योगजम् ४
कार्यं प्राधानिकम् ४३
कार्यरूपेण नानात्व- ५५
कार्यस्य रुद्रे ५६
काव्यं तु जातु जायेत १५५
किन्त्वेतदत्र ११४
कुरूपिकामतं देव १३४
कुलं च परमेशस्य शक्तिः १२१
कुलं पदमनाख्यम् १२२
कुलं शक्तिः समाख्याता १२२, १३२, १३३
कुलमार्गो महादेवि १३१
कुलशक्तेरत्रैव निवेशात् १२२
कुलस्य प्राणदेहादेः १२१
कृतिः श्रीमदुत्पलदेव १०
कृपणधीः परिणाममुदीक्षते ८८
कृपाणधारागमनाद् १४६
कैलासाद्रौ भ्रमन् देवः १२३
क्रमदर्शने सर्वत्रैव १०८
क्रमनयसमानकक्ष्य- १०८
क्रमो भेदाभयः ८३
क्रियाशक्तिप्रधानाया १५६, १६०, १७८
क्षणैकमपि ३८
क्षेत्रे श्रीसप्तकोटीश्वरपुरि १४०
गुडिकानाथपादानाम् १२५
गुणधर्मद्वारेण ३८
गुरुचरणसनाथः १३९
गुर्वाम्नायतोऽविच्छिन्न- ८
गृहारण्यसमा लोके १३१
ग्रीवाभङ्गाभिरामम् ११६
चतुर्दशसूत्री ६६
चतुर्ष्वेव विकल्पेषु १०६
चतुःषष्ट्या तन्त्रैः ७७, १३७
चत्वारि वाक् परिमिता १६८
चत्वारि श्रृङ्गाणि १६८
चत्वारि श्रृङ्गास्त्रयः १६८
चत्वारो माहेश्वराः ५
चितिः प्रत्यवमर्शात्मा ७३, ६३, १८१, १८५
चितिरेव चेतनपदादवरूढा ११४
चित्तद्वारेण ४६
चित्त्वं स्वप्रकाशत्वम् ८६
चित्रस्य अट्टहासं वै १२५
जगदुत्पादयामास १७७
जनिः कर्तुः प्रकृतिः १६०
जयतात् जगदुद्धृति- १२४
जलयन्त्रभ्रमावेश- १०१
जलूका तृणं संक्रामति ३५
ज्ञातान् सृजत्यसौ १६६
ज्ञानं ज्ञानान्तर्वेद्यम् ८६
ज्ञानं तपोऽथ नित्यत्वम् ३१
ज्ञानभावनया सर्वं कर्तव्यम् १४५
टीकाकारस्तु ३२
ततः स भगवान् १२४
तत एव हि शब्दाख्यादुपसंहतक्रमात् ६४
ततोऽपि परमं ज्ञानम् १०८
ततोऽभूल्लाट- १२
ततो मुनिवरः श्रुत्वा १३०
तत्ते पदं संग्रहेण ७०
तत्क्रमश्च ३२

तत्र नामरहितम् ६४
तत्र विमर्शोऽभिलापात्मना ११३
तत्त्वं सदसदुभयानुभयात्मक- ८७
तत्त्वपक्षपातः ११५
तत्त्वातीतः परः शिवः २१
तत्पुरुषाय ३४
तत्प्रपञ्चस्तु ३३
तत्स्वरूपत्वेनाव्याहता ८६, १०२
तथा च नाविकल्पम् ६५
तथा च रज्जूरगादि- १८०
तथा धाराधिरूढेष्विति १४३
तथापि हरिबद्धेन ७४
तदधीनप्रवृत्ति- ७४
तदावेशेन विना ११६
तदिदमस्माभिर्वरिवस्या १७३
तदेतत्परं (आसनम्) पश्यन्त्याख्यम् १६३
तदेवं मुनित्रय- ५५
तदैव तु समस्तार्थम् ११७
तदैव नाभिपर्यन्तम् १६०
तद्द्वयालम्बना एता ११४
तद्ध्रुवधामानुत्तर- १४४
तद्वद्रागाद्यसंमृष्टम् ३८
तन्त्रं वैशेषिकं ज्ञानम् १३३, १३४
तन्त्रशब्दः ७३
तन्त्रावापविदा १०६
तत्रोक्तमन्त्रतादात्म्याद् १४३
तमेतं क्षोभस्य १४७
तस्मादित्यादिकं कर्म १३१
तस्याप्यभूत्स भगवान् १२४
तस्यावताराः साराः ३०
तस्यैव कुलस्यान्तः १२२
तस्यैव चैषा १११
तुर्याख्यसन्तति १२४
तुलामेलकयोगः १३६
तृणपर्णोदकाहाराः १३१
तृतीयचतुर्थकस्य ५१
तृतीयस्यां (पश्यन्त्यां) तु १६०
तेन यः स च कालेन १२४
तेषां क्रमेण तन्मध्ये ३
तेषामन्योन्यसापेक्ष्य- १३७
तेषु च षष्टितन्त्रादि- १०६
तैः साकं न च कर्तव्यम् १४३
त्रय्यन्ततत्त्वशीलनदलित- १४०
त्रय्या वाचः ११२
त्रिपुरां कुलनिधिमीडे १४०
त्रिपुरा परमा शक्तिः १७४
त्रिपुरा परमेशान १३२
त्रिपुरोत्तरे निकेतम् १२५
त्रैलोक्येऽप्यत्र ६१
त्र्यम्बकामर्दकाभिख्यः ३, १२३
त्वमेको द्वित्वमापन्नः १७४
द्वयाक्षेपी विनिश्चयः ६१
द्वयाद्वये च निपुणाः १२३
द्वादश काल्यभ्युपगमः १०८
दुःखजन्मप्रवृत्तिदोषः ५३
दुर्भेदपादपस्य ११६
दृक्क्रिया लक्षणा शक्तिः ३६
देशक्रमोऽपि भावेषु १०३
देहादिसंकोचकलुषाऽपरिपूर्णः ६०
दैवमष्टविधम् ४४
धन्यो मनुष्यलक्षेषु १३०
धर्मस्योपायश्चर्या ४६
न काव्यार्थविरामोऽस्ति १३४
न चर्या भोगतः प्रोक्ता १४४
न तत्त्वातत्त्वयोर्भेदः १०२
न परं तदवस्थायाम् ८६

न शिवः शक्तिरहितः ६६
न सोऽस्ति प्रत्ययो लोके ६५
नागबोध्यादिभिः ७६
नागार्जुनेन सुधिया ७६
नादज्ञेये शकस्याब्दे १२
नानाविधैः कृतैर्यस्माद् ३६
नामरूपे व्याकरवाणि १८५
नाम्नेव भेददृष्टिः ५
नारसिंहं च वक्त्रारम् ४
नित्यः शब्दार्थसंबन्धः १७८
नित्यातन्त्रविदः कृष्णम् १३३
नित्यानागन्तुकैश्वर्ययुक्ते ३८
नित्याहृदयसंप्रोक्त- १२६
निमित्तकारणं त्वीशः १७
निराभासात् पूर्णात् ८५
निरालम्बनं चितम् ४७, ५१
निर्णीतं च एतन्मयैव १२८
निर्वृतचित् ८७
निष्क्रियानन्दनाथश्च १२६
निस्सामान्यानि सामान्यानि १८१
नेहाद्वयनये सत्यासत्ये १०२
पञ्च पदार्थाः पशुपतिनेश्वरेण १५
पञ्चशिखेन मुनिना १०५
पञ्चानां पदार्थानाम् ३०
पञ्चामृतं रूपभेदम् १३४
पत्युरसामञ्जस्यात् ५
परः प्रत्याहारः ४७
परतोऽपि बाह्यार्थवासनया १७०
परब्रह्मण्यवेत्तारः १४३
पराद्वयदर्शने ११४
परिभूयमानो हि ५०
पशुपतेरिति १५
पश्यन्तीरूपं शब्दतत्त्वम् १०३
पितृदैवतयज्ञेषु १४६
पीत्वा पीत्वा पुनः पीत्वा १३२
पुरुषे षोडशकले १६४, १६५
पूर्वपश्चिकायां मयैव १२८
पूर्वपश्चिमदक्षं च १३४
प्रकृतिः पुरुषश्चैव १७६
प्रकृतेश्च क्वचित् १७६
प्रतिपत्तृप्रतिभासहकारितम् १५५
प्रतिपादितमेतावत् ७८, १०१
प्रतिभाविषयत्वाच्च १५५
प्रतीत्यप्रतीतिभ्याम् १६८
प्रधानमिति तामाहुः १७६
प्रमदालोचनन्यस्तम् १
प्रमाणप्रमेयः ११८
प्रलये व्याप्यते तस्याम् १७६
प्रागन्यतः शक्तिलाभात् ७२, ७४
प्रागिवार्थाऽप्रकाशः स्यात् ६२
प्राणायामस्तथा ध्यानम् ११५
प्रातिपदिकार्थः सत्ता १८१
बन्धुशब्देन तद्व्यापारो लक्ष्यते १२०
बहवः कौलिकं धर्मम् १३१
बहुरूपाष्टकं चैव १३४
बाह्यत्वग्राह्यत्वाऽयोगान्न ६०
बाह्याकारपरामर्शरूप–२३
बिन्दुनादौ शक्तिशिवौ १७५
बिन्दुः सर्वाधिष्ठानम् १७५
बिन्दोर्नादः १८५
बिन्दोस्तस्मात् १७३, १७६
बीजस्यान्तरिवाङ्कुरः १७५
बुद्धितत्स्थः ८४
बुद्धिबोधं हि १४
बुद्धिरूपं यत् सत्त्वम् १४
बौद्धोक्तानि १०५

ब्रह्मण्यानन्दाख्यम् १४५
ब्रह्मण्येवालातचक्र- ५१
ब्रह्मतत्त्वमेव ६७
ब्रह्मदर्शनात् प्राक् सत् १८३
ब्रह्मवादेऽविद्यां मायाशक्तीकृत्य ६६
ब्रह्म सत्यम् ८८
ब्रह्म स्वत एव ५५
ब्रह्मादिभूर्जपर्यन्तम् ३६
भगवतो बुद्धिपूर्विका १७६
भगवन् सर्वतन्त्राणि १३६
भवपाशनिवृत्त्यर्थम् १४६
भवोद्भवः ६
भावानचेतनानपि १५५
भावे १०५
भाष्यकृतोक्तम् ३१
भिद्यमानात् पराद्बिन्दोः १७४
भीतोऽहं भीतोऽयं ११७
भूयस्तस्योपसंहारः १२७
भूरम्भांसि १७५
भेदप्रतीतावपि १८१
भेदाभेदकल्पनम् ५६
भेदाभेदपक्षस्य ६०
भैरवागमेषु दक्षिणस्रोतः १३५
भ्रमे......यावत् १८३
मद्यपानेन मनुजो यदि १३१
मधुरादिरसास्वादे ११७
मनो महान् मतिर्ब्रह्मा ६८
मनो यत्र विलीयेत १४३
मनोरमायां तु १३४
मन्दबुद्धिप्रबोधाय ८
मन्त्रमहेश्वराणां प्रथमः १७७
महाचीनादितन्त्राणि १०७
महामाया शम्बरं च १३३
महोच्छुष्मं महादेव १३४
मांसभक्षणमात्रेण १३१
मांसमदुष्यम् ५१
मायया सुकृतया ५०
मायां तु प्रकृतिम् ३५
मायापदं सर्वं भ्रान्तिः ६८
मायापुरुषौ १७४
मालिनीविजये तन्त्रे १२७
माहेश्वरास्तु ५
मिथ्याज्ञानकारणम् ६८
मिथ्याज्ञानधर्मश्च ४५
मुक्तानां पुनर्दुःखैः ३७
मुनिं दुर्वाससं नाम १२४
मृत्योरुत्तारयेत् १३६
मूर्तिक्रियाविवर्ताविद्या ८७
मूर्तिवैचित्र्यतः ८३,१०३
मौसुले कारुके चैव १३५
यं चानुशासयामास ८
यच्चात्र न्यायभूषणे ३२
यज्जन्यते, उत्पाद्यते ४१
यतो वाचो निवर्तन्ते ३८
यत्तदापोमयं देव चक्षुः १३६
यत्परतत्त्वं तस्मिन् १५०
यत्र स्थितम् १५३
यत्रोदितमिदं चित्रम् १२१, १२२
यत्सर्वेषु साधनेषु ७५
यथा क्रतुषु विप्राणाम् १४६
यथा च क्रमकेलौ १०३
यथा पदार्थद्वारेण १५५
यथा प्रकाशकत्वमग्नेः ६५
यथा स्वप्ने एकस्यैवान्तःकरणस्य १८३
यथा हि वह्नेः ५४
यदाप्नोति ५३

यदीश्वरेच्छा ४१
यदेकलो न शक्नोषि १७४
यदेतत्पत्युः पतित्वं ५६
यदैक्यापत्तिमासाद्य १४७
यन्न कस्यचिदाख्यातम् १२८
यस्त्वाह नेत्रतेजांसि ८१
यस्मिन् सर्वं यतः सर्वम् १००
याभ्यां प्रकाशितं वर्त्म ६
यावत्पञ्चदशः पुत्रः १२४
यावन्नेन्द्रियवैकल्यम् १३२
योऽयमाकाशः ३५
योऽसौ नादात्मकः शब्दः १६३
रचितैश्चित्र—१३६
रसो वै सः ८६
रहस्यागमसार—७८
राजधर्मो दानधर्मः १०६
रुद्रे सदृश—५१
रुरुसिद्धान्तसंसिद्धौ ८
लभते रुद्रसायुज्यम् ५१
लुञ्चितकेशमतनिरसनान्तरम् ७
लोकधर्मविनोदोऽपि १३०
लोकवत्तु लीलाकैवल्यम् १८०
लोके सकलविघ्नविनिर्मुक्ता ६०
वदन्ति हृदयानन्दम् १३१
वन्दे तामहमक्षय्याम् १७६
वरदेवे करविल्लं पल्ली १२५
वर्णवादिनो लघीयसी कल्पना १८२
वशिष्ठः कपिलश्चैव १०५
वशिष्ठ श्रृणु वक्ष्यामि १३०
वसुरसपौषे १११
वस्तुतस्तु वक्ष्यमाण-८६
वाक्तत्त्वमेव १८५
वागम्भृणी यद् ब्रह्म १६६
वागेव विश्वा भुवनानि जज्ञे १६६
वाग्धेनुर्दुग्ध ११५
वाग्रूपता वेदुत्क्रामेत् ६५
वाग्विशुद्धः ३८
वाग्वै सम्राट् परमं ब्रह्म १६६
वामदेवाय ३४
वासश्चर्या जपध्यानम् ४६
विकल्परूपं भजते १०२
विचिकीर्षुर्घनीभूता १७६
विच्छेदग्रहणे १५५
विपर्यस्तेस्तु तेजोभिः ८१, १६६
विवक्षोर्वाग् ३६
विश्वात्मैक एव १०२
विषयो विषयान्तरार्थिताम् ६१
विस्तरोऽन्यत्र वर्णितः १३६
वृत्तिवृत्तिमतोरत्र ६८
वेदप्रामाण्यादुक्तम् ३०
वेदशास्त्रपुराणेषु १२६, १३२
वेदादिभ्यः परं शैवम् १२३
वेदान्तिनः शून्यवादिदूरवर्तिनः ८८
वैखर्या मध्यमायाश्च १४२, १६८
वैयाकरणनागेशः १६७
व्यक्तेरभेदस्तुल्यत्वम् १८१
शकन्ध्वादिषु पररूपम् १६२
शक्तिरहितस्य ८०
शक्तो यया स शम्भुः १८
शक्त्यानन्दो महानन्दा १२६
शङ्करः प्रच्छन्नबौद्धः ८८
शङ्खदुन्दुभि- ५३
शतकोटिप्रविस्तीर्णम् १३५
शतपत्रकैरितिश्लोक- १३३
शब्द इति चेन्नातः १६७

शब्दज्ञानानुपाती ८८, ११३
शब्दतत्त्वमघोषा वाक् १७८
शब्दब्रह्मरूपा १७८
शब्दस्य परिणामोऽयम् १०२, १६६
शिवशक्त्यात्मकं रूपम् १४५
शिवात् परम्परायातौ ८
शीतवातातपसहाः १३१
शुक्रो बृहस्पतिश्चैव १०५
शुद्धेऽध्वनि १७७
शुभकर्मजन्यवृत्तिव्यक्तम् ८९
शैवाः पाशुपताश्चैव ७
श्रीकेयूरवतीतः ११०
श्रीकौलदर्शने चापि १३०
श्रीगम्भीरविपश्चितः १३९
श्रीचक्रस्वरूपमवान्तर- १२९
श्रीत्रैयम्बकसन्तान- १३९
श्रीपूर्वशास्त्रे ७८, ११५
श्रीभट्टनाथ- १२०
श्रीमच्छ्रीकण्ठ- १२३
श्रीमत्सुमतिसंशुद्ध- १३९
श्रीमदघोरशिवाह्वयेन १२
श्रीमदवतारकनाथ- १११
श्रीमद्भाष्यकृतापि ३०
श्रीरामकण्ठसद्वृत्तिम् १०
श्रीविश्वामित्रवंश्यः १४०
श्रीवीरनाथपादैः ११०
श्रीसुमतिनाथस्य १२५
श्रीसूरमठाधिपतेः १३८
षट्त्रिंशत्तत्त्वरूपासु १७५
षण्णां वै राजपुत्राणाम् १२५
संबन्धिभेदात् सत्तैव १८१
संयोगिद्रव्यभेदेन १८१
संविदः तत्तदाकारतया १८४
संविदेव हि आख्यानीभूता ११८
संस्थानं चैव १०६
स एवात्मा सर्वदेह- १६९
सक्रमत्वं च ८४
स चायं पन्था न वाक्यपदीय- १४६
स चार्धत्र्यम्बकाभिख्यः १२३
सत्कार्यविचारे ३१
सत्ता च भवनकर्तृता १८२
सत्यं ज्ञानमनन्तं ब्रह्म ८६
सदाशिवः ५१
सद्योजातम् ३४
सद्योज्योतिर्देवबल- ६
समानकर्तृकयोः ६१
सरूपाणामेकशेष- १८०
सर्वं खल्विदम् ११७
सर्वं परात्मकं पूर्वम् १६७
सर्वं परात्मकम् ६६
सर्वज्ञानोत्तरं देव १३४
सर्वत्र चाप्रतिहत- ४५
सर्वत्राभासभेदोऽपि १०३
सर्वधातुभ्यः ष्ट्रन् १०५
सर्वविद्याधिपः १२
सर्वस्य जगतः प्रलयकालस्य १७४
सर्वाभरणसंयुक्तैः १३६
सर्वालम्बनधर्मैश्च ८७, १५२
सर्वे च शब्दाः सर्वार्थवाचकाः १७८
सर्वैरर्थैः सर्वेषां शब्दानाम् १७८
सर्वो ममायम् ६६
सहोपलम्भनियमाद् ६२
साक्षाच्छ्रीकण्ठनाथादिव १०
साक्षात्कारक्षणेऽप्यस्ति ६१
साभिलापम् ६१, ११३
सा स्फुरता ७४, १८१

सिद्धयोगीश्वरीतन्त्रम् १२७
सुप्रभेदस्तथा ४
सुरादर्शनमात्रेण १४५
सूक्ष्मामर्थेनाप्रविभक्त- १६६, १७६
सूक्ष्मा वागनपायिनी २४, १६६
सूत्रं वृत्तिर्विवृतिर्लघ्वी ७७
सेवते मधुमांसानि १४६
सैव स्वां वेत्ति १७६
सैषा त्रयी वाक् १६८, १६६
सोयं श्वः कारणबिन्दुः १७३, १७६
सोऽयमक्षरसमाम्नायः ६६
स्त्यानस्य क्रियावशात् १२१
स्त्रीसंभोगेन देवेशि १३१
स्थूलसूक्ष्मपरत्वेन तस्य १७६
स्फोट एव १७०
स्वतन्त्रः कर्ता ७२, ७३, ७४, ७५
स्वतन्त्रस्याप्रयोज्यत्वं ३७
स्वभावमवभासस्य ६५, १६०
स्वरूपज्योतिरेवान्तः १६८, १६६, १७६
स्वेच्छया स्वभित्तौ ६७
स्वेच्छया स्वस्य ६७
स्वेच्छावभाषिताशेष- १००
हकारेणान्वितम् १३८
हल् ७०
हित्वा वाणीम् ३८

पारिभाषिकशब्दानां सूची (५)

अकल ८१

अकारणकारण १७

अक्षर २३, २४

अघोर ३४, ३६, ४०, ५०

अचेतन १४, १५, २५

अतिनय १०६

अतिमार्ग १०८

अद्वैत ३, ४, ८५, १०६, १२३, १२४, १२७ सिद्धि १६२

अधर्म ४५

अध्वन् अशुद्ध १७७, १८४–शुद्ध–२१, १७७

अनन्त १६, २०, २२, ३५, ३६, ३६, ५४, ५५, ८६, १७७, शक्ति १५६, १६२

अनर्थक्रियाकारिताख्याति ६७

अनवभास ६७

अनाख्य १२२

अनाद्य ३६

अनाभास ६८

अनिर्वचनीय ८७, ८८, ६६, १८२, १८४, ख्याति–१८२

अनिलय ३५

अनुत्तर ८६, ६२, ६३, १०८, १२२, १५० १५१, १५२, १५३, १५४, १५६, १६२, १६५–रूप १५७, १५८–शक्ति १५६, १६४–स्वरूप १४८

अनुत्तरा १५४, १५६, १५७, १५८, १५६, १६२, १६५, १८५–स्वरूप १७७

अनुपाय १०८, १४७

अनुभाव ११६, ११८

अनुमान ३३, ४३, ६३, ८६, प्रत्यक्षपूर्वक–४३

अन्तःकरण ४, ४०, ४३, ४४, ७०, १६४

अन्तःसंजल्प २३, २४

अन्यथाख्याति ६८

अपतित्व ४६

अपवर्ग ५३, १५१

अपितत्करण ४७, ५०

अपितद्भाषण ४७

अपोह ६२

अपोहन ६६

अभाव ४३, ८७, ६६, १८०, १८१, प्राग्–४१, ५८, ब्रह्मवाद ८०

अभिमान १२१

अभिव्यङ्ग्य १७१

अमायीय १५२

अर्थापत्ति ४३

अवभास ८५, ६५, १५७

अविद्या ८१, ८४, ६३, ६५, ६६, ६६, १०२, १०४, १६६, १७०, १७६

अव्यक्त ४५, ४८, ५८, १७१, १७३, १७७

असङ्ग ५३

असर्वकर्तृत्व ४५

असाधारणख्याति ६७

अस्तेय ५२

अस्वतन्त्र ४१, ५८

अहंप्रत्यवमर्श १०८

अहंभाव ६०, ६८

अहङ्कार १४, ४१

अहिंसा ३०, ५२

आगम २, ३, ४२, ४३, १०२, १०६, ११०, १११, १२३, १४६, १६०, १६२, १७२, १७५–आणवमता १६, ३०, ३५-मार्ग ७८
आद्यस्पन्द ११३
आनन्द ८६, ८६, ६३ ६६, १०८, ११२, १४५, १४८, १५७,–घन ११७–रूप १४८,–शक्ति १५८, स्वात्म–१४५
आभास ८३, ८४, ८५, चित्र–८३,-भेद १०३
आसन ५१
आस्वादन ६०
आहार्य ४६
इच्छा ४४, १०८, ११२, १६२–शक्ति ५१, १५७
ईशन १५७
ईशान ३४, ३६, ५१
ईश्वर १६, २०, २१, ३५, ३७, ४४, ५३, ५८, ६०, ६१, ६२, ६३, ६७, ६६, ७०, ७६, ८३, १०१, १०३, १६१, १७१, अनुग्रह ४६,–इच्छा ४१
उत्तर १५१
उत्तरण १५१
उत्तरत्व १५२
उन्मेष्य १३८, १५८, १६२
उपादान १७, ३३, ३५, ५७, ५८, ६६, १६४,–कारण १५, १६, १७, ३३, ३५ ३७, ३८, ५७, १६५
उपाधि २१, २२, ४२, ४३, ५५
ऐश्वर्य ३६, ४०, ७३, १८१
करशुद्धि १२६
कर्तव्यमीमांसा ४१, ४२
कर्ता १४, १७, १८, ७१, ७२, ७३, ७४, ७५,
कर्तृ ३५, ७१, ७२, ७३
कर्म १७, १६, ३६
कला २, १७, २०, २५, ३६, ३८, ३६, ४० ४१, ४३, ४४, ५८, ८३ ८५, ६८, १०१, ११३, १५८, १६१, १६४, १६५, १७७, वाचक १०१ शक्ति १०३ षोडशी १६४
कल्पना ६१, ११४
कारक ७१, ७३
कारण ६, ७, १५, १६, ३५, ३७, ३८, ४१ ४४, ६०, ६६, ८४, ६६, उपादान १५, १६, १७, २०, २१, ३३, ३५, ३७, ३८, ५७, १६५, धर्म १५ परम–३८, ५६, ६०,–ब्रह्म ५५ रूप ५५, ५७, ५६ शक्ति ३६, ४४
कार्य ६, ७, १५, १६, १७, ३६, ३७, ३८, ३६, ४०, ४१, ४३, ४४, ५४, ५५ ५८, ५६ ६० ६३, ब्रह्म ५५
कार्यावस्था ६२
काल १७, ३६, ६३, ८३, ८४, ८७, १०२, ११६, १७६, क्रम १०३–शक्ति ७५, ८३, १०१, १०२, १०३, १४६
काली १०६, ११०, १११
कुण्डलिनी १७८
कुल ७७, १२०, १२१,–द्रव्य १२६.–याग १४८,
कुलाचार १३२, १४४, १४६, विधि १२६
कूटस्थ १५६
कृत्स्नतपा ५०
कैवल्य ४५, ४६
कौलिकी १६३, १६४, १६५, शक्ति १५४
क्रम ७७, १२०–दर्शन, १००, १०८, १११, ११२, नय १०८
क्रायन ४७, ५०

क्रिया १८, २०, २५, ८७, १०७, ११२–कारकभाव ८१, वैचित्र्य १०३–शक्ति १५६, १५९, १६०
क्षेत्रज्ञ २५, ४४
क्षेप १०९, ११३
क्षोभ १६३
क्षोभाधार १४७
खेचरी ११२, १८५
गति १०९, ११३, ११८,
गुण ४२, ११३,–गुणिन् ५९–प्रधानता ८६, प्राकृत–६१–त्रय ७०
गुरुपङ्क्ति ११२
गोचरी ११२
घोर ४०,–तर ४०
चक्र १२९, १३८
चमत्कार ९०, १५३
चर्या २०, २५, ३३, ४६, ४७, ४९, ५२ १०७, १२०, १४४
चर्वणा ९०,–पात्रम् ११६
चित् १८, ६१, ९३, १०८, ११२, कला ६७, ६८, ६९, ७०, ८७, ८८, १०१ माना-वरण–९० शुद्ध–९६, स्वरूप १५, १८ ४२, ६४, ६५, १७६
चिति ७३, १०१, ११४, १६५, १८४, १८५
चित्क्रिया १८५
चित्त ४२, ४५, ४७, ११४–वृत्ति ४८
चित्प्रकाश १८४
चिदचित् ५६, ५८, ५९, ६१, ६२, ६४, १७१
चिदद्वैत ६५
चिदात्म ८२
चिद्घन १७
चिद्रूप १८, ३८, ४१, ५४, ५६, ८२
चिन्मय १६१, १६५
चिन्मात्र १६५, १७४, १७६,–स्वभाव १६४
चेतन १५, ३८, ४०, ४४, ४५, ५८, ६०, ६३, ६५, ११४,
चैतन्य ८९, ९५–ग्रन्थि १६८, १६९
च्युति ४५
छेद ४८
जगदानन्द १४४
जप ४६, ४७, ४८,–ध्यान ५०, ५१
जय ४८
जरित्व ४६
जीव १५, २१, ३५, ३६, ३७, ५४, ५६, ५७, ५९, ६३, १५१, कला १८५, शक्ति ५७
जीवन्मुक्ति १८५
जीवात्मा ५४, ५८
ज्ञान १८, ४०, ४२, ४४, ५५, ६३, ८६, ८९, ९९, १०७, १०९, ११३, ११७, ब्रह्म–८७, भय–५६, मार्ग–१२०, मीमांसा–४१, ६५, १६५, शक्ति–२२, ९७, १५८, १६४, १७१
तत्त्व १८, ४३, ७०, ८५, ८६, ८७, १०२, १०३,–धर्म ६, ३९, पर–२७, ३४, ४०, ४२, ५८, ६७, ९१, ९२, ९५, १०४, १०९, १२०, १५०, १५८, १५९, १६५, १७०, १८३, परम–६३, ८६, प्रथम–१७ मुख्य–४४–त्रय १६ ज्ञान–४२ ४९, १०९, ११५
तत्त्वातीत ११, २१
तत्त्वोत्तीर्ण ७०
तत्पुरुष ३४, ३९
तन्त्र ८, ३०, ४४, १०३ १०५, १०६, १०७ १२०, १३२, १४९
तर्क ११५,
तात्पर्यार्थ ९५

तान्त्रिक १०७
ताप ४७
तिरोधान ८१
तिरोभाव ५८
तुरीय १५४, १६८, १८३
तुरीयातीत ६७ ११७, १२२
त्रिक ६०, ११२
त्रिपुरा १३२
दान ४७
दिक्चरी ११२
दीक्षा १५१
दीक्षाकारी ४८
दुःखान्त, अनात्मक–५३ सात्मक–५३
देवनित्यता ५१
देशक्रम १०३
द्रव्य ६३, नित्य-८४, परम–६०,–रूप ८३
धर्म ३६, ४०, ६०
धर्मधर्मिभाव ५६, ६०
धारणा ४७, ५१, ११५,
धार्य ५८, ५६, ६०
ध्यान ३६, ४२, ४६, ४७, ५१
ध्वनि १५४
ध्वन्यर्थ १५५
नाद १२, १६, २१, २२, २३, २४, २५
१०६, ११२, ११८, १५०, १६२,
१६३, १६७, १७१, १७३, १७५, १७६
१७७, १७६, १८५
नादात्मक १६२
नित्य १३, १७ १६, २१, २५, ३६,
४०, ५७, ५८, ६०, ८३, ८६, ८७,
१००, १०३, द्रव्य ८३ सम्बन्ध ६१
नित्या ६५, १३३
नित्याचक्र १३३
निमित्तकारण ५, ६, १५, १६, १७, १६,
३६, ५७, १६५
नियताप्ति ४६
नियति १७, ८३, ६८, १६१
नियम ५१
निरञ्जन ४४
निराभास ८५
निरुक्त ३५
निरोधशक्ति १७, १६, २०,
निर्गुण ६१, ६७, ६६, १०१, १६०, १७७,
१७५–ब्रह्म ३८, १०१
निर्विकल्प ४३, ६१, ६५,–रूप ६२, १०६,
वृत्ति १४४, ज्ञानभूमि १६
निर्विकल्पक २३, १५३ १५४,
निर्विशेष ६१, ६०
निलय ३५
निष्कल ३८
निष्ठायोग ४४, ५१
निष्पन्द १७३
पञ्चकृत्य १०६
पञ्चतन्मात्र ७०
पञ्चप्राण ७०
पञ्चभूत ७०
पञ्चवाह ११२
पति ६, १६, १७, १८, १६, २०, ३६,
३७, ३८, ३६, ४०, ४१, ४२, ४४,
४८, ५८, ५६, ६०, ६३, पदार्थ १५
परमाद्वैत १५
परमानन्द ६०, ६१
परमार्थ ८३, ८७, ८८, ६६, चित्स्वरूप १८
परमेशान १३२
परा १६, ११२, १५६, १६०, १६२, १६३,
१६४, १६५, १६७, १६८, १७२,

१७४, १७६, १७८, १७९, १८५, कारणत्व १६०, प्रतिभा, १५४, १५५, वाक् ७३, ९३, १५४, १५६, १६० १६२, १६६, १७२, १७३, १७८, १८१, १८५
परामर्श ६०, ६१, ६३, ६८, १५८, ९२, शुद्धाऽहम्-९२ स्वात्म-९१, १०६, १८४
पशु ५. ६, १६, १८, १९, २१, ३६, ३८, ३९, ४०, ४१, ४४, ४६, ५८, ६०, गुणरूप ४१, ४२
पशुत्व ३६, ४५, ४८, ४९, गुण ४६, मूल ४५
पशुपति १७
पश्यन्ती १६, २४, २५, १०३, १०४, ११२, १५१, १५४, १५६, १६०, १६३, १६७, १६८, १६९, १७०, १७१, १७३, १७९, रूप १८५
पानकरस ४०, ११६
पारतन्त्र्य ४३, ७१, रहित ७५
पारमैश्वर्य ३६
पाश ५, १६, १७, १९, २०, ५१, ५६, ६०, १५१ कार्म १५१ धर्म २० बद्ध १९, २१, मायीय १५१
पिधान १८
पुरुष १४, १६, २४, ३७, ४०, ४१, ४२, ४३, ४४, ४५, ४९, ८८, १५०, १६१ १६४, १७१, १७४, १७६ आन्तर १४ गुण ४१, पर ८६, षोडशकल १६४
पूर्वदृष्ट ४३
प्रकाश ४३, ६५, ६७, ८३, ८४, ९५, ९७, १०२, १०३, ११३, १५७, १५९, १६१, १८२, एकघन ६७, ६९, १०१, तत्त्व १५२, पर ४३, ९२, १५२, १५९, प्रधान १६१, भाग ८६, मान ६७, ८२, १५३, मानत्व ६६, ६९, १८४, रूप ६२, १५२, १६२, १८४, रूपा १८४, स्वतन्त्र ६६, स्वरूप ८७, १५०
प्रकृति १७, ३५, ४०, ४५, ६३, ७०, ९१, १५६, १६०, १६५, १७६, १७८, १८४, पर ११८
प्रच्छन्नबौद्ध ८८
प्रजातन्त्र १०६
प्रज्ञा ६८, १५४
प्रज्ञानघन ५६
प्रतिबिम्ब ९७
प्रतिभा ९७, १५४, २५५, गुण १५४, परा १५४
प्रत्यक्ष ३२, ४३, ६४, ६५, अयोगि ३३, आत्म ४३, इन्द्रिय ४३, योगि ३३, ज्ञान ४२, ६५
प्रत्यभिज्ञा ७७, १०८, १२०, उपाय १०८, मार्ग ७८
प्रत्यय ४, ६९, ९५
प्रत्यवमर्श ९५, १०८, ११३, आत्मा ७३, ८७, १८१, १८५
प्रत्याहार ४८, ५१, ९२, ११५, फल ४७
प्रधान १७५, १७८
प्रमाण २८, ४२, ४३, ६०, ६३, ११८, १५९
प्रमाणमीमांसा ४१, ११४, १५३
प्रमाता ९२, पर १६३, १८५, परिमित ६८, ९२
प्रमातृ ४४, ४९, ५१, ८५, ६६, ९८, १०९, ११४, ११८, १४८, पर ९८ परमार्थ ६६, परिच्छिन्न १६४, परिमित २१, २२, २५, ३८, ४३, ४५, ८३, ८७, ९७, ९८, १०३, १५३, रूप ८१

१८५, वर्ग ८३, ६७, शून्य १५२, संकुचित ६२
प्रमेय ६३, ८१, ८३, १०६, ११८, १५८
प्रलय ४४, ५७, ६०, ६१, ६२
प्रलयाकल १७, २५
प्रवृत्ति ४४, ५६, ७४, १०१, अनाश्रित ८३
प्रसाद ४६, ४८
प्राण १४३
प्राणायाम ५१, ५२, १४५
प्रातिभासिक ८७
प्राप्त्याशा ४६
फलागम ४६
बल ४८
बिन्दु १६, १७, २१, २२, २४, ६१, १५०, १५६, १६०, १६२, १७१, १७३, १७५, १७६, १७७, १८५, रूप १४८, रूपिणी १५६, १५६, १६०, १७८, १७६
बीज १७१, १७३, १७५, १७६, रूप २२, शक्ति ८०
बुद्धि १४, २२, २४, १६१, परिणाम १४, मृषा ८४, वृत्तिरूप २२, श्रोतृ २४, स्वात्म ३५
बैन्दवशरीर १६
ब्रह्म २५, ३४, ३५, ३६, ५४, ५५, ५६, ६०, ६१, ६२, ६३, ८३, ८४, ८७, ८८, ६६, ११७, १४६, १५७, १५६, १६०, १६६, १६६, १७४, १७७, १८३, १८४, अभिन्न १०३, तत्त्व ३५, ६७, तादात्म्य ६६, ध्यान ५१, ५६, निर्गुण ६७, १०१, १०२, पर ७०, १४३, परम १४५, मय ११४, महत्त्व ३६, राशि ६६, ६७, रूप ८८, १५७, १७०, रूपत्व ३८, १६६, शक्ति ३६, ६६, सगुण ३८, ७०, १७१, सायुज्य ३६, स्वरूप २५, ५५, ६६
ब्रह्मानन्द ३५, ११५
ब्रह्मास्वादसहोदर ११५
ब्रह्मानुभव ११५
भक्ति ४२
भव ६, ३३, पाश १४६
भवोद्भव ३६, ५८
भूचरी ११२
भेद ३१, ५७, ८१, ८६, ६६, ६६, ११२, अन्तर्गणिक ६०, ६३, विजातीय ६१, ६२, सजातीय ६१, ६२, स्वगत ६१, ६२, ६३
भैरव १४३, १५२, पर १२२
भोग ८, १४, १५, २०, ५६, ५७, १४८, शक्ति ५५
भोग्य २०, ३६, ५५, ५६, १६२
भ्रान्ति ६७, ६८, ६६, स्वरूप ४०
मण्डन ४७
मण्डल १२७
मध्यमा ६, १६, २४, ११२, १५१, १५४, १५६, १६८ १७२, १७४, १७६, वाक् १६७
मनस् ४०, ११४, १४३, १६०, नियोगसाध्य ५०, वृत्ति ६८
मन्त्र १६, १७, १६, २१, २५, ५०, ५१, ८१, १२७, महेश्वर १७७, राट् १७७
मन्त्रमहेश १६, १७, १६, २१, २५, ८१
मन्त्रेश १६, १७, १६, २१
मल १७, २६, २०, अपगम ३७, ४२, आणव २०, २५, कार्म २५, तिरोहित ११, ३७, परिपाक २०, पशुत्व २०,

४६, मायीय २०, २५, स्वरूप २१, क्षपणोपाय ५२
महत् ४०, ४३
महाजाति १८२
महानय १०६
महाप्रकाश १५२, रूप १५२
महाप्रलय १५३
महामाया १६, २१, १६१, १७८
महार्थः ११०
महार्थसंहार १६
महेश्वर ५, ३५, ४३, ४४, ४५, ८१, ६७, ६६, १६४
मातृका १७४
माया १३, १६, १७, १८, १६, २०, ३५, ५०, ६८, ८६, ६१, ६७, ६६, ११३, १६०, १६१, १६६, १७१, १७४, १७५, १७६, १७७, १७६, कार्य २०, पद ६८, परिणाम १७, वृत्ति १७३, शक्ति ५७, ८०, ८७, ६६, स्वरूप ८०
मायिन् ३५
मायोत्तीर्ण १५२
मिथ्याज्ञान ४२, ४५, ६८, निवृत्ति ४६, ५३ स्वरूप ७६
मुक्त १८, ३७, ५४, अनादि १७
मुक्ति १६, ३५, ३६, ४५, पूर्णा ११८
मुद्रा १२७
मूर्तिवैचित्र्य ८३, १०३, शक्ति १०३, स्वातन्त्र्य १००
मूलाधार १७२, १७३, १७७, १७६
मोक्ष ७, ८, ११, १५, १६, १८, २१, २५, ३७, ३६, ४४, ४५, ४८, ५३, ५५, ५६, ५७, ६०, ६१, ८१, ८६, ८७, ८६, ६६, ६८, १०६, ११६, ११८, १३०, १३१, १४६, १४८, १५१, १७०, १८५, अपर १६, उपाय १५, ७७, १८५, पर १६, २१, २५, १५१, परम ४६, ५३, मार्ग १४८, स्वरूप ६, २५, ५३,
मोहिनीश १३३
यत्न ४६
यन्त्रविज्ञान १०६
यम ५१, ५२
याग ४७
यामल १२६, १३२
योग ७, १५, २०, २५, ३६, ४६, ५०, ५१, ६६, १०७, अभ्यास ११५, मार्ग १२०, विधि २७, ४६
योगाङ्ग षट् ११५, अष्ट ११५
योगिनीम् १४४
रव १६४, १७३, १७६, १८५
रस ८६
रसानुभव ११६, ११७
रसास्वाद ६१, ११८
राग १७, ८३, ६८, १६१
राजयोग ११६, १४३, १४६
रुद्र ३६, ५१, ५६, तत्त्व ४५, ४७, समीप ४६, ५०, स्मृति ४६, ४८
रूपक १२१
रोधशक्ति १७, २०
लय ६०
लाभ ४२, ४६, ४८
लीला १७१, १७६
वाक् ११२, १५१, १६२, १६६, १६७, १६८ १६६, १७०, १७८, तत्त्व १८५
वाग्विशुद्ध ३८
वाम ११०
वामदेव ३४, ३६, ५०

वाममार्ग ११०

वास ४६

वासना ११६, ११७

विकल्प १६, २२, ४२, ८८, ६२, ६६, ११३, ११४, ११५, ११७, १५६, रूप, ६२ १०२, संस्कार १०६, ११३

विज्ञान २३, ३५, ६४, ६६, १०७

विज्ञानाकल १७, १६, २५

विद्या ६, १७, १६, २०, २१, ३५, ३६, ३८, ३६, ४१, ४२, ४३, ४६, ५८, ८३, ६३, ६५, ६६, ६८, १०२, १६१, १७०, १७५, अध्यात्म ३३, अबोधस्वभावा ४२, कूट १७४ तत्त्वांश १६१, बोधस्वभावा ४२, ४३, ८७, शुद्ध १६, ११७, १६१

विद्येश १६

विधि ७, १५, ५२

विपरीतख्याति ६७

विभाव ८६, ११६, ११८

विमर्श ६१, ६७, ६६, ८२, ६१, ६३, ६५, ११३, १२२, १५२, १५७, १५६, १८२, १८४, १८५, आत्म ६२, रूप ८४, शुद्ध ६२

विवर्त ७६, ८१, ८८, ६३, ६४, १०२, १०३, १०४, १६५, १६६, १७०, १८४, रूप १८५, लक्षण ७६

विवेकप्रवृत्ति ४२

विश्रान्ति ८६, १०, ११८, १२०, १२४, १४८, प्रमातृ ८३, ६०, संवित ८२, स्वात्म ६०, ६६, १४८

विश्वोत्तीर्ण १७, १८, ६७, ८५, ८६, १०१, १४४

विश्वोत्तीर्णानुभव १६

वृन्दचक्र ११२

वैखरी १६, २४, ११२, १५१, १५६, १६८, १७२, १७४, १७७

व्योमवामेश्वरी ११२

शक्ति ११, १७, १८, २०, २१, २५, ३४, ३६, ३७, ३८ ३६, ४०, ५५, ७०, ७२, ८३, ८६ ६३, ६६, १०३, १०८, ११२, १२१, १५६, १६१, १७५, १७७, अचिन्त्य ५७, अनन्त ५७, निरोध २०, पञ्चक १८, परिग्रह २१, परमेशस्य १२१, -मान् ७५, ८१, १०३, रोध २०, लाभ ७४, विसर्ग १६४, स्वातन्त्र्य ६७

शब्द-तत्त्व १६६, १७८, ब्रह्म १५६, १६४, १६७, १७०, १७१, १७३, १७४, १७६, १७८, १७६. १८०, १८५

शाक्त ७८, १४७

शाक्तोपाय १०८

शान्तातीत १४८

शाम्भव-मार्ग ७८, उपाय १०८, १४७, १४६, १८५

शिव ११, १६, १७, १८, १६, २५, ३३, ३४, ४६, ६६ ६७, ६६, ७०, ७३, ७५, ८२, ८३, ८५, ८६, ६६, १०१, ११०, पर २१, ६२, परम ८१, ८५, ८६, ६६, शासन ७६, सामीप्य ३७, साम्य १६, २५, साम्यरूपत्व ६०, सायुज्य ४४, ४६

शून्य ६३, १०३, १५१, १५२, १५४

शृङ्गारण ४७, ५०

शेषवत् ४३

श्रीपीठ ११२

संक्रमण ३५

संवित् ६८, ८४, ११३, ११४, ११५, ११६,

११७, ११८, १४४, १४७, १५२, १५६, १५६, १८३, १८४, आत्मक-८३, १५४, आनन्द-११६, पर-१२२, रूप-८३, १५६
संविवित्ति ६०
संवेदन ८२, ८४, ६१, ६६
संस्कार २२, ३२, ४२, ६१, ६१, ६८, ११४
सकरणत्व ४६
सकल १७, २५, ६१, ८१
सक्तिहेतु ४५
सगुण ३६, ५५, ५८, ६१, ६५ ६६, ७०, १६०, १७७
सत्ता ४४, ५५, ५८, ६७, ७३, १८१ महा-७३, ७४, १०१, १८१, लक्षण-८८, स्फूर्ति-८४, स्वतन्त्र-१६५
सत्त्व १४, ८७, ८८, ६२, ६५, ६६, ६७, ६६, शुद्ध-६१, ६३
सदसत्ख्याति १८३
सदाशिव १६, २१, ४४, ५१ ५८, १६१, १६३, १७५,
सद्योजात ३४, ३६, ४०
समवायिकारण ६, १७, १६, ३६
समाधि ४७, ४८, ५१, ८५, ११५, १७२, पर-१५१
सम्भव ४३
सर्वाविशाऽसामर्थ्य ४६
सर्वावियत्वम् ४६
सविकल्पकज्ञान १६, २४, ४२ ४३, १५४, १७२
सहृदय ८६, ६०, ११५, १४८, १५५
साञ्जन ४४
साधक ३६, ४७, ४८, ५०, ५१, १४३, १४५, १५८
साधारणीभूत १४८
सामान्यतोदृष्ट ३३
सामान्यप्रवृत्ति ४२
सायुज्य ३४, ३६, ४४, ५१, ५३, ६३, ११८, रुद्र-५१
सालोक्य ३६
सिद्ध ३०, ३६, ५३, ५६
सुषुम्णा १४६
सूक्ष्मा १६, २४, २५, ११२, १६६, १६६, १७२
सृष्टि १८, १०६, १५२, १५४, अशुद्धा-शुद्ध १६, १६, २०, २१, ११७, शुद्धा-१६, १६, २१, १७७
स्थायिन् ११८
स्थायिभाव १०, ११६
स्पन्द १०, १७२, शून्य-१७८
स्पन्दन ४७
स्फार १६३, क्रम-१५६, १५७, रूपा-१५६
स्फुरण १६०, १८४, रूपा-११३
स्फुरत्ता-७३, ७४, ६३, ११३
स्फोट २३, १५६, १६३, १६७, १६८, १७०, १७१, १७८, १८०, १८२, वाक्य-१५५
स्वतन्त्र ३५, ३६, ५६, ५८, ७१, ७२, ७३, ७४, ७५, १०२, १२२, १३७, १५६, १६१
स्वप्रकाश ४३, ४४, १८४, विश्रान्त ८६
स्वरूप ६४, ज्योति-१६८, लक्षण-३७, ८६, शक्ति ५७, ६०
स्वातन्त्र्य ३५, ३८, ७४, ७५, ६३, १०१, १२१, १६५, १८४, शक्ति-१०२, १४६, १६२, १८३
हठयोग ११६, १४३
हार्य ५८, ५६, ६०